व यशस्तथा ॥ गायेयुः साम गा राजन् पश्चिम द्वारमाश्रिताः ॥ पिबा सोमं नि ॥ सहस्रशीर्षाः ऊर्द्ध्व दमि
शुन्ताम ध्यमिति गिरिः आ वो राजानः उच्चा ते जातमंधसः ॥ रहस्यावीनां कपानः नत्त्व विनुः मूर्धानः कयानः
त्वामिद्धि सते पयांसि पुनानः सोमः आ भि त्वाक्षे मन्वतः ॥ अग्निमीले इति ऋः विभ्राऋहृतः अग्ने पुनाही
ति क्रमे गायेगायेभ्य इति दिग्गिरिमितं उग्न रोदो षेत्य थर्वसूक्तं ॥ अंगिरसो जन्मानी त्यांगिरसं रुद्रं जनेति
नील रुद्रं परिवर्त्मानीत्य पराजिताः मधुवाना इति मधुसूक्तं ॥ गोधमं अम यं द्यावा पृथिवीः जप्यानि तुः
अथर्वणा श्चोत्तरतः शांतिकं पौष्टिकं तथा जपेयुर्मनसादेन माश्विना वरुणापश्चम ॥ शांतिकं पौष्टिकं ॥ राम ॥
ग्रहादीनां हेम मंत्रास्तु जन्याशये उक्ताः ॥ इहैव ध्रुवानिमिनोमिः धरुणापस्मिबृहह्रूडापूतिधान्या ॥ २६ ॥
इति त्रयो वास्तोष्पतिमंत्राः शान्नऽइन्द्राग्नी एतनएवा गयस्फानोऽमीवहा ॥ अंवकमिति अयमि

26

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिकल्पनरुः ॥ अभियुक्तानां तु औदुंबरेण मणिना निसृक्तं प्रसिद्धं त्रिवाथर्ववेदी पठेत् ॥ यत्र वलमः
सिस्रेर्वद्रवः पश्चिमे गत्वा मूर्द्धे क्षिपथा तेनासदासीन्सोमा रुडाः १४ चतुर्स्ति शाद्धः त्रिन इति सूक्तं
वि हि सोते ॥ इति वृषाकपेः ॥ मित्रो जनान्त्र वव पठेत् ॥ अन्नूर्णवरुन्नेरेव पूर्वं जपं कुर्यात् ॥ सामगः पूर्व
दिग्पथर्वा व दक्षिणो जपेदित्युक्तं ॥ तत्र मूलं न विस्मः ॥ ॥ अथ प्रासादेपि नूतनश्वेतनतान स्थाप्य
धिवासनं कार्यं ॥ ॥ यथा ॥ प्रति दिशं मध्ये नवनवकोष्ठकैरेकाशीतिपदे तु मध्ये प्रतिदिशं वा
ज्जिघ्रे तिनवकुंभान्न्यसेत् ॥ तत्र मध्यकुंभे ज्ञाम्बुदुंवराश्वत्थं वटकाशोकपलाशप्लक्षन्यग्रोधक:
दंवाम्रबिल्वार्जुनपल्लव ब्रह्मदशकं सोमाय वनस्पत्यं नमो नाय नमः इति न्यसेत् ॥ ततः पूर्वनव:
केमध्ये पंचरत्नकरोचनाहृर्वादर्भशीर्षपक्षिनरक्तं चंदनजातीपुष्पकं दनत्वावर्त्तेनदशकं क्षिपेत्
आग्नेये यववीहितिलसुवर्णरजतसमुद्रगानदीकूलमृत्तिकांतरिक्षगोमयं क्षिपेत् ॥ दक्षिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ प्र॰का ॥
॥ २७ ॥
27

रोसहदेवी विष्णुक्रांता भृंगराज महौषधी शमी शतावरी गुडूची अपामार्गका मूलो क्षिपेत ॥ नैरृत्ये
कदली नालिकेर विल्व नारंग मातुलिंग वदरामलक वृन्तफलाष्टकं ॥ पश्चिमे मंत्र पंचगव्यं ॥ वाय
व्ये शमुडुंबराश्वत्थन्यग्रोध पलाशानां कषाय पंचकं ॥ उत्तरे सहदेवी कुमारी गुडूची वचा व्याघ्री मू:
लाष्टकं ॥ ऐशाने सप्तमृदः क्षिप्त्वा श्रीसूक्तेनाभिमंत्र्य शेषेषु गंधं क्षिप्त्वा मूलेनाभिमंत्र्य प्रासादं पंच
गव्येनाभ्युक्ष्य मूर्धानं दिवइति वल्मीकमृदा विलिप्य समुद्रज्येष्ठेत्यैशान मूलकुंभेन० यज्ञायज्ञेति वा:
यव्य कषाय कुंभेन० पयः पृथिव्यां वारुणा पंचगव्य कुंभेन ॥ या: फलीनीति नैरृत्य फलकुंभेन ॥ हंसः
स:शुचिषदिति सौम्य मूलकुंभेन ॥ विश्वाररातेमिति पूर्व कुंभेन ॥ सोमं राजानमित्याग्नेयेना ॥ विश्व
तश्चक्षुरिति याम्येन: नमोस्तु सर्पेभ्य इति मध्य कुंभेन: इदं मापइत्यष्टाष्टभि: पूर्वादिक्रमेण प्रासादं
स्नपयेत् ॥ एकाशीति कुंभा संभवे तु नवएक कुंभेन गंधोदकपूर्णेनादेव्यायकर्मणोशुभ्युध्वमिति

॥ राम ॥
॥ २७ ॥

प्रासादं प्रोक्ष्य सूत्रेणावेष्ट्य पुरुषस्वरूपं देवरूपं ध्यात्वा साहस्रसंख्यपताकाभिः सहस्रसंख्यध्व
जैः शतसंख्यैर्यथाशक्तिर्वा प्रासादं नत्वा मीपस्थवृक्षादिकं च भूषयित्वा संपूज्य ॥ ॐ ह्रीं सर्व
देवमयार्चिन्त्य सर्वरत्नजलाकृते ॥ यावच्चंद्रश्च सूर्यश्च भवेत्वधिवासय ॥ त्रिसूत्र्यावेष्टयित्वा गदे
वेभ्योऽष्टाविंशतिं तिलैर्हुत्वाष्टोत्तरशतं मूलेन चरुं हुत्वा ॥ गंगा यमुना गोदावरी सरस्वत्याख्याश्च
वनस्तोभेत्रुमंडपाद्दक्षिणे विष्णुगायत्र्या उद्यानस्थ रुद्रगायत्र्या चरुं कृत्वा नयेव देवायनिवेद्य दि
ग्पतीन्सर्थद्वादशविप्रान्संभोज्याचार्यं गां दत्वा ऋत्विग्भ्यो दक्षिणां दत्वा रात्रौ जागरं कुर्यात्
॥ एवं वाधिवासनं सप्तरात्रं पंचरात्रं त्रिरात्रमेकरात्रं सद्यो वा कार्यं ॥ तत्र प्रत्यह्माचार्यर्त्विजश्च
पूर्वोक्तसमिद्भिराज्येन चरुणा देवायदिक्पालेभ्यो मूर्त्तिमूर्त्तिपेभ्य इत्येवमष्टसहस्रमष्टशतं वा
जुहुयुः ॥ त्रिसंध्यं पायसेन दिक्पालेभ्यो भूतेभ्यश्च दिव्यंतरिक्षभौमेभ्यो दिक्षु वलिं दत्वा विप्रा

॥प्र०का॥ भोजयेत् ॥ अन्यह्माचार्यमृत्विग्भ्यो दक्षिणां दद्यात् ॥ मूर्त्तिस्त्वजले धिवासयेत्तत्रैव पूजयेत ॥ रात्रौ कुश
॥२८॥ वंशपात्रेषु निकेचित् ॥ तत आचार्यमृत्विजश्च स्वस्वकुंडे ऐशान्यां दिशि नेकं वा कुंभं स्थापयित्वा तत्र
वरुणां संपूज्य तीर्थान्यावाहयेत् ॥ अत्रैयेनवद्धो बली राजा० यदाबध्नन्निति वरुणक्रमसूत्रं सर्वेषां हस्ते बध्नं
ति ॥ तत्र आचार्यः पूर्वकुंडात्पूर्वे पदत्रये प्रासादस्यैशान्यां वा रत्निमात्रं गर्त्तं खनित्वा तत्राक्षतान्स भं
28 स्थिक्षिप्त्वा वटाश्वत्थोदुंबरादिकाष्ठं सरत्निर्यजमानमात्रं वा पृष्टिं चषालयुतं यूपं प्रक्ष्याल्य मूलम
ध्याग्रे प्रोक्ष्य ह्योषमवटे निवेशय यवानार्द्रे क्षिप्त्वा वर्हिर्विस्तीर्य मकलशास्य गन्धवेणा संकुल्वा
यूपं युतेनाभ्यज्य हरिद्रातैलाभ्यामिति केचित् ॥ चषालमग्नौ प्रतिमुच्य स्रुवेणाभिषूमग्निरायुः ॥राम:॥
वासु रासा इति पुष्पवस्त्रेणा परिवीय योदिवमित्युद्भिन्यपनिधाममानीनवरे वधाय० विष्णोः कर्म्माणी ॥२८॥
त्याभ्यामभिष्टूमग्निनासंमीमङ्कृवोसीतिनिखनेत् ॥ यूपे लोकपालानुपरस्थि विष्णुशिवानां पूजनं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वलिंदत्वा॥ ॐ एह्येहिधर्मध्वजयज्ञनाथत्रयीमयोवेदशरीरभूप॥ विघ्नापदेवेश्वरयज्ञरक्षावलिं
गृहाणेममहंनमामि॥ इतिनमेन॥ इतिमंडपयज्ञोत्तरमितिकेचित्॥ ॥इत्यधिवासनं॥ ॥प्रा
नःस्नात्वाद्वारदेवान्संपूज्यकुंडसमीपस्थकुंभेषु॰गजाश्वास्थानरथ्यावल्मीकनदीसंगमह्रद
गोकुलचत्वरमृदः॥ रोचनाशर्षपकुंकुमकर्पूरचंदनागरुकस्तूरीजातीफलकस्तागुग्गुलुपंच
पल्लवांश्चक्षिप्त्वाकलशोदकैर्यजमानमभिषिंच्यकृतनकारिष्यमाणाकर्मप्रतिष्ठार्थंशतमः
ष्टषष्टिःपंचाशत्षट्त्रिंशत्पंचविंशतिर्वागादक्षिणांदद्यात्॥ पुष्पोदकेनवास्तोष्पतेइतिमंत्रे
णाप्रासादंश्चोवास्तुदेवेभ्यएकैकाहुत्वाकुंडेषुमूलेनलोकपालमूर्त्तिमूर्त्तिमप्रश्चसमिदाज्यचरून्
ष्टशतंहुत्वापूर्णाहुतिंहुत्वाकूर्मशिलांपीठिकांलिंगंचज्ञातारमित्याद्यशांतिघोषेणाप्रदक्षिणां
प्रासादमानीयास्त्रमंत्रेण॰शालाद्वंजगतीतिवाप्रासादमंतरमभ्युक्ष्यमहाद्रव्येनिदर्भैरोल्लिख्या

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रराशेक्षमध्यायवर्द्धितायवेनचैशान्यां पंचरत्नोपरिपंचगव्यकषायजतोयमधुतीर्थोदकेनस्नापि
तां कूर्मशिलां न्यस्य तत्कूर्म्ने हैमं कूर्मं रत्नावन्यस्य तत्र ॥ ॐ नमो भगवति व्यापिनि स्थिरे अचले ध्रुवे ॥ ॐ
श्रीं लं ह्रां स्वाहा ॥ समेव परमाशक्तिस्त्वमेकासनधारिका शिला ॥ तथात्वया देवि स्थातव्या इह सर्व
देति मंत्राभ्यां पीठिकां निधाय ॥ ॐ तत्त्वाध्वने॰ पदाध्वने॰ वर्णाध्वने॰ मंत्राध्वने॰ कलाध्वनेनमः इति
संपूज्य तत्कूर्म्ने रत्नन्यासं कुर्यात ॥ मूर्त्तौ तु विशेषः ॥ पूर्वापरास्यप्रासादे सौम्यप्रनालां॰ दक्षोत्तरास्ये पूर्व
प्रनालां पीठिकां कृत्वा सूक्तेन न्यस्य ॥ श्रीश्वते ओंरींर्मि मायेत्यादि देवभार्या मंत्रेणासंपूज्य ॥ आत्मत
त्त्वाय॰ आत्मतत्त्वाधिपतये॰ क्रियाशक्तौ॰ विद्यातत्त्वाय॰ विद्यातत्त्वाधिपतये॰ ज्ञानशक्त्यै॰ शिवत
त्त्वाय॰ तदधिपतये॰ इच्छाशक्तौ ॥ मूर्त्तिमूर्त्तिपलोकपान्विन्यस्याधारशक्त्यैनमः अनंतासनायनमः इ
त्यादि वह्नितत्त्वांतपीठपूजां कृत्वा नवपीठशक्तिर्न्यस्य देवीमंत्रेणापीठिकां न्यस्य प्रार्थयेत ॥ सर्वदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मयीशानिर्वे लोकाह्लादकारिणि ॥ त्वां प्रतिष्ठापयाम्यत्र मंदिरे विश्वनिर्मिते ॥ यावच्चंद्रश्च सूर्यश्च यावद्दे
षा वसुंधरा ॥ तावत्वं देवि देवेशि मंदिरे स्मिन्स्थिरा भव ॥ पुत्रान्नायुष्यतो लक्ष्मीमज्वरामजरामृतं ॥ अभयं स
र्वभूतेभ्यः कर्त्तुनिर्मविधेहि भो ॥ विजयं भूपत्नेः सर्वलोकानां क्षेममेव च ॥ सुभिक्षं सर्वकालीनं कुरु देवि नः
नमो नमः ॥ ततो गर्ते ० ॐ नमः ॥ ॐ नम इत्यादि षोडशश्वरान् ॥ तत्रादि ० कं नम इत्यादिक्षांनान्तहलोन्त्यस्वरः
त्वन्यासं कुर्यात् ॥ समानत्वा क्रोयथा ॥ हीरकः मौक्तिक ० वैडूर्य ० शंख ० स्फटिक ० पुष्परागेन्द्र ० नील ० म
हानीलान् ॥ नालंवर्त्मनः शिलाप्रमणिनांजनसौराष्ट्रीकासीन्यस्त्वर्णमाक्षिकगैरिकाः ॥ गोधूमयवनि
ष्पमद्गनीवारश्यामाकतुशार्षपव्रीहीन् ॥ हिरतापरजमनताम्रायसत्रपुसीसकांस्यरीतिकाः ॥ चंदनरक्तचं
दनागरुकांजनोशीरविष्णुक्रांतासहदेवीलक्ष्मणाश्चेति ॥ रत्नाभावे वज्रं ॥ धात्वभावे हरितालं ॥ लोहाभा
वे सुवर्णं ॥ बीजाभावे यवान् ॥ औषध्यभावे सहदेवीं वा प्रतिद्रव्यं निक्षिपेन्मंत्रैः ॥ प्रणवाद्यैश्चतुर्थ्यन्तैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ग्र.कां॥ रिंद्राद्यादिनाममभिश्च॥ मंत्रात्मा॥ इन्द्रस्त्वमहसादीप्तः सर्वदेवाधिपो महान्॥ वज्रहस्तो महासत्वंतस्मैनि
त्यंनमोनमः॥ आग्नेयः पुरुषोरक्तः सर्वदेवमयोव्ययः॥ धूमकेतुरनाध्यक्षस्तस्मैनित्यंनमोनमः॥ यमश्चो
॥३०॥ त्पलवर्णाभः किरीटिदंडधृक्सदा॥ लोकसाक्षी विशुद्धात्मा नस्मैनित्यंनमोनमः॥ नैरृतस्तुपुमान्कृ
ष्णः सर्वरक्षोधिपो महान्॥ खड्गहस्तो महासत्वस्तस्मैनित्यंनमोनमः॥ वरुणः सर्वलोकेशः पुरुषोनि
30 म्नगाधिपः॥ पाशहस्तो महाबाहुस्तस्मैनित्यंनमोनमः॥ वायुश्च सर्ववर्णोयं सर्वगंधवहः शुचिः॥ पुरुषो
ध्वजहस्तश्च नस्मैनित्यंनमोनमः॥ गौरोयस्त्वपुमान्सोम्यः सर्वौषधिसमन्वितः॥ नक्षत्राधिपतिः सो
मस्तस्मैनित्यंनमोनमः॥ ईशानः पुरुषः शुक्लः सर्वदेवाधिपो महान्॥ शूलहस्तो विरूपाक्षस्तस्मैनि ॥राम॥
त्यंनमोनमः॥ नतोमध्येसर्वाशान्यसेन्मंत्राभ्यां॥ पद्मयोनिश्चतुर्मूर्त्तिर्वेदवासः पितामहः॥ यज्ञाध्यक्ष ॥३०॥
श्चतुर्वक्त्रस्तस्मैनित्यंनमोनमः॥ योसावनंतरूपेणाब्रह्मांडंसचराचरं॥ पुष्पवद्धारयेन्मूर्ध्नि तस्मैनित्यंनमो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमः॥ ततोन्यस्तानि रत्नादीनि मंत्रैः स्पृशेत॥ त्रातारमिंद्रं अग्निंदूतं यमाय सोमं अस्य पते निर्ऋते पंचनद्यः
तत्वायं सोमो धेनुं अभित्वा शूर ब्रह्मयज्ञानं नमो स्तु सर्पेभ्य इति॥ ततः कांचनं पद्मरागं पारदं
हेमं पद्मं कूर्मं पृथिवीमेरुं वाहनं नृषगरुडादींश्च न्यस्य गुग्गुलुरसं दत्वा पायसेन विलिप्यासितया
सस्ताच्छाद्य कवचेनावगुंठ्यास्त्रेण संरक्ष्य इंद्रस्त्वमहसेति पूर्वोक्तदशमंत्रैः पायसेन बलिं दत्वा
वमेत्॥ नारदपंचरात्रे तु॥ वज्रं च सूर्यकांतं च इंद्रनीलं तथैव च॥ तालमनः शिलां चान्नपिष्टं वै
कुंकुमं तथा॥ मध्येथ राजपाषाणां पारदं वाथ सर्वतः॥ गोधूमाश्चयवा धान्यं मुद्गमाषस्तथैव च
॥ वराटका मुनिश्रेष्ठ लकुलं त्वाक्षर मंतकं॥ क्रमादष्टसु विन्यस्य मध्ये सिद्धार्थकान्तिलान्॥ ह्री
वेरंजनी मांसं सहदेवी वचां तथा॥ विष्णुक्रांतां मांचनासोढां लोहमुक्ताफलानि च॥ एतेन पयसालि
प्ते जाविनेनपुरेण तु इन्दुकं॥ ततः प्रासादबहिरष्टदिक्षुस्थंडिलेषु वह्निसंस्थाप्येशाने कुंभान्संस्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥प्र॰का॥
॥३१॥

स्यात्प्यदेवस्यमूलेनाष्टशतमष्टाविंशतिर्वासपिधआज्यंचविलुगायव्यात्कृत्वाकुंभोदकेनास्रपा
त्रस्थंमूलेनशतमभिषिंच्यःक्षौद्रमितिनारसिंहेनदिव्यंधंकृत्वाप्रार्थयेत् ॥ इदंकृत्वाकृतं ॥ ॐ प्रभुः
ध्यस्वमहाभागदेवदेवजगत्पते ॥ मेघश्यामगदापाणोपद्मकमलेक्षण ॥ प्रभुश्चभूधरानंतवासु
देवनमोस्तुते ॥ इत्यष्टागमर्घंदत्वाविशेषतःतथाप्याननोदेवाइतिचुरर्धेतिष्टतिनिरथमारोप्यस्व
स्तिसूक्तेनप्रासादंप्रवेशयेत् ॥ इदंमूर्तीवेच ॥ ननोद्वारदेवंमध्यपर्यंकेनप्रार्थ्यऽदेवस्यत्वेत्यालभ्यात्र
वारन्त्रन्यासंकृत्वासुलग्नेपुराणाहमस्मित्युक्त्वाप्रतितिष्ठपरमेश्वरेतिपीठिकागर्भे॰ ॐ प्रधानपु
रुषोयावद्यावच्चंद्रदिवाकरौ ॥ तावत्त्वमनयाशक्त्यायुक्तोदेवस्थिरोभवेति ॥ ध्रुवाद्यौरितिवदे
वमवक्त्रंस्थापयित्वासुप्रतिष्ठितमस्तु ॥ स्थिरोभवशाश्वतीभवेत्युक्त्वादेवमस्तकेहस्तंदत्वाष्टस
हस्रमष्टशतंवामूलमंत्रंविश्वतश्चक्षुरेवंसामसूक्तरुद्राध्यायंचसर्वंजपेत् ॥ मूर्तौत्वन्यानपि

॥रामः॥
॥३१॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मंत्रान्नपेन ॥ यथा ॥ अतसीपुष्पसंकाशं शंखचक्रगदाधरं ॥ संस्थापयामि देवेशं देवो भूत्वा:
जनार्दनं ॥ ॥ इति विष्णोः ॥ त्र्यक्षरं शूलबाहुं च चंद्रार्द्धकृतशेखरं ॥ गणेशं वृषभस्थं च स्थापया
मि त्रिलोचनमिति ॥ शिवमूर्त्तेः ॥ सहस्रकिरणाशांतमप्सरोगणसेवितं ॥ पद्महस्तं महाबाहुं स्था
पयामि दिवाकरं ॥ इति सूर्यस्य ॥ वैदिकं च तन्त्रिगं जप्त्वा व्याहृतिशिरोयुतां ॥ गायत्रीं जपित्वा प्रा
णप्रतिष्ठां कुर्यात् सार्वयस्त्वपि मान्त्यान्येयवै विन्नमाद्ये नोक्ता ॥ तथापि प्रतिमायाः कपोलौ द्वौ
स्पृष्ट्वा दक्षिणपाणिना ॥ प्राणप्रतिष्ठां कुर्वीत तस्यां देवस्य वाहरे ॥ अकृतायां प्रतिष्ठायां प्राणाः
नां प्रतिमासु च ॥ यथापूर्वं तथा भावः स्वर्णादिना न विच्युता ॥ अन्येषामपि देवानां प्रतिमास्वपि मास्व
पि पार्थिव ॥ प्राणप्रतिष्ठा कर्त्तव्या तस्यां देवत्वसिद्धये ॥ वासुदेवस्य वीजेनन तद्विष्णोरित्येनेन
वा ॥ तथैव हृदयांगुष्ठं दत्त्वा सभ्यच्च मंत्रवित् ॥ प्राणप्रतिष्ठां कुर्वीत तस्य देवस्य वाहरे ॥ रिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालिकापुराणोक्तायांसायथा॥ प्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयऋग्यजुःसामानिछंदांसिक्रि
यावपुःप्राणाख्यादेवताआंबीजंक्रौंशक्तिःप्रतिष्ठायांविनियोगः॥ ततऋष्यादीन्क्रमेणशिरोमुख
हृदयगुह्यपादेषुविन्यस्यः ॐकंखंगंघंङंअंपृथिव्यप्तेजोवाय्वाकाशात्मनेआंहृदयायनमः॥ ॐचं
छंजंझंञंइंशब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा॥ ॐटंठंडंढंणं उंश्रोत्रत्वक्चक्षुर्जिह्वाघ्रा
णात्मनेऊंशिखायै॥ ॐतंथंदंधंनंएंवाक्पाणिपादपायूपस्थात्मनेऐंकवचायहुं॥ ॐपंफंबंभं
मंओंवचनादानविहरणोत्सर्गानंदात्मनेऔंनेत्रत्रयायवौषट्॥ ॐयंरंलंवंशंषंसंहंलंक्षंअंमनो
बुद्ध्यहंकारविज्ञानात्मनेअंःअस्त्रायफट्॥ एवमात्मनिदेवेचकृत्वादेवंस्पृष्ट्वाजपेत्॥ ॐआंह्रींक्रौंयं
रंलंवंशंषंसंहंसःदेवस्यप्राणाइहप्राणाः ॐआंहंसःदेवस्यजीवइहस्थितः॥ ॐआंदेवस्यसर्वेन्द्रि
याणि॥ ॐआंहंसःदेवस्यवाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाइहागत्यस्वस्तयेसुखेनसुचिरंतिष्ठंतुस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हेति ॥ ततोर्चां हृद्यं गृह्णंदत्वा जपेत् ॥ अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरंतु च ० अस्यै देवत्वमर्चा
यै स्वाहेति यजुरीयते ॥ ततः प्राणावेन संरुध्य सजीवं ध्यात्वा कृत्वा द्योरिति त्र्यंबकं जप्त्वा ककरोंगायत्रीं
देवमंत्रं च जप्त्वा पुरुषसूक्तेनोपस्थायादिनाभिशिरस्तु स्पृष्ट्वा इहैवैधीति त्रिर्जपेत् ॥ ततः ॐ नमस्ते ः
न्यक्तसंगाय संतोषपरमात्मने ॥ ज्ञानविज्ञानरूपाय ब्रह्मतेजोनुशालिने ॥ गुणातिक्रांतवेगाय पु
रुषाय महात्मने ॥ अव्यक्ताय पुराणाय विष्णोः सन्निहितो भव ॥ भगवन्देवदेवेश त्वं माता सर्वदेहि
नां ॥ त्वया व्याप्तमिदं सर्वं जगत्स्थावरजंगमं ॥ त्वमिंद्रः पावकश्चैव यमो निरृतिरेव च ॥ वरुणो मारु
तः सोमः ईशानश्चरव्यय ॥ येन रूपेण भगवत्त्वया व्याप्तं चराचरं ॥ तेन रूपेण देवेश अर्चायां सन्निधो भ
व ॥ सर्वमंत्रादिसंयुक्तो लोकानुग्रहकाम्यया ॥ अत्रार्चायां महादेव भव सन्निधिमान्सदा ॥ सूर्याचंद्रम
सौ यावद्यावत्तिष्ठति मेदिनी ॥ तावत्त्वया वदेवेश स्थातव्यं स्वेच्छया प्रभो ॥ यावच्चंद्रोयमः सूर्यस्तिष्ठं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र॰का॥ निष्प्रतियालिनः॥ नाव दर्वैनुदे वेश्मस्थ्यं सर्वांग कं पयेत्नि मूर्त्तिमभिस्पृशेत्॥ ततः स्थाप्य देवप्रधानं कृत्वा
॥३२॥ ०नंदिमहाकालं वृषभं गिरिस्विस्कंदोमा विनायक विष्णु ब्रह्म रुद्र जयेन्नेशादिलोकपालाष्टकाप्सरोग
णागंधर्वगुह्यकविद्याधरादीन्परिवाराहयेत्॥ योयत्रस्थाप्यते देवस्तस्यैनान्परितः स्मरेत्॥ इति मास्था
33 न॥ ततः पूर्वेकुंडे हृदयमंत्रेणाज्यं विंशतिर्जुहुयात्॥ दक्षिणे शिरसा पश्चिमे शिखया। उत्तरे कवचेनः आ
ग्नेयकुंडे नेत्रेणः पुनः पूर्वे स्त्रेणः मूलेनैशानेः ततः प्रार्थयेत्॥ लोकान्नयहहेत्वर्थं स्थिरो भव सुखाय नमः
सान्निध्यं हि सदा देव प्रत्यहं परिवर्त्तय॥ मा भूत्प्रजा विरोधोत्र तस्मिन्यजमानः समृध्यतां॥ संपालयन्न थारा
ष्ट्रं सर्वोपद्रववर्जितं॥ राजा च वृद्धिमतुलां सुखमक्षय्यमश्नुतां॥ ततः सांगं संपूज्य प्रासादं प्ररूपाकृतं ध्या ॥राम॥
त्वा गंधाद्यैः संपूज्य सूत्रेणा वाससा वा वेष्ट्य ०वा ग्रह दुर्गाकुणीन्द्रारा गंगा ज्ञात्स्वस्व च मारस्ते॥ यथोमाः ॥३२॥
स्कंदसोमगनासोमैशानी शिवस्य तु॥ द्वारस्य दक्षिणो वा स्ये कमा है थ वरा प्रियो रिपुस्कं दिव्यं गणपति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मा: संस्थाप्य प्रासादाग्ने वृषं गरुडादिवाहनं संस्थाप्य ॥ प्रासादोत्तरे तन्त्रमसोमसूत्राग्ने गंगे कृत्वा तत्र कू
र्मी कृतिं शिलां ध्रुवाद्योरि ति संस्थाप्य ष्टृशानमष्टार्विशतिं वाज्यं जुहुयात् ॥ ततः कर्त्ता स्वागतं देवदेवेश सम्
म्प्राप्तान्मिहागत: ॥ प्राकृतं त्वं मदृष्ट्वा मां बालवत्परिपालय ॥ धर्मार्थकामसिध्यर्थं स्थिरो भव शुभाय न: ॥ सा
न्निध्यं तु सदा देव स्वार्चायां परिकल्पय ॥ यावच्चन्द्रावनी सूर्यास्तिष्ठंत्यप्रतिघातिन: ॥ तावत्त्वयात्र देवेश स्थेयं
भक्तानुकंपया ॥ भगवन्देवदेवेश त्वं पिता सर्वदेहिनां ॥ येन रूपेण भगवंस्त्वया व्याप्तं चराचरं तेन रूपेण देवे
श स्वार्चायां सन्निधो भवेति न मे दिनि केचित् ॥ ॥ अथ महापूजा मान्स्पोक्ता ॥ ॥ तत्र शिवे आवाहनमंत्र:
यस्य सिंहा रथे युक्ता व्याघ्राभूतास्तथोरगा: ॥ वृषयो लोकपालाश्च देव: स्कंदस्तथा नृप: ॥ प्रियागणा मा
तरश्च सोमो विष्णु: पितामह: ॥ नागा यथा: सगंधर्वा यच्च दिव्या नभश्चरा: ॥ तमहं त्र्यक्षमीशानं शिवं रुद्रमु:
मापतिं ॥ आवाहयामि सगणां सपत्नीकं वृषध्वजमिति ॥ आगच्छ भगवन्रुद्रानुग्रहाय शिवो भव ॥ साध्व:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ त्र॰का ॥ तो भव पूजां मे गृहाण त्वं नमो नमः ॥ ॐ नमः स्वागतमस्तु स्वागतं भगवते नमो नमः ॥ सोमाय सगणाय स-
परिवाराय उनिगृह्णातु भगवान्मंत्रपूतमिदमर्घ्यपाद्यमिदमाचमनीयं च पाद्यासनं तु स्वरणाभिर्हितेन
॥ ३४ ॥ मः स्वाहेति ॥ आगच्छेत्यादि स्वाहान्तः सोमाय पदवर्जितः सर्ववदेवसाधारणाः ॥ अनेन मूलेन विष्टरार्घ्यपा-
द्याचमनीयानि उपगपन्निवेद्य स्नपयेत् दधिक्राव्णः दध्ना ॥ आप्यायस्व क्षीरेण घृतेन ॥ मधुवातेति म-
34 धुना ॥ आयङ्गौः शर्करया ॥ प्रत्येकं च गंधोदकेन ॥ तत्र औषधीः प्रतिमोदध्वमिति पुष्पोदकेन ॥ गंधद्वा-
रां गंधोदकेन ॥ तंस्नवोदकेनचाभिषिंच्य संपूज्य यज्ञाग्रतः ॥ ततो विराडजायत ॥ सहस्रशीर्षा ॥ अभि-
त्वाशूर ॥ पुरुष एवेदं ॥ त्रिपादूर्ध्व ॥ येनेदं भूतं ॥ नत्वावान् ॥ अन्य इन्येतान्सर्वप्रतिष्ठाप्य च तुर्थीरं ज- ॥ राम ॥
पेत् ॥ प्रतिपर्यायं देवस्य पादेनाभिं वक्षः शिरश्चाद्भिः स्पृष्टोत्तः ॥ वौधायनसूत्रेत्वन्याविशेषः ॥ लिंगे- ॥ ३४ ॥
वीयां वा ॥ ॐ भूः पुरुषमावाहयामि ॥ ॐ भुवः ॥ ॐ सुवः ॥ ॐ भूर्भुवःसुवः ॥ यामीत्यावाह्य प्रणवेनासनं दः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्वानेनैव दूर्व्वाङ्कुरमाकविष्णुक्रांतापद्मश्रियंपाद्यं ॥ इदमापः शिवनमाः पूताः पूतनमामेध्यामेध्यत
मा अमृता अमृतरसाः पाद्यास्ताजुषतां प्रतिगृह्यतां प्रतिगृह्णातु भगवन्मम विष्णो विष्णवे नम इति पाद्यं ॥ मह
देवो रुद्राय नम इति लिंगे ॥ इमा आपः आचमनीयास्ताजुषतामित्याचमनीयं ः अर्घ्योइत्यावेदमंत्रैः संस्नाप्य
दं विष्णुरिति विष्णो ॥ नमोस्तु नीलग्रीवायेति लिंगे प्रतिसरं विश्वस्य मूलेन वस्त्रोपवीते दत्वा ॥ इमे गंधाः
शुभा दिव्याः सर्वगंधैरलंकृताः ॥ पूता ब्रह्मापवित्रेणा पूताः सूर्यस्य रश्मिभिः ॥ पूता इत्यादिना गंध ॥ इमे
माल्याः शुभादिव्याः सर्वमाल्यैरलंकृताः ॥ पूतामाल्यं इमे पुष्पा इति पुष्पं ॥ वनस्पतिरसो धूपो गंधाढ्यो ग
धउत्तमः ॥ आघ्रायः सर्वभूतानां धूपोयं प्रतिगृह्यतां प्रतिगृह्णात्वित्यादि धूपं ॥ ज्योतिः शुक्रं वा तेजः
श्च देवानां सततं प्रियं ॥ प्रभाकरः सर्वभूतानां दीपोयं प्रतिगृह्यतामिति दत्वा विष्णो संकर्षणादि द्वादशना
मभिः समर्पितैरेवनदर्प्पणांकृत्वा पायसगुडोदनचित्रोदनानि पवित्रेणेति निवेद्य कृसरं द्वादशनाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र॰का॥ भिर्हुत्वानेनैव शार्ङ्गिरोग्निये सरस्वत्यै विष्णवे इति हुत्वा॥ विष्णोर्नुकं: सदस्पतिप्रियं: प्रनविष्णु: परोमा
॥३५॥ त्रया: विचक्रमे त्रिर्देव इति ज्हुयात्॥ लिंगेरुद्रीपानं कृत्वा॰ भवाय देवाय॰ शर्वाय॰ ईशानाय॰ पशुप
तये॰ रुद्राय॰ उग्राय॰ भीमाय॰ महते देवाय नम इति पुष्पाणि दत्वा नैरेवनर्पणं कृत्वा॰ पवित्रेनेइति
पायसं गुडोदनं च निवे॰ पूर्वोक्तनामभि: क्रमशः हुत्वा॰ भवस्य देवस्य पत्न्यै स्वाहेत्यादि ष्ट भिर्गुडोदनं हुत्वा
35 ॰भवस्य देवस्य सुताय स्वाहेत्यादिभि हरिद्रोदनं हुत्वा॰ त्र्यंबकं: मानो महान्तं मानस्तोके: आयानं गो घ्रं विकि
रिद्र विलोहितं नासहस्राणि सहस्रस इति द्वादश॥ एतेर्हुत्वा शिवाय॰ शंकराय॰ सहमानाय॰ शितिकं
ठाय॰ कपर्दिने॰ ताम्राय॰ अरुणाय॰ अपगुरमाणाय॰ हिरण्यबाहवे॰ सष्पिञ्जराय॰ बभ्लुशाय॰ हि ॥रामः॥
रण्याय इति ज्हुयात्॥ ततआचमनीयफलतांबूलदक्षिणानीराजनस्वर्णपुष्पपुष्पांजलिप्रदक्षिणानम: ॥३५॥
स्कारान्निवेद्य॥ लिंगं प्रार्थयेत॥ भगवन्देवदेवेश धर्मकामार्थमोक्षद॥ विद्याविद्येश्वरेरुद्रेर्गिरीशे:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकपालकैः ॥ देवदानवगंधर्वैर्यक्षैश्च किन्नरैः सह ॥ अस्मिंल्लिंगे महादेव सर्वदा वसवेः प्रभो ॥ ॐ मामन्त्रः
ग्रहार्थाय पृथिव्यां स्वेच्छया प्रभो ॥ परावरेणभावेन स्थानत्वं सर्वदालया ॥ सर्वविघ्नहरः ॐ क्षां सर्वडःस्वहरः
सदा ॥ सर्वदा यजमानस्य इच्छासंपत्करो भव ॥ नमस्ते सर्वधर्माय संतोषविजितात्मने ॥ ज्ञानविज्ञानतृप्ता
य ब्रह्मणे ज्ञोभिशालिने ॥ नमस्ते शुद्धदेहाय पुरुषाय महात्मने ॥ स्थापकस्य मूर्त्तिपानां शिल्पिनां च विभो
सदा ॥ ग्रामदेशनृपाणां च शांतिर्भवतु सर्वदा ॥ पूजकाराधकानां च भक्तानां भक्तवत्सल ॥ सर्वेषां च जग
त्ताथ इच्छासिद्धिर्भवतु प्रभो ॥ चंद्रार्कावनिपर्यन्तं लिंगेस्मिन्परमेश्वर ॥ स्थानत्वं मयार्द्ध सर्वलोकानुकं
पया ॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ तावत्त्वयात्र देवेश स्थानत्वं स्वेच्छया प्रभो ॥ ज्ञानतो
ज्ञानतो वापि भगवन्यत्कृतं मया ॥ तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वरेति ॥ विस्मोतु ॥ ज्ञानतो
ज्ञानतो वापि यावान्विधिरनुष्ठितः ॥ स सर्वस्त्वत्प्रसादेन सम्यग्भवतु मम ॥ ज्ञानतोऽज्ञानतो वा:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ प्र॰का ॥ पिशाचोक्तं नक्तं हि यत् ॥ तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाद् द्विजोत्तम ॥ ततः कर्त्ता स्वनामयुक्तं देवस्य

॥ ३६ ॥ नाम कुर्यात् ॥ ततः सत्कृत्याचार्यो विप्रैरैशान्ये भद्रासने यजमानं पुत्रपौत्रादियुतं सर्वौषधीलि

प्तांगं कलशोदकैः समुद्रज्येष्ठाद्यैः सुरास्त्वेत्याद्यैश्चाभिषिंचेत् ॥ ॥ अथ दक्षिणा ॥ ॥ कल्पत

36 रोभविष्ये ॥ हस्त्यश्वरथवर्यैश्च गोभूमिरजतादिभिः ॥ सहस्रदक्षिणाभिश्च पूजयेद्विधिवद्गुरुं ॥

अशक्तो तत्रैव ॥ ईभमंमंदलं दद्यादश्वं वा हेमभूषितं ॥ ग्रामं वापि सुनिष्पन्नं येन वा तुष्यते गुरुः ॥ ॥

कर्त्ताचार्यं पत्नीगर्न्नेव चतुरस्रे पीठे वस्त्रोपच्छपवेश्य ० विष्टर पाद्यार्घाचमनीयवासोयुगभूषणगंधपुष्पै

रभ्यर्च्य देशकालौ स्मृत्वा ० कृतैतत्प्रासादामुकदेवप्रतिष्ठायाः संपूर्णतासिद्ध्यर्थं ग्रामाश्वदासीदा ॥ राम ॥

सपञ्जनचामरछत्रवितानयानासनशय्यासनवस्त्राद्युपेतं गोसहस्रं तदर्द्धं तदर्द्धं तदर्द्धं वा ॥ ३६ ॥

वृषभैकादशगाः पंचैकां वा गाममुकगोत्रायामुकशर्मणेऽहं तुभ्यं दक्षिणां संप्रददे इति सहेमजलं तद्धः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोक्षिप्नाप्रार्थयेत ॥ भगवन्सर्वधर्मज्ञ शिवधर्मपरायणः ॥ सर्वशास्त्रार्थतत्वज्ञ शिवशास्त्रविशारद
॥ अनादिजन्मसन्तानेष्वप्रमेये भवार्णवे ॥ अद्य मे सुफलं जन्म अद्य मे सफलं धनं ॥ अद्य मे जननो छिन्ने
र अद्य मे परमं पदं ॥ मोचितो हं त्वया नाथ दुश्छेद्याद्भवबंधनात् ॥ संश्रितो हं त्वया तस्मादप्रमेयाद्भवार्णवा
त् ॥ भक्तो हं मद्भ्यसंसारात्म्रपन्नो हं भवांतिकं ॥ ज्ञानतो ज्ञानतो वापि यत्मूनं चेत्मयाकृतं ॥ तत्सर्वं पूर्ण
मेवास्तु त्वत्प्रसादात्क्षमस्व मे इति ॥ ततः आचार्यः फलाक्षतानादाय • समस्तजगदुत्पत्तिस्थित्यनुग्रह
कारकः ॥ शिवः सानुचरः साक्षात् सर्वदा सर्वकामदः ॥ ऽत्महीनन्तु यत्किंचिद्विधिहीनञ्च यन्कवितं ॥ तत्सर्वं
पूर्णमेवास्तु प्रासादत्कारणात्मनः ॥ स्थापकस्य मूर्त्तिपानां वणिनां शिल्पिनां तथा ॥ सराष्ट्रपार्थि
वानां च शान्तिर्भवतु सर्वदा ॥ भूम्यप्रचकलत्रेष्वस्वमित्रैर्वधुबाहनै ॥ कारणस्य प्रासादेन सर्वलोकेष्व
रोगं भवेत्माशिषं दद्यात् ॥ ततः सम्मृत्तिगाचार्यः समस्तजगदुत्पत्तीत्माशिषं दद्यात् ॥ ततः कर्त्ता भगव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र.का॥ न्तर्वधर्मज्ञसर्वधर्मप्रकाशक ॥ अद्य मे सफलं जन्म यन्मां सारमहारोचान् ॥ उद्धृतो भवनान्नाथ केशिनः
॥३०॥ स्त्वं क्षमस्व मेऽद्य जिनेमेन ॥ ततः स्वपत्न्यादीन्संपूज्य देवसमीपे देशकालौ संकीर्त्य · इमं शिवादिनिर्मितं च:
लभीप्राकारगोपुरपादघंटावितानध्वजपताकाघंटाकृतमंगदेवतालयपुतं प्रासादं तन्न देवतालोककामः
कुलद्वयोद्धरणार्थं ममकदेवप्रीतये हमुत्सृजामीति प्रासादमुत्सृजेत् ॥ अत्र संकल्पोक्तफलो लेखोपिकाः
३२ र्यः ॥ ततो गुरुर्दिक्पालेभ्यो बलीन्दत्वा दिनत्रयं पास्थोप स्नादि विश्वकर्मा तेभ्यः स्थापदेवाय समिध आज्य
चरु स्वकुंडेषु वह्निर्जोजुहुयुः ॥ चतुर्थ दिने होमान्ते ब्रह्मसरोपूर्णपात्रं दत्वा क्षविज स्वस्वशाखीयं कर्मशेषं स
मापयेयुः ॥ ततो लिंगं संपूज्य विमूर्तिधृत्वा ० महत्संज्ञातेन दर्धं वा वासरणात्मं भोज्याशिषो गृहीत्वोपान ॥ ततः प्रथ ॥राम:॥
मे ह्निमधुकं कुमाज्ज्ये देवं लिप्त्वा गंधाद्यैः पूजयेत् ॥ द्वितीये हरिद्राद्यर्पपाज्ज्येः ॥ तृतीयेचंदनयवपिष्टाज्येन ॥ ॥३०॥
चतुर्थ मनःशिलात्रियं न्वाज्ज्येः ॥ पंचमे कस्तूरीजननिलाज्ज्ये ॥ षष्ठे रक्तचंदनपद्मकेशराज्ये: ॥ सप्तमे गोरोचन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नागकेशराज्यै: ॥ सद्यः पक्षे सर्वैरेतद्देव ॥ ॥ इति कमलाकरभट्टकृतः प्रासाददेवप्रतिष्ठाविधिः ॥
॥ ॥ अथ चतुर्थिकर्म ॥ ॥ कर्त्रा द्वितीये चतुर्थे वाह्नि प्रतिष्ठांगं चतुर्थीकर्म करिष्ये इति संकल्प्य कल
शोषदिक्पालादिपूजां प्राग्वत्कृत्वा कुंडे ऽग्निं प्रतिष्ठाप्य नदीशानेकुंभे देवं संपूज्य स्याप्य देवस्य प्रासा
दमात्रे वा स्नापयित्वा देवस्य चरुं हुत्वाज्यभागांते सप्रणवव्याहृतिभिस्तिलआज्याहुतीर्हुत्वा ॐ फडिति
जलेनाभिमंत्रितेनाग्निं संप्रोक्ष्य गायत्र्या सवित्रे पंच दद्याहुतीर्हुत्वा भूर्भुवः स्वः महः जनः स्वाहेति पंचाहुती
र्हुत्वा भूर्भुवः स्वाहेत्येकां हुत्वा सद्योजातं प्रपद्यामीति पंचभिः प्रत्येकं ईशानेत्येवं सहस्राहुतीर्हुत्वान्यदे
वेभ्यस्तन्मंत्रेणाहुत्वा ऽऽज्येन त्रिलयदैवेश्वशानपत्नीमंत्रेणा च प्रत्येकं शतं हुत्वा पूर्णाहुत्यादिकर्म समापये
त् ॥ मूर्तिजोप्येवं स्वस्वकुंडे ॥ ततः सर्वकुंडेषु प्रश्नैः संपातोदकैर्देवं तन्मंत्रेणाभिषिच्य महापूजां कृत्वा हिर
ण्यं दक्षिणां दद्यात् यजमानस्याभिषेकांते ग्रहान्संपूज्य विसर्जयेत् ॥ चतुर्थीकर्माशक्तौ मात्स्योक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महास्नानं वा कुर्यादिति त्रिविक्रमः ॥ द्वयोः समुच्चय इति हेमाद्रिः ॥ कल्पतरुस्तु । तद्यथा मूलेनास्नानं पाद्यं
वदनाद्यर्थ्यक्षतकुशक्षीरदूर्वायवमधुसिद्धार्थपुष्पफलयुतं समङ्कं चेदमर्थ्यं निवेदयेत् । गङ्गाश्वरथ्या
वल्मीकवराहोत्खातनागागारतीर्थह्रदगोष्ठमृदः कुंभेषु क्षिप्त्वा । शन्नोदेवीरापोहिष्ठेति तिसृभिस्त्वापूर्य
पंचनद्य इति मंत्रवता पंचगव्येन । दधिक्राव्णः दध्ना । आप्यायस्व दुग्धेन । तेजोसीति घृतेन । मधुवाः
तेति मधुना । स्वरसस्त्विमे घृज्येनेति पुष्पोदकेन । हिरण्यपावक्ष इति रत्नोदकेन । देवस्यत्वेति कुशोदकेन ।
अन्नआयाहीति फलोदकेन । गन्धविजुरिति गंधोदकेन ॥ ओंषधीः प्रतिमोदध्वमिति महद्देवीव्याघ्रीवला
तिवलाशंखपुष्पीवचासिंहीसुवर्चलीदकेन । या ओंषधीरिति यवगोधूमनीवारतिलश्यामाकशा
लिप्रियंगुव्रीहिकुंभोदकेन । समुद्रज्येष्ठाः शुद्धोदकेन च सोःपवित्रं सहस्रधारेण ॥ ततः सहस्रं तदर्धीः
र्धीश्मोतरत्नं च तुषष्ठिद्वात्रिंशत्षोडशाष्टचतुःसंख्यैर्धातुजैर्मृण्मयैर्वा पंचपत्रपुष्पगंधाक्षतफलयु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैरुष्टनीति क्षिप्तमृत्तिकैः कुंभैस्तम्भैत्रैरगानूर्म्मींवा स्नापयेन॥ नमोमृदा गोमयेन वा कृतैः स्वस्तिकंपमशं

खोन्मलकलशश्रीवत्सदर्प्पणानंद्यावर्त्तैः सपुष्पाक्षतैर्वैद्यपात्रस्यैर्देवं स्वस्तिनइमितिनीराज्यं॥ अंधस्याः

न्धो वो भक्षीयेति पंचवर्णानैराक्रम्येनेति पंचवर्णाचित्रैश्चनीराज्यमुंचंतु मापन्थादितिकोनु कविमस्यः पं

चनद्य इति वस्त्रेणापरिमृज्य· मंदाकिन्यास्तु यद्वारि सर्व्वपापहरंशुभं· तदिदं कल्पितं देव सम्यगाचम्यतां त्व

येत्याचमनीयं दत्वा· वेदसूक्तसमायुक्ते यज्ञसामसमन्विते· सर्व्ववर्णप्रदे देववाससी ते विनिर्मिते इति वाससो गं·

शरीरं ते न जानामि चेष्टां नैव च नैव च· मया निवेदितं भक्त्या चंदनं प्रतिगृह्यतामिति चंदनं· मणिमुक्ताप्रवालाद्यैः

स्वर्णपुष्पैर्म्मया कृता· पूजा तु देवदेवेश प्रसादं कुरु नस्तथेति पुष्पाणि· वनस्पतिरसो दिव्यो इति धूपं· त्वं

चंद्रसूर्य्यरविर्व्विद्युत्त्वं रत्नानिकृताशनः॥ त्वमेव सर्व्वज्योतींषि दीपोयं प्रतिगृह्यतामित्यंशीतिवर्त्तारि

शक्तादीपान्‌॰ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं· भक्ष्यभोज्यसमायुक्तं नैवेद्यं· सम्भूपाययेनमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र·का॥ इतिभूषणानिः होमंकृत्वानिवेद्यप्रार्थयेत·यन्मयाभक्तियुक्तेनपत्रंपुष्पंफलंजलंकृत्वावेदितंचनैः
॥३९॥ वेद्यंतद्गृहाणानुकंपया·मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन·यत्पूजितंःततअष्टोत्तरसहस्रंमूले
नघृतंकृत्वांगानांदशांशेनकृत्वापूर्णाहुतींकृत्वाःस्वस्तिवाच्यदिगीशेभ्योबलिंदक्षिणांचदत्वाविप्रा
39 न्भोजयेत॥ ॥इतिचतुर्थीकर्म॥ ॥अथशैवपंडप्रतिष्ठा॥ ॥तद्दिने ऐशान्यांप्रासादांतर्वेदिः
वीपीठेमूर्त्तौवाः ॐचंडासनायनमः चंडमूर्त्तयेनमः धतश्चंडेश्वरायहुंफट्स्वाहेत्यावाह्य·ॐचंडहृदया
यहुंफट्नमः॥ एवंचंडशिरसेहुं ॐचंडशिखायैहुं·ॐचंडकवचायहुं·ॐचंडास्त्रायहुं·ॐचोंडशा
यहुं·एवंपंचांगंकृत्वा·रुद्राग्नेःप्रभवंचंडंकज्वालाभंभयानकं·शूलदंडधरंसौम्यंचतुर्वक्त्रंचतुर्भुजं·मुः
खोद्गीर्णमहाज्वालंरक्तवादशलोचनं·जटामुकुटसवराद्धंडुमरिउत्तफणिकंकणं·व्यालयज्ञोपवीतंच ॥राम॥
साक्षसूत्रकमंडलुं·स्वेनपद्मासनासीनंभक्तिप्रह्वार्त्तिनाशनमितिध्यात्वासंपूज्यप्रार्थयेत·ज्ञानतो ॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानतो वापि यन्न्यूनमधिकं कृतं। तत्सर्वं पूर्णमेवास्तु सुप्रीतो भव सर्वदा। सर्वमेतन्नक्रियाकाण्डं मया यद्वं-
न वाज्ञया। न्यूनाधिकं कृतं मोहात्परिपूर्णं तदस्तु मे। यावत्तिष्ठति लोकेस्मिन्देवदेवो महेश्वर॥ तावत्का-
लं त्वया देव स्थातव्यं नवः सन्निधौः। लेह्यचोष्यादिपानादिताम्बूलस्रग्विलेपनं। निर्माल्यं भोजनं तुभ्यं प्रद-
त्तं तु शिवाज्ञयेति। ततो दिक्पालानां भूतेभ्यो वलिं दत्वा प्रार्थयेत्॥ यावत्कालं महादेवो लिंगमाश्रित्य ति-
ष्ठति॥ तावत्कालं तु रक्षार्थं यूयं तिष्ठत सर्वदा॥ एतत्तु चिन्नकार्यं॥ नडूकमासेये। वाणलिंगे चले लोः
हे सिद्धलिंगे स्वयंभुवि॥ प्रतिमासु च सर्वासु न चंडोधिकृतो भवेत्। तत आचार्यः कर्मेशं समाप्य स
परिवारं यजमानं देवस्य त्वेति यश्च से भिषिंचामीति शन्नो देवीराथर्वणसाम्ना। सुरास्त्वेति वाभिषि-
चेत्॥ ततः कर्त्ता तीर्थे च भूतस्नान आचार्यं पूर्ववत्सं पूज्य। हिरण्यं गांवं दक्षिणां दत्वा भगवन्सर्वधर्मज्ञेतिमं
प्रार्थ्य। तत आचार्यः समस्तजगदुत्पत्तीत्यनेनाशिषं दद्यात्॥ ततः कर्त्ता ऋत्विग्भ्योऽन्येभ्यश्च दक्षिणां दत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥पृ.का॥
॥४०॥
40

क्षमाप्य विप्रान्संभोज्य कर्मेश्वरार्पणं कुर्य्यात्॥ ॥इति वेदप्रतिष्ठा॥ ॥अथ ध्वजारोपः॥ कल्प
तरौ देवीपुराणे॥ ध्वजदण्डः शुभः कार्य आयामपरिणाहतः। दशहस्तो ध्वजः कार्यो भूमेरूर्ध्वं विलम्बितः। हे
मकिङ्किणिशोभाढ्यो लाङ्गूलैश्चामरादिभिः॥ प्रतिष्ठाविधिमाश्रित्य होमं दानं च कारयेत्। वाटंकश्च ध्व
जो देयो विचित्रः किङ्किणीयुतः। दर्प्पणं चामरं घण्टां हयं दद्यात्तु दृश्वगः। अस्याभिमं त्रिणो देयो ध्वजो दण्डः
क्ष्माहीगतः॥ शिवे प्येवं ध्वजो देयो विष्णोर्विरूपदम्यसेन्। चक्रं वानेन विधिनारोपणीयं शुभावहं। तन्त्रैव मः
विष्णे। अष्टहस्तप्रमाणस्त्रिंशाद्दृश्च प्रमाणतः॥ सामान्यो ध्वजदण्डस्तु सर्वसाधारणो मतः। तथा ह
स्तात्द्विद्विवृध्या विंशत्यन्तादशतत्त्वे वोक्तः सचतद्दिने कलशारोपदिने षण्मासे वर्षे वा कार्यः॥ ध्वजः
श्वेताभ्रसदृशमाद्यौ वा षोडशाहेन तद्द्विगुणेन वा विस्तृतः। ध्वजदण्डश्चतुर्हस्तो नवहस्तो वा। कर्त्रा संकल्प्य। मं
डपपूजादि सर्वं पूर्ववत्कृत्वा काशीनिर्द्धारैः पूर्ववत् ध्वजस्तम्भदण्डहेमदेववाहनं च संस्थाप्य। नेत्रोन्मील

॥रामः॥
॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं कृत्वा हेमांते मं३पे वेद्यां गंधाद्यर्विनं दंडं कांस्यपात्रेन दत्त्वं वाधिवासमयेत्‌· देवप्रतिष्ठायां देवेनसह
प्रासादेनवासहाधिवासयेत्‌· ततःसहस्रप्रयोगः॥ ततआत्मन न्यायस्तं मे· विद्यान न्यायनमदंडे शि
वनन्यायनमः ध्वजे· सद्योजातं· वामदेवं· अघोरं· तत्पुरुषं· ईशानं· वंदे सांगं शिवं ध्वजे निवेश्य· पला
शोदुम्बराश्वत्थशम्यपामार्गदधिक्षीरघृततिले र्देवमंत्रेणाथ्या हुतिमिश्चकृत्वा मूर्तिमूर्तिपलोकपा
लेभ्यो कृत्वा दिग्बलिं दत्त्वा नानाशकं बलिं दत्त्वा जागरणं कुर्यात्‌ प्रातः शिखरस्य· पश्चिमे आग्नेयवज्जे
कोणेषु वास्तं भाधारं कृत्वा रत्नादिन्यासं कृत्वा· ध्वजदंडं अनुनिष्ठेत्‌ तस्याप्य दंडं षडंगानि ध्वजे लोकपालान्म
स्य· शांतिं रक्ष· शिवं चास्त्र स्थानस्य च शुभं तथा· प्राणिनः सुखिनः सन्तु राजा च विजयी भवेत्‌· याव
चंद्रश्च सूर्यश्च तावदत्रास्थिरो भव· दुरितयन्त्रमस्तानां सन्निक्रिया याध्कनो नु सा प्रजा हानिश्च दुर्भि
क्षं मा भूज्जगंनि सर्वदा· त्वत्प्रसादात्तु नन्सर्वं शुभमेव नमो नमः॥ इति स्थापयित्वा॥ ॐप्रस्फुरद्घो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ प्र·का ॥ रुतेरजुरुपचट२ प्रवट२ कहूर नमः२ घातय२ हुं फट् अस्त्राय नमः इति संपूज्य · शैवे अघोरं · पाशुपतं वा ·
॥ ४१ ॥ सूर्यकोटिप्रतीकाशं प्रलयांबुदनिस्वनं · प्रदीप्तदहनं प्रांतं प्रकाशमरवकंदरं · त्र्यक्षं नरिस्त्रयताजिह्वं
प्रदीप्तहस्मश्रमूर्धजं · सर्पोपवीतिनं शूलखड्गशक्तिमुद्गरधारिणं चतुर्भुजं चतुर्वक्त्रं स्फुरद्दंष्ट्राद्रिशेखरः
रं · देवदानवदैत्यानां दर्पितानां विनाशकम् इति ध्यात्वा संपूज्य · ॐ परमेश्वराय ब्रह्मशिरसे नमः ॐ
42 सर्वयोगाधिकृताय पतिस्थाधिपतये नमः ॥ विद्याधिपतये गंध · योनिरूपायै रुद्राण्यै नमः · क्षिपं गोष्ठेपु
रुद्रताय नमः · शैवे वा · ॐ प्रथ २ पाशुपताय नमः · हुं फट् इति संपूज्य नमेत् ॥ ततो ध्वजा मे · देवस्याकार
नं विष्णोर्गरुडं शिवे वृषं · गणेशे मूषकं सूर्ये धर्मः · दुर्गायां सिंहं · इत्येवं हैमं राजतं ताम्रं वा लिखितं वा कृ ॥ राम ॥
त्वा प्रतिष्ठाप्य पूजयेत् ॥ ततः ऐशान्ये कुंभं न्यस्य महाध्वजालं वा मानं प्रासादं वेष्टनार्हं वस्त्रयुगं गृहीत्वाय ॥ ४१ ॥
जमानः सकुटुंब · प्रासादं वेष्टयेत् · तत्तंतुसंख्यां संख्यसहस्त्रभोगफलं ॥ ततः कर्मशेषं समाप्य कृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिषेकोयजमानस्याचार्यादिभ्योदक्षिणांदत्वाविप्रान्संभोज्यकर्मेश्वरार्पणंकुर्यात्॥ ॥अग्निपुरा
णे॥ वंशजःशालजोदीर्घःसाध्वरःसर्वकामदःअयमारोप्यमाणस्तुभग्नमायातिवायदिःराज्ञोऽनिष्टंवि
जानीयाद्यजमानस्यवैतथा॥ मंत्रेणवरुणरूपेणपूर्ववद्दंतिमाचरेत्ःअघोरेणास्त्रनश्रर्षेषेत्तिलैश्च
जुहुयादित्यर्थः॥ कल्पतरौभविष्ये याववन्नक्षीयतेस्कंधजःप्रासादमूर्द्धनिःतावन्नभवतिश्रेयः
प्रासादेयद्दवाप्यते॥ ॥इतिकमलाकरभट्टकृतेपूर्त्तकमलाकरेध्वजोन्नयः॥ ॥एवंस्फाटिकः
केरत्नजेवाचलेलिंगेसर्वपूर्वोक्तंचंडप्रतिष्ठावर्ज्यंविधिंकुर्यात्ःइष्टोमंत्रेणसंस्कारोविधिवत्स्फा
टिकादिषुइत्याग्निपुराणात्॥ ॥अथचललिंगार्चाप्रतिष्ठा॥ ॥साचमात्स्याद्येयथाकालोक्तवनान्पूर्वोः
क्तैवसर्वाकार्येतिमन्तिमात्तिःत्रिविक्रमादिभिरलनारदबोधायनाद्युक्तोक्ताःसेदानीमुच्यतेःकर्त्तापू
र्वोक्तंमंडपमाग्नेयेकुंडंस्थंडिलंवापूर्वतोहस्तमात्रांवेदिनैऋत्योवास्तुमंडलंमध्येवेदीतत्रसर्वतोभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र॰का॥
॥४२॥
42

ङ्कृत्वा ॰प्राणानायम्यास्यां मूर्त्तौ लिंगे वा देवस्य सान्निध्यसिद्ध्यर्थं दीर्घायुर्बललक्ष्मीसर्वकामसमृ:
द्ध्यक्षयसुखकामोऽमुकदेवलप्रतिष्ठां करिष्ये॰ इति संकल्प॰ गणेशपूजनपुण्याहवाचनमातृकापू
जननांदीश्राद्धानि कृत्वाचार्यमृत्विजश्चतुरोऽष्टौ वा वृत्वा॰ वस्त्राद्यैः पूजयेत् अथाचार्योयदक्षसंस्थि
तमिति गौरसर्षपान्विकीर्यापो हि ष्ठेति कुशोदकेन भूमिसंप्रोक्ष्य॰ देवा आयांतु यातुधाना अपयांतु विष्णो देवः
यजनं रक्षस्वेति भूमौ आदेशं कृत्वा पूर्वोक्तामंडपप्रतिष्ठां कृत्वा वापं चगव्यहिरण्ययवदूर्वाऽश्वत्थ:
पलाशपर्णैरापोहिष्ठेति तिसृभिर्हिरण्यवर्णा इति चतसृभिः पवमानानुवाकेन वाभिषिच्य॰ व्याहृतिभिरि
देविरुक्मिणीति फलयवदूर्वाः समर्प्य॰ रक्षोहणमिति हस्ते कंकणं बध्वा वाससा माच्छाद्य यावदेहेउत्तममि
ति जले धिवासयेत्॰ इदं वो भायनोक्तं॰ ततो लिंगं प्रतिष्ठाप्य॰ गोक्षीरेणोवारवरुं कृत्वाज्यभागांते पला
शांकुरस्वराश्वत्थशम्यपामार्गसमिद्भिराज्येन चरुणा तिलैर्वा प्रत्येकमष्टाविंशतिमष्टौ वाहुतीर्हो

॥राम॥
॥४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कपालमूर्द्ध्निमूर्द्ध्निपतिभ्यो हुत्वास्थाप्य देवमंत्रेणापूर्वोक्तसमित्तिलनीवारस्वर्वाज्यैरष्टसहस्रमष्ट
शतमष्टाविंशतिर्वा हुत्वाग्निर्यज्ञभिरिम्पत्रवाकेनदद्याहुतीर्जुहुयात् · प्रतिद्रव्यहोमांते देवपा
दनाभिशिरःसुस्पृशेत् ॥ आज्यहोमेवोन्नरतःसजलकुंभेसंपातान्नयेत् ॥ तेषांहोममंत्राः ॥ इंद्रायेन्द्रो
ग्नीडस्यः स्योनापृथिवीति पृथिवीमूर्त्तेः ॥ अघोरेभ्य इतितत्पतेःसर्वस्यः अग्नआहीत्यग्नेः अग्नि
रूपामित्यपिमूर्त्तेः नमःशर्वायचपशुपतयेचेतिपशुपते ॥ यमायसोमंइतियमस्यः असिहिवीरे
तियजमानमूर्त्तेः ॥ स्कोहिश्रानन्तपतेरुद्रस्यः असुन्वंतमितिनिऋते ॥ आकृष्णेइतिसूर्यमूर्त्तेः योरु
द्रोअग्नेःइतितत्पतेरुद्रस्यः इमंमेमरुतास्यः शंनोदेवीर्जलमूर्त्तेः नमोभवायेतिभवस्यः आनोनियु
द्भिर्वायोः वातआयातुवायुमूर्त्तेः ॥ तमीशानंतत्पतेरीशानस्य · आप्यायस्वकुवेरस्य · सोमोधेनुः सोममू
र्त्तेः तत्पुरुषायेतिमहादेवस्य · अभित्वादेवईशानस्य · आदित्यस्वस्यआकाशस्य · नमउग्रायेतितत्पते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥प्र॰का॥ ॥४३॥ 43

र्भीमस्य॰ ततो देवस्य पादे स्पृशेत्॰ एवं द्वितीये ऊर्वा॰ नाभिं॰ तृतीयमध्यं॰ चतुर्थे उरः पंचमे शिरः स्पृष्ट्वा प्रतिप
र्यायं संपातजलेन देवमभिषिंचेत्॥ केचित्पादनाभिशिरःसु त्रीनेव पर्यायानाहुः ततः स्विष्टकृदादि होमं स
माप्याचार्यो घोषयेत् यथा देवं नत्वा स्वागतं देवदेवेश विश्वरूप नमोस्तु ते॰ शुद्धेपि त्वं च धिष्ण्ये शुद्धिकर्म॰ सह
स्व नामिति संप्रार्थ्य॰ उत्तिष्ठ ब्रह्मणस्पते इति मूर्तिमुत्थाप्य॰ पूर्ववन्मूर्त्यारोपणं कार्यं॰ अग्निः सप्त
मिति सूक्तमग्निपरहीनं पंक्तित्वानत्सहितं पठेत्॰ एवमष्टसहस्रमष्टशतमष्टाविंशति पञ्चजलं पातयेत्॰
ततोर्वाचादस्य वारमृज्जलेन च प्रक्षाल्य मंत्रवस्त्रं वगव्यं कृत्वा॰ पयः पृथिव्यां॰ आपो राजानमिति संस्नाप्य॰
आप्यायस्व॰ दधिक्राव्णः॰ तेजोसि मक्षवाता॰ आयङ्गौरिति पंचामृतैः संस्नाप्य॰ लिंगवेत्तमस्तेरुद्र मन्यव उ
त्य ष्टाभिः संस्नाप्य॰ घृतेनाभ्यज्योद्वर्तनैस्तोद्वर्त्योष्णोदकेन प्रक्षाल्य गंधं दत्वा संपातोदकेनाभिषिच्य॰ स ॥राम॥ ॥४३॥
पात्रैश्चतुर्भिः कुंभैरापोहिष्ठेति तिसृभिराकलशेष्विति चतुर्भिर्लिंगैः संस्नाप्योदुम्बरपीठेऽर्चामुपवेश्य प

रिनोऽष्टदिक्षु जलकुंभान्संस्थाप्य· तेषु गंधपुष्पदूर्वाः क्षिप्त्वाद्ये सप्तमृदः द्वितीये स्नानकल्कपञ्चपल्लवाश्च· तृती
यादिषु क्रमशः पानोदके गंधपुष्पफलसर्वौषधीः क्षिप्त्वा क्रमेणापो हि ष्ठेति तिसृभिः हिरण्यवर्णा इति चतसृ
भिः पवमानानुवाकेन चाभिषिच्य कुंभे शमीपलाशवटखदिरविल्वाश्वत्थविकंकतपनसाम्राशि
रीषोदुम्बराणां पल्लवान्कषायांश्च क्षिप्त्वा· अश्वत्थे वइत्यभिषिच्य पञ्चरत्नोदकेन हिरण्यवर्णेति संस्ना
प्य· वाससी दत्त्वोपवीतादिदीपान्तं कृत्वा हिरण्यगर्भः यआत्मदाः प्राणतः यस्येमे येनद्यौः यं क्रंदसी आ
पो ह यत् ॥ इत्यष्टौ पिष्टधूपान्दत्त्वा सुवर्णशलाकया निजसपात्रस्थं मधु घृतं च चित्रं देवानां तेजोसीति मं
त्राभ्यां· ॐ नमो भगवते तुभ्यं शिवाय हरयेनमः ॥ हिरण्यरेतसे विष्णो विश्वरूपायते नमः इति दक्षिणनेत्रे
वामनेत्रे च मंत्राभ्यामालिखेत्· अंजंति त्वेत्यंजनेनमक्त्वा· त्वा क्रा वः देवस्यत्वेति मध्यान्यशर्षपाभिरंगां ज
नेन पृतरं नयेत् अं त्वां जतिमिति शेषः ततः आदर्शं भक्ष्यादि दर्शयेत्· ततः कर्त्ताचार्यायगामृत्युम्भश्च दक्षि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रां दद्यात् ॥ अथाचार्यः प्रन्मुखमासीनो दद्यात्·मंत्रस्तु ॥ ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तशूलधराय सोम
दपिताय विश्वाधिपतये रुद्राय वै नमः शिवमगार्हितकर्मास्तु स्वाहेति· अश्वत्थपरोमूर्तेभ्यो नमो नम इ
ति ॥ अथाचार्यः सर्वतोभद्रे देवानावाहयेत् मध्ये ब्रह्माणं ॥ पूर्वादिदिक्षु इन्द्रादिलोकपालान्·ईशाने आद्यंत
रालेषु·वसून्·रुद्रान् आदित्यान्·आश्विनौ·विश्वान्·देवान्·पितॄन्·नागान्·स्कंदवृषौ·वृक्षेशाद्यंतराले
षु·दक्ष विघ्न·दुर्गां·स्वधाकारं·मृत्युरोगान्·यमरुद्रान्·सरितः मरुतः गणापतिवेति मध्ये पृथिवीं·मेरुं
स्थाप्य·देवमावाह्य प्रागादि·वज्रं·शक्तिं·दंडं·खड्गं·पाशं·अंकुशं·गदां·शूलं ॥ नक्षत्रे·गौतमं·भरद्वाजं·
विश्वामित्रं·कश्यपं·जमदग्निं·वशिष्ठं·अत्रिं· अरुंधतीं च· नक्षत्रेन वग्रहान्·नक्षत्रे·ऐंद्रीं·कौमारीं·
ब्राह्मी·वाराही·चामुंडा·वैष्णवी·माहेश्वरी·वैनायकीं·एतानाममभिः प्रणवादिनमोंतैरावाह्य संपूज्या
चार्यो देवं तन्मंत्रेणावाह्य मंडलमध्ये वा सुप्रतिष्ठो भवेति निवेश्य संपूज्याग्नो मंडले देवमानां प्रणवादिन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोन्त्रनामभिःस्वाहाकारेणानिलाज्येनदद्याद्दशाहुतीर्हुत्वाथध्यायेद्देवमारोप्यपुरुषसूक्तोत्तरनाराय
णाभ्यांसक्तत्वादेवेन्यासंकुर्यात् ॥ यथा ॥ पुरुषात्मनेनमःप्राणात्मनेनमःप्रकृतितत्त्वायनमःबुद्धित
त्त्वायनमःअहंकारायनमःइतिमनस्तुसर्वांगे ॥ प्रकृतितत्त्वात्मनेनमःहृदिःशब्दतत्त्वात्मनेनमःशि
रसिस्पर्शतत्त्वात्मनेनमःत्वचिरूपतत्त्वात्मनेनमःनेत्रेरसगंधश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्
पाणिपादपायूपस्थपृथिव्यप्तेजोवाय्वाकाशसत्त्वरजस्तमोदेहसत्त्वानिविन्यसेत्·अत्रशक्तोपूर्वो
क्तान्षोडशन्यासान्कुर्यात्·ततःपुरुषसूक्तस्याद्यर्क्हृदयंकरयोःतद्वत्तरंजान्वोःतदुत्तरंकट्यां ॥ तंय
ज्ञमितित्रिस्रोनाभिहृत्कंठेषु·तस्माद्अश्वाइतिद्वयंबाह्वोःब्राह्मणोस्येतिद्वयंनासयोः ॥ नाभ्याइतिः
द्वयमक्ष्णोःअंत्यांशिरसि·केचित्तुन्यासमन्यथाआहुःपुरुषप्रकृतिमहदहंकारतन्मात्राणिशब्दस्प
र्शरूपरसगंधतन्मात्राणि ॥ आकाशवायुतेजोऽप्पृथिवीश्रोत्रत्वक्चक्षुरसनाघ्राणवाक्पाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥प्र॰का॥ पादपायूपस्थमनस्तन्त्वानी निकेविदेत्वा निस्थिरलिंगे निवेश्यानीतिश्रुतिः· ततः सुखशायी भवेतिशाः
॥४५॥ य्यायां देवं श्वापयित्वा· मंडलद्वय्योरंतरालेन गंतव्यमिति प्रैषं दत्वा मंडलदेवताभ्यो नामभिः पाय
सेन चरुणा वा बलिं दत्वा तत्· नीवारचरुशेषेणादिग्बलिं· ततो मूर्द्धामंदिवइति पूर्णाहुतिं जुहुयात्· ए
वमधिवासनं कृत्वा· सद्योधिवासनं वा· परेद्युः उत्थितेष्टलग्ने स्थापनइति देवं स्थाप्य· पुरुषसूक्तेन तः
45 र्नारायणाभ्यां स्नात्वा· घृतक्षीरहविरुक्षत्वा· तत्र देवतामंत्रेण दशाहुतीर्हुत्वा· नामभिः षोडशाहुती
र्जुहुयात्: अग्नये स्वाहा· सोमाय· धन्वंतरये· कुह्वै· अनुमत्यै· प्रजापतये· परमेष्ठिने· ब्रह्मणो अग्नः
ये· सोमाय· अग्नये त्वाष्ट्राय· अग्नयेन्नपतये· प्रजापतये· विश्वेभ्यो देवेभ्यः सर्वेभ्यो देवेभ्यः भूर्भुवः स्वः अग्नये ॥रामः॥
स्विष्टकृतइति: ततः सप्तमे पञ्चमेवा ताभ्यां पूर्णाहुतिः ततआचार्याय यथा॥ ॐ या ओषधिरिति सर्वौषधीसम ॥४५॥
र्पी· संपातोदकं देवं मंत्रेणानेन वारमभिमंत्र्य नैवेद्याभिषिंचेत्· ततउत्तिष्ठेति देवमुत्थाप्य· विश्वतश्चक्षु·

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रित्नन्यास्य देवं ध्यात्वा जपेत्·ब्रह्मणे नमः एवं·विष्णवे·रुद्राय·इन्द्रादीनष्टेभ्यो·वसुभ्यो रुद्रेभ्यः अदित्येभ्योऽ
श्विभ्यां मरुद्भ्यः कुबेराय गंगादिमहानदीभ्योऽग्निसोमाभ्यां·इन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये सर्वे
शाय विश्वेभ्यो ब्रह्मणे इति·ततः संपातोदकेन यजमानमभिषिंच्य·देवं ध्यात्वा प्रतिनिष्ठ परमेश्वरे निष्पुष्पां
जलिं निवेदयत्स्वागतं देव स्वैव भक्तानुग्रहपरिगृहीतविग्रहं करचरणाद्यवयविमं शंखचक्राद्यायुधवंतं निज
वाहनाद्यरूपेण निजहृत्कमलस्थितं सर्वलोकसाक्षिणा अनीयां सं परमेश्वर सिपरमां श्रियं गमयेति मंः
त्रेण पुष्पांजलिमागतं विभाव्यावीर्यां विन्यस्य प्राणप्रतिष्ठां कुर्यात्॥ यथा प्राणप्रतिष्ठामंत्रस्य ब्रह्म
विष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छंदांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं ह्रीं शक्तिः प्राणः
प्रतिष्ठायां विनियोगः॥ ऋष्यादिक्रमेण विन्यसेत्·यथा·ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्म
ने·आं हृदयाय नमः॥ ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगंधात्मने ई शिरसे स्वाहा॥ ॐ टं ठं डं श्रोत्रत्वः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वक्षुर्जिह्वाघ्राणप्राणात्मने डुं शिखायै वषट्‌· ॐ तं पं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं· ॐ
पं पं ओं वचनादानविहरणोत्सर्गानन्दात्मने ओं नेत्रत्रयाय वौषट्‌ ॥ ॐ यं रं लं वं शं षं सं हं ळं क्षं मनोबुद्ध्यहंकार
चित्तात्मने अस्त्राय फट्‌· एवमात्मनि देवे देवत्वादिं स्पृष्ट्वा जपेत्‌· ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देव
स्य प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रों इत्यादि· देवस्य जीव इह स्थितः ॐ आं ह्रीं क्रों इत्यादि· देवस्य सर्वेन्द्रि
याणि इह स्थितानि· ॐ आं ह्रीं क्रों देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्वलये सुखेन सुचिरं ति
ष्ठन्तु स्वाहा ॥ हृदयं स्पृष्ट्वा जपेत्‌· अस्यै प्राणा प्रतिष्ठन्तु· अस्यै प्राणा क्षरन्तु· अस्यै देवत्वमर्चायै स्वाहेति
यजुरियते· ततः प्राणादेवमस्य सजीवं ध्यात्वा· कृत्वा घोरिति मंत्रेणाभृत्वं तस्या करोणायची देवमंत्रं
वजत्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरःसु स्पृष्ट्वा इहै वै धीविधिज पेत्‌· ततः कर्णौ स्वागतं देवदे
वेश मज्ञाग्यात्त्वमिहागतः प्राकृतं त्वं मदृष्ट्वा मा बालवत्परिपालय· धर्मार्थकामसिद्धर्थं स्थिरो भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वपुर्भायनः॥ सान्निध्यं तु सदा देव स्वार्चायां परिकल्पय यथा वह्नं ग्रा वली सूर्यो स्तिष्ठन्त्य प्रतिज्ञाया मिनः नाव:
न्त्वयात्र देवेश स्थेयं भक्तानुकंपया॥ भगवन्देवदेवेशान्नं पिनासर्वदेहिनां॥ येन रूपेण भगवन्त्वया व्याप्तं
चराचरं· तेन रूपेण देवेश स्वार्चायां सन्निधो भव इति ममेन्· एनदंतं सर्वदेवानां समानं· देवमंत्रश्च मूल
मंत्रो वैदिको वा यथाह्य: अथाचार्य: कर्ज्जावालिंगमर्च्चा वा ॐ भूः पुरुषमावाहयामि॥ ॐ भुवः ॐ स्वः· ॐ भूर्भु
वः स्वर्यामीत्यावाह्य प्रणवेनासनं दत्वा तेनैव दूर्वा श्यामाकविष्णुक्रान्तापद्ममिश्रं पाद्यं· इमा आपः शिव
तमाः पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः पाद्यास्ता जुषतां प्रतिगृह्णातु भगवन्महाः
विष्णुर्विष्णवे नमः इति पाद्यं: भगवन्महादेवो रुद्रायनमः इति लिंगे: इदमापः आचमनीयास्ता जुषता
मित्याचमनीयं· अर्घ इत्यर्घ्यं· तनो वेदमंत्रैः संस्नाप्यो: रविष्णो रितिविष्णो: नमोस्तु नीलग्रीवायेति लिं:
गे· कंकणां विप्रस्य॥ इमे गंधाः शुभा दिव्याः सर्वगंधैरलंकृताः पूताः ब्रह्मपवित्रेण पूता सूर्यस्य रश्मिभिः पु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ प्र. का ॥
॥ ४७ ॥
47

नाद्यन्यादिपूर्ववत् ॥ इति गंधं ॥ इमे माल्याः शुभा दिव्याः सर्वमाल्यैरलंकृताः पूताइति माल्यां इमानि पुष्पा
नि इति पुष्पं ॥ वनस्पतिरसोदीव्यो प्रतिगृह्णात्विति धूपं ॥ ज्योतिः शुक्रं च तेजश्च देवानां शाश्वतं प्रियः प्रभा
करः सर्वभूतानां दीपोयं प्रतिगृह्यतां ॥ दीपं दत्वा: विष्णो संकर्षणादि द्वादश नामभिः पुष्पाणि सर्पितैरेवत
र्पणां कृत्वा पायस गुडौदनं विनोदनानि पवित्रं ते विततमिति नैवेद्य कृशरं पूर्वोक्तनामभिर्हुत्वा. तत्रै
वशाङ्गिरो थियेसरस्वन्यै विष्णवे नम इति हुत्वा: विष्णोर्नुकं ॥ नदस्य प्रियं व्रत विष्णुपरो मात्रया विच
क्रमे. त्रिर्देवह्रतिज्जुहुयात्. लिंगे तु दीपान्तं कृत्वा. भवाय देवाय. शर्वाय. ईशानाय. पशुपतये. रुद्राय. उ
मायै. भीमाय. महते देवाय नम इति पुष्पाणि दत्वा. नैरेवतर्प्पणां कृत्वा पवित्रं ते इति पायस गुडौदनं च नि
वेद्य. पूर्वोक्तनामभिः कृशरं हुत्वा. भवस्य देवस्य पत्न्यै स्वाहेत्याद्यष्टभिः गुडौदनं हुत्वा. भवस्य देवस्य
सुताय स्वाहेत्याद्यैर्हरिद्रोदनं हुत्वा. त्र्यंबकं. मा नो महान्तं. मा नस्तोके. आ यान्ते गोघ्नं. विकिरिड विलो

॥ राम ॥
॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हितः सहस्राणि सहस्रश इति द्वादशभिर्हुत्वा। शिवाय। शंकराय। शितिकंठाय। कपर्दिने। ताम्राय। अपगुर
माणाय। हिरण्यबाहवे। शष्पिंजराय। बभ्लुशाय। हिरण्यायेति चतुर्दश्याहुत्वा। ततः स्विष्टकृतादि होमशेषं समाप्य।
पूर्वोक्तसर्वहविर्भिर्विश्वेलिंगाय पवावलिं दद्यात् मंत्रस्तु। त्वामेकमाद्यं पुरुषं पुरातनं नारायणं विश्वसृ
जं यजामहे। त्वमेव यज्ञो विहितो विधेयस्त्वमात्मनात्मन् प्रतिगृह्णीष्व हव्यमिति। लिंगे तु रुद्र शिवमिति
वदेत्। ततोऽश्वत्थपर्णे। भूर्भुवः स्वरोमिति हुतशेषं विधाय प्रदक्षिणीकृत्य। विश्वभुजे। सर्वभुजे। आ
त्मने परमात्मने नमः इति नत्वाचार्याय यज्ञान्ते दद्यात् तदर्द्धं द्वादशानि सहस्र एकां वा गां दत्त्वा। ऋत्विग्भ्यो
दक्षिणां शतं द्वादश वा विप्रान्भोजयेदिति संक्षेपः॥ ॥इति कमलाकरभट्टकृते चललिंगार्चाप्रति
ष्ठाविधिः॥ ॥अथ पुनः प्रतिष्ठा॥ ॥तामधिकृत्य हयशीर्षपंचरात्रे। चांडालमद्यसंस्पर्शदूषितानां वह्निनाऽ
थवा। अपुण्यजनसंस्पृष्टा विप्रक्षतजदूषिता॥ संस्कार्येति शेषः। पदार्थादर्शे राघवभट्टस्तु। खण्डिते स्फु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥प्र·का॥ दिते दग्धे भ्रष्टे पानविवर्जिते · यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु · अन्त्यमंत्राभिमंत्रिते चैव पतितस्पर्शदूः
॥४८॥ षिते · दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः॥ इति सर्वगतो विष्णुः इति भाषांतरकारह · यागः पूजा
पशुगर्दभादिः॥ अर्चायाः भंगदोषोद्भवेन छिन्ने उपवासतः नराज्ञो विप्लवे श्रीयात्सु राचौ विप्लवेन थेति
विष्णुधर्मोक्तेः सिद्धान्तशेखरे · चौरचांडालपतितश्वोदक्यास्पर्शने सति · शिवाद्युपहतौ चैव प्रतिष्ठां पुन
48 राचरेत् · जलादिवासविहीनं नेत्रोन्मीलनवर्जितं · शुद्धिविवेके विष्णुः॥ द्रव्यवन्तः कृतशौचानां देवतार्ची
नां भूयः प्रतिष्ठापने न शुद्धिरिति अर्चाप्रतिमा · तद्द्रव्यस्यनाशादेर्द्रव्यशौचं कृत्वा पुनः प्रतिष्ठां कुर्यादि
त्यर्थः स्मृत्यर्थसारे प्येवं · तद्विधिर्बौधायनसूत्रे · पूर्वप्रतिष्ठितस्याभ्युद्धिपूर्वकयार्चं छिन्नां मेकमासं द्विमासं संवा ॥राम॥
र्वनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने जलादिवासं कृत्वा कलशैः स्नपयेत् ततः पंचगव्येन परंशुचोद ॥४८॥
केन स्नपयेद्दृष्ट सहस्रमष्टशतमष्टाविंशतिं वा कलशैः पुरुषसूक्तेन · ततः पुष्पाणि दत्वा गुडोदनं निः

वेद्ये दिनित्रयद्वि पूर्ववत्तु विहितेदे पूर्वोक्तां प्रतिष्ठां पुनः कुर्यात्। पूर्वोक्तविष्णुवचनात्। इयं मलमासगुरु
शुक्रास्तादावपि कार्येति। मदनरत्ने हेमाद्रौ च। देवार्चाप्रासादभेदने तु शूलपाणौ काश्यपः। वापीकूपा
रामसेतुसभातडागदेवतायतनभेदने प्रायश्चित्तं चरेत्तत आहुतीर्जुहुयात्। इदं विस्फुटः ॥ मानसो
के। विद्वाः कर्मोरिता। याद्दोस्प्रति। यां देवतां तु कस्माद्यमितस्थे देवतायेत्रात्सराणां भोजयेः संखलिखि
तौः प्रतिमारामकूपसंक्रमध्वजसेतुनिपातभंगेषु तत्तत्स्थानं प्रतिसंस्कारो दृष्टानंतं च निपातितानां
इति। सप्तस्थानं प्रतिक्रिया प्रतिसंस्कारः पुनः प्रतिष्ठा ॥ अच्छाग्नेयं पराणा देवदृष्टेन्यर्थः पदार्थादर्शे खंडितानां
स्फुटितानां जीर्णानां भवतीदं च वह्निना। प्रतिमां वर्जयेद्यत्नात्तत्र मंत्रास्वातंत्र्यश्रवणात्। निक्षिपेद्वा रुजाम
ग्नौ तु यान्यासमुच्चिः क्षिपेत्। तथा। एकाहपूजा विहतो कुर्याद् द्विगुणमर्चनम्। द्विरात्रे तु महा
पूजां संप्रोक्षणमतः परं। मासादूर्ध्वमनेकाहपूजा यदि निहत्यते प्रतिष्ठैवेष्यते केश्चित्केश्चित्संः

प्रोक्षणं मतं · संप्रोक्षणास्वरूपं तु नैवेद्य ॥ संप्रोक्षणान्तु देवस्य देवमुद्रास्य पूर्ववत् · पंचपंचक्रमेणैव स्नाप
यित्वा मृदंभसा · गवां रसैश्च संस्नाप्य दर्भतोयैर्विशुध्य च · प्रोक्षयेत्प्रोक्षणीतोयैः मूलेनाष्टोत्तरं शतं ·
ततो मूलेन मूर्द्धादि पीठांतं संस्पृशेदपि · तत्वन्यासं लिपिन्यासं मंत्रन्यासं च विन्यसेत् प्राणप्रतिष्ठा
मंत्रेण प्रतिष्ठापनमाचरेत् · पूजां च महतीं कुर्यात्स्वतंत्रोक्तां यथाविधिः पूजाहीनादिषु प्रायः संप्रोक्षण
विधिः स्मृत इति ॥ ॥इति भट्टकमलाकरकृते पुनःप्रतिष्ठा ॥ ॥अथ जीर्णोद्धारः ॥ अग्निपुराणे ईश्वर
उवाच ॥ ॥जीर्णादीनां च लिंगानां उद्धारं विधिना वदे · लक्ष्मोज्झितं च भग्नं च स्थूलं वज्रहतं तथा · संपुटं
स्फुटितं व्यंगं लिंगमित्येवमादिकं · इत्यादिदुष्टलिंगानां त्याज्या पिंडी तथा वृषः ॥ चलितं चालितं नि
म्नमत्यर्थं विषमस्थितं · दिङ्मूढं पतितं लिंगं मध्यस्थ पतितं तथा ॥ एवंविधं च संस्थाप्य निर्व्रणं च
भवेद्यदि · नादेयेन च वा हेतुना दग्धं यतेयदि · ततोन्यत्रापि संस्थाप्य विधिदृष्टेन कर्म्मणा · सुः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थितं दुःस्थितं वापि शिवलिंगं न चालयेत् · शतेन स्थापनं कुर्यात्सहस्रेणान चालनं · पूजादिभिश्च सं-
युक्तं जीर्णाद्यमपि संस्थितं · पूजया रहितं यत्तु दुःस्थमपि सुस्थितं · यास्मै मंडपमीशत्वप्रकल्पारे कर्त्तो
रणं · विधाय द्वारपूजादि स्थंडिले संप्रपूजनं मंत्रैः संपूज्य संतर्प्य वास्तुदेवांश्च पूर्ववत् · दिग्बलिं च
बहिर्दत्वा समाचम्य स्वयं गुरुः व्रातस्नातो जो जपित्वा तु शंभुं विज्ञापयेत्ततः दुःस्थलिंगमिदं शंभो शांतिरुद्ध-
रणो ऽस्य ता सचिस्ते विधिना सम्यक् अधितिष्ठ चमोशिव · एवं विज्ञाप्य देवेशं तिलहोमं समाचरेत् · मधाज्य-
क्षीरदूर्वाभिर्मूलेनाष्टाधिकं शतं ततो लिंगं च संस्थाप्य पूजयेत्स्थंडिले तथा ॥ ॐ व्यापकेश्वरायेति न-
म्नेनं शिवमर्चयेत् ॥ ॐ व्यापकेश्वरहृदयाय नमः ॐ व्यापकेश्वर शिरसे स्वाहेत्यादि षडंगं ॥ ततस्तत्र सु-
स्थितं मंत्रं धारयेदस्त्रवर्मणः संडकोपि हृयः कश्चिह्लिंगमाश्रित्य तिष्ठति · लिंगं त्यक्त्वा शिवाज्ञाभि-
र्यत्रेष्टं तत्र गच्छतु विद्याविद्येश्वरैर्युक्तः शंभुरत्र भविष्यति · सहस्रप्रतिभागं च ततः पाशुपतास्त्र-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाऽन्वाशांत्यंतु नात्रोक्ष्य स्पृष्ट्वा कुशैर्जपेत्ततः दत्वार्घं च विलोमेन तत्तत्तत्त्वाधिपांस्ततः पृथिव्यादीनि पं
चतत्वानि · सद्योजातानावहस्तयोः ॥ मूर्ध्नि मूर्ध्नीश्वरां लिंगे पिंडिकासंस्थितान्गुरुः विसृज्य स्वर्णपा
त्रेण वृषस्कंदस्तथा तथा ॥ वज्रावज्ञानथानीत्वा शैवं मंत्रं गरान्नद्यादेः तज्जले निक्षिपेन्मंत्री पुष्ट्यर्थं जुहु
यात्तद्घृतं · तृप्तये दिक्पतीनां च वास्तुभुद्भ्यः शतं शतं · रक्षां विधाय तत्रास्त्रिमं मपाशुपतास्त्रं ततः लिंग
मन्यत्तेन तत्र विधिवत्स्थापयेद्गुरुः ॥ असुरैर्मुनिभिर्देवैस्तत्त्वविद्भिः प्रतिष्ठितं जीर्णं वाप्यथवा भग्नं
विधिनापि न चालयेत् ॥ एष एव विधिः कार्यो जीर्णधामसमुद्धृतेः षडंगमंत्रोक्तं न्यस्य कारयेन्मंदि
रांतरं ॥ ॥ इत्याग्निपुराणे जीर्णोद्धारः ॥ अथ प्रयोगः ॥ ॥ कर्त्तामुकदेवस्य जीर्णोद्धारं करिष्ये इ
ति संकल्प नांदीश्राद्धं मातृकापूजनं पुण्याहवाचनानंतं कृत्वाचार्यमृत्विजश्च वृत्वा मंडपे द्वारपू
जादिकं कृत्वा वेद्यां वा देवता आवाह्य स्थंडिले पीठे वा पुराणवेनासनं दत्वा · ॐ व्यापकेश्वर एह्येहि त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मः॥ ॐ व्यापकेश्वरएह्येहि हृदयायनमः॥ ॐ व्यापकेश्वर शिरसे स्वाहा इत्येवं षडंगं कृत्वा शिवं पूजयेन्नः
॥ देवेन्त्र मूलेन· अथाष्टोत्तरशतनामघोषजप्त्वा हैमं पद्मं निवेद्याग्निं प्रतिष्ठाप्य संहारक्रमेणामूर्त्तीः सं
तर्प्य घोरेणाघनशार्षपैः सहस्रं कृत्वा पूर्णां कृत्वा दिग्बलिं दत्वा जीर्णं देवं प्रणवेन संपूज्य प्रार्थये
त्· दुष्टलिंगमिदं शंभो शान्तिरुद्धरणे स्वचरूचितं विधिना सम्यगधितिष्ठस्व मां शिव· जीर्णमग्न
मिदं चैव सर्वदोषावहं नृणां॥ अस्योद्धरे कृते शान्तिः शास्त्रेस्मिन्कथिता त्वया जीर्णोद्धारविधानं च
नृपराष्ट्रहितावहं· तदधिष्ठाय मां देव प्रहरामि तवाज्ञया· ततः क्षीराज्यमधुदूर्वाभिः समिद्भिश्चाष्टो
त्तरसहस्रं शतं वा कृत्वांगानां दशांशेन लिंगचालनार्थं सहस्रं कृत्वा शान्तं पायसेन जुहुयात्· ततः
क्षीराज्यमधुदूर्वाभिः समिद्भिश्चाष्टोत्तर सहस्रं शतं वा कृत्वांगानां दशांशेन लिंगचालनार्थं स
हस्रं कृत्वा शान्तं पायसेन जुहुयात्· ततः सौवर्णी पुष्पसहस्रेण देवं संपूज्यार्घ्यं दत्वा प्रार्थयेत्·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

211 दिकं विलिख्य मोच्कासनं तदुपरि पित्रार्घपात्रं कृत्वा पवित्रेस्थ इति पवित्रम्। शन्नोदेवीति ज
लम्। यवोसीति यवान्। तिलोसीति तिलान्। गन्धपुष्पाक्षतादितूष्णीं निक्षिप्य। न्युब्जाभ्यां पाणि
भ्यां पित्र्यर्घपात्राणि परिपूर्णानि सन्तु सन्तु॥ मातामहार्घपात्राणि परिपूर्णानि सन्तु सन्तु। इस्के
सन्त्विति प्रतिवचः। ततः सव्येनोदङ्मुखः प्रथममर्घपात्रं वामहस्ते कृत्वा पवित्रं प्रागग्रं वैश्वदेविकार्घ ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जपाणौदत्वा सपवित्रेषु हस्तेषु। ॐ नमो नारायणाय। ॐ यादिव्या आपपयसासंवभूर्योन्तरिक्षाऽउतपार्थि
वीर्याहिरण्यवर्णा यज्ञियास्तान आपः शिवासर्ठ०स्योनाः सुहवाभवन्तु इति पठित्वा दक्षिणाकरेण गृही
त्वा। अद्येहाऽमुकगोत्रास्मत्पित्रादित्रयश्राद्धसंबन्धिनः पुरूरवार्द्रवसंज्ञकविश्वेदेवाः एष हस्तार्घो
वो नमः। इति विप्रपाणौ देवतीर्थेन दत्वा। तदर्घं भूमौ निधाय। ॐ पुनः प्रत्यर्घमस्तु इति द्विजकरस्थं प
वित्रं अर्घपात्रे स्थापयेत्॥ एवं सर्वत्र उत्तानाभ्यां पाणिभ्यां अर्घोपरि संस्थाप्य। ॐ यादिव्या इति
पठेत्। दक्षिणाकरे गृहीत्वा। ॐ नमो नारायणाय। सपवित्रेषु हस्तेषु। अद्येह अमुकगोत्रास्मन्माताम
हादित्रयश्राद्धसंबन्धिनः पुरूरवार्द्रवसंज्ञकविश्वेदेवाः एष हस्तार्घो वो नमः पुनः प्रत्यर्घमस्तु॥ अपस

याज्ञवल्क्यः दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः। पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः इत्युक्तत्वात् पितृ
स्थाने न्युब्जत्वविधानात् देवस्थाने उत्तानस्थापनमित्यभिप्रेतम्। ततो ऽर्घपात्रद्वयस्थजलेन ॐ तच्चक्षुरिति चक्षुःस्पर्शः, ततो ऽर्घपात्रे स्रवविश्वेदेव दक्षिणपार्श्वे ॐ विश्वेभ्यो देवेभ्यः स्थानमसीति उत्तानं कृत्वा स्थापयेदिति प्र-
तिभाति,

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति विप्र पाणिस्थ पवित्रोपरि पितृतीर्थेनार्घ्यं दत्वा सशेषं भूमौ निधाय पुनः प्रत्यर्घमस्त्विति द्विजकर
पवित्रं· अर्घ्यपात्रे स्थापयेत्· एवमेव पितामह प्रपितामह मातामहादिषु· ईशान्य विशेषः·

मं कृत्वा। दक्षिणाभिमुखः। वामजान्वाच्य। सपवित्रेषु हस्तेषु। ॐ नमो नारायणाय। ॐ या दिव्या आप
पयसेति पठेत्॥ अद्येह अमुकगोत्रास्मत्पितरमुकशर्मन् सपत्निक वसुस्वरूप एष हस्तार्घस्ते स्तु॥ अद्ये
१२ ह अमुकगोत्रास्मत्पितामहामुकशर्मन् सपत्नीक रुद्रस्वरूप एष हस्तार्घस्ते स्तु। अद्येहामुकगोत्रास्म
112 त्प्रपितामहामुकशर्मन् सपत्नीक आदित्यस्वरूप एष हस्तार्घस्ते स्तु॥ मातामहेभ्यो दत्वा। अद्येह अ-
मुकगोत्रास्मन्मातामहामुकशर्मन् सपत्निक वसुस्वरूप एष हस्तार्घस्ते ऽस्तु॥ अद्येह अमुकगोत्र अ-
स्मत्प्रमातामहामुकशर्मन् सपत्नीक रुद्रस्वरूप एष हस्तार्घस्ते स्तु। अद्येह अमुकगोत्र अस्मद्वृद्धप्रमा-
तामह· अमुकशर्मन् सपत्नीक आदित्यस्वरूप एष हस्तार्घस्ते स्तु॥ इति मातामहविप्रपाणौ दद्यात्। प्रथ १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रपितामहार्घपात्रस्थजलादिकं पितामहार्घपात्रे कृत्वा ततः सर्वं पित्र्यर्घपात्रे कृत्वा पित्र्यर्घपात्रमुत्तानं पितामहार्घपात्रोपरि धृत्वा तदुभयपात्रमुत्तानं प्रपितामहार्घपात्रोपरि धृत्वेति सम्प्रदायः १

मे पितृपात्रे सर्वान्संस्रवान्निक्षिप्य वामहस्ते निधाय सव्यं कृत्वा तदुदकेनार्घोदकं शिरसि दद्यात् पुत्रपौत्रादिवर्धनम्। तस्मात्तस्माच्छिवं मेऽस्त्वा इह लोके परत्र च॥ ॐ मम कुले दीर्घमायुरस्तु अस्तु शान्तिरस्तु अस्तु पुष्टिरस्तु अस्तु वृद्धिरस्तु अस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगं दुःखं दारिद्र्यं तत्प्रतिहतमस्तु अमृताभिषेकोऽस्तु इति स्वशिरोऽभिषिच्य। अपसव्येन पितृद्विजवामभागेऽसव्ये दक्षिणाग्रान्दर्भानास्तीर्य। तदुपरि शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसी॥ इत्यर्घपात्राणि न्युब्जानि स्थापयेत्॥ तत्पात्रे पितृभ्यः स्वधेति मन्त्रेण पूजयेत्। तदुपरि स्वधावाचनीयकुशपत्रत्रयं संस्थापयेत्॥ तच्च पात्रं दक्षिणादानपर्यन्तं न चालयेन्न च स्पृशेत्। ततः सव्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वेदेवे युग्मा ब्राह्मणाः

विश्वेभ्यो

दक्षिणजान्वाच्य नमोस्त्वनन्तायेति पठेत्। पुरूरवार्द्रवसंज्ञकेभ्यो देवेभ्यो नमो नमः। अत्रं नमः सु

गन्धं नमः अक्षतं नमः पुष्पाणि धूपं दीपं नैवेद्यं वस्त्रं यज्ञोपवीतं ताम्बूलं पुगीफलं दक्षिणा तु

१३ लसीदलं कुशपत्रद्वयं गृहीत्वा। अद्येह अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसम्बन्धिनस्तथाऽमु

कगोत्रास्मन्मातामहादित्रयश्राद्धसम्बन्धिनः पुरूरवार्द्रवसंज्ञक विश्वेदेवार्चनविधौ

इमानि गन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलपूगीफलवस्त्रयज्ञोपवीततुलसीदलादीनि यथा

विभागं वो नमः स्वाहा। विश्वेषां देवानामर्चनविधेः सर्वं परिपूर्णमस्तु। अस्तु परिपूर्णमिति प्रति

वचः। वामजान्वाच्य। अपसव्येन पितृतीर्थेन पितृभ्यः स्वधेति मन्त्रेण। अत्र गन्धाक्षतपुष्पधूप १३

वासः सपवित्रकरो गन्धैर्गन्धद्वारेति पूजयेदित्युक्तत्वात् गन्धदानं पवित्रसहित एव कुर्यात्। विलेपने तु विशेषमा

ह वृद्धयाज्ञवल्क्यः पवित्रं तु करे कृत्वा यः समालभते द्विजान्। राक्षसानां भवेच्छ्राद्धं निराशाः पितरो गताः समालभनमनु

लेपनम्॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृब्राह्मणा अयुग्मा।

दीपनैवेद्यवस्त्रयज्ञोपवीतताम्बूलपूगीफलतुलसीदलादिभिः पितृभ्यो नम इति सम्पूज्य॰ अद्येहाऽ
मुकगोत्रास्मत्पितृपितामहप्रपितामहाऽमुकामुकशर्माणः सपत्नीकावसुरुद्रादित्यस्वरूपा ब्राह्मणा
र्चनविधौ इमानि गन्धाक्षतपुष्पधूपदीपनैवेद्यवस्त्रयज्ञोपवीत आभूषणताम्बूलपूगीफलतु
लसीदलादिनी त्रेधा विभज्य वः स्वधा॥ पितृब्राह्मणार्चनविधौ सर्वं परिपूर्णमस्तु॰ अस्तु परिपू
र्णमिति विप्रोक्तिः। एवं मातामहादित्रयसम्बन्धि ब्राह्मणांश्च पितृभ्यः स्वधेति मन्त्रेण पूजयेत्। ति-
लमोदकमादाय अद्येह॰ असुकगोत्रास्मन्मातामहप्रमातामहवृद्धप्रमातामहामुकामुकशर्माणः
सपत्नीकावसुरुद्रादित्यस्वरूपा ब्राह्मणार्चनविधे इमानि गन्धाक्षतपुष्पधूपदीपनैवेद्यवस्त्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योपवीतताम्बूलपूगीफलतुलसीदलादीनि त्रेधा विभज्य पवः स्वधा। मातामहब्राह्मणार्चनविधे सर्वंप
रिपूर्णमस्तु॰ अस्तु परिपूर्णमिति विप्रोक्तिः। ततो हस्तगतपवित्रे त्यक्त्वा पवित्रान्तरे निधाय सव्यं वि
१४ धाय आचम्य। वैश्वदेविकब्राह्मणाचम्यताम् इति वैश्वदेविकद्विजानाचमयित्वा। तदग्रे भस्मना
214 चतुष्कोणमण्डलं कुर्यात्॥ ॐ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति। एवं मण्डलभस्माङ्कं स
र्वभूतानि रक्षतु॥ इति भस्मना रेखां कृत्वा। अपसव्येन पितृब्राह्मणं आचमयित्वा। मातामहादिब्रा
ह्मणांश्चाचामयित्वा। पितृमातामहब्राह्मणाग्रे चतुष्कोणं मण्डलं भस्मना रेखां कृत्वा। यथा चक्रे
ति पठेत्॥ पत्रावलिं संस्थाप्य दक्षिणतो जलपात्रं च संस्थाप्य सव्येन आज्यार्थान्नादेः किञ्चिद १४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छन्दोगा जुहुयुः सव्येनापसव्येन याजुषा इति वृद्धयाज्ञवल्क्योक्तेः

सुदेवाय नाम्नासीदेति मन्त्रेण निवेद्य। क्षारवर्जितं घृताक्तमन्नं पत्रपुटे आदाय। भो ब्राह्मणाः पुष्मदनुज्ञया
अग्नौकरणमहं करिष्ये॥ इति पृष्टे कुरुष्वेति प्रतिवचः। अपसव्यं विधाय। तिलमोटकं गृहीत्वा। घृताक्त
मन्नं मधुरद्रव्युद्धृत्य पितृद्विजपाणौ जुहुयात्। ॐ अग्नये कव्यवाहनाय स्वाहा। इदमग्नये कव्यवाह
नाय। ॐ सोमाय पितृमते स्वाहा। इदं सोमाय पितृमते। इति पितृद्विजपाणौ हुत्वा। किञ्चिन्मातामह
हब्राह्मणहस्ते दत्वा शेषं पिण्डार्थं स्थापयेत्। ततः सव्येन देवपूर्वकं अन्नं परिवे[illegible]। उदङ्मुखो दक्षिण
जान्वाच्य वैश्वदेविकपात्रोपरि परिविष्टमन्नं गायत्र्याभ्युक्ष्य वामहस्तमधः कृत्वा व्यस्ताभ्यां दक्षिणो
उत्तानाभ्यां
त्तराभ्यां न्युब्जाभ्यां पाणिभ्यां ॐ मधुरपात्रमालभ्य जपति। पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्य मु

याज्ञवल्क्यः। दत्त्वान्नं पृथिवीपात्रमिति पात्रानुमन्त्रणमिति पात्राभिमन्त्रणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रवेऽघृतेऽघृतं जुहोमि स्वाहा ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे इति द्वि
जानुभ्यां मधोमुखमन्त्रे निवेश्य ॐ विष्णो हव्यं रक्षेति। यवान्विकीर्य ॐ अपहता असुरा रक्षांसि वेदिषद
१५ द इति इदमन्नं इमा आप इदं शाकादिकं सर्वं हव्यम्। इति ॥ अङ्गुष्ठग्रहणम्। कुशपत्रद्वयं गृहीत्वा वामहस्ते
L15 न पत्रावलिं दधानः॥ ॐ अद्येह अमुकगोत्राऽस्मत्पित्रादित्रयश्राद्धसम्बन्धिभ्यस्तथाऽमुकगोत्रास्मन्मा
तामहादित्रयश्राद्धसम्बन्धिभ्यः पुरूरवार्द्रवसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो इदमन्नं समोदकं घृताद्युपस्कारसं
हितं यत्परिविष्टं यत्परिवेष्यमाणं ब्राह्मणास्यात् तृप्तिपर्यन्तं निषिद्धवर्जितं अमृतस्वरूपान्नं। यथा विभा राम
गं वो नमः स्वाहा। इति भूमौ जलं निःक्षिपेत्। इदं पुरूरवार्द्रवसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नमः ॐ तत्सन्नमम १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

अपहता इति मन्त्रेण ब्राह्मणानामग्रतो भूमावेव तिलान्विकिरेदिति गदाधरः। यावदुष्णमन्नं ताव
दियम्नः ४

इति त्यागः। अपसव्यं विधाय पित्रादिपात्रे परिविष्टमन्नं गायत्र्याजलेनाभ्युक्ष्य पूर्ववद्वामहस्तमधः कृत्वा दक्षि
णोत्तराभ्यामुत्तानाभ्यां पाणिभ्यां (न्युब्जाभ्यां) ॐ मधु ३ पात्रमालभ्य आलभ्य जपति। ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्म
णस्य मुखेऽमृते ऽमृतं जुहोमि स्वधा। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पांसुरे। इत्यनेन
द्विजाङ्गुष्ठमन्नेऽवगाह्य निवेश्य। ॐ विष्णो कव्यमिदं रक्षेति तिलान्विकीर्य। ॐ अपहताऽसुरा रक्षांसि वे
दिषद इति पठेत्। पूर्वादङ्गुष्ठग्रहणम्॥ इदमन्नं इमा आप इदमाज्यम् इदं शाकादिकं सर्वं कव्यम्। ततः
सजलमोदकमादाय। ॐ अद्येह अमुकगोत्रेभ्यो ऽस्मत्पितृपितामहप्रपितामहेभ्यो ऽमुकामुकशर्मभ्यः
सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्य इदमन्नं सोदकं घृताद्युपस्कारसहितं यत्परिविष्टं यत्परिवेक्ष्यमाणं

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा। दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणाम्। अस्यार्थः = तिलधान्ययवमाषजल
मूलफलानामन्यतमेन यथाशास्त्रं श्रद्धया दत्तेन मनुष्याणां पितरः तृप्यन्ति, कृष्णमाषास्तिला [illegible] श्रेष्ठाः सर्वयज्ञा
लय इति वायुपुराणवचनात् माषैरिति कृष्णमाषा वोद्धव्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणास्तान्तृप्तिपर्यन्तं· अमृतस्वरूपान्नं त्रेधा विभज्य पवः स्वधा नमः· इति भूमौ निःक्षिपेत्। इदमस्मत्पितृपिता
महप्रपितामहेभ्यो ऽमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्यस्तत्तत्सन्नमम। इति त्यागः। एवंमा
१८ तामहादिपात्रे परिविष्टमन्नं गायत्र्याभ्युक्ष्य· पूर्ववत्पात्रमालभ्य पृथिवीतेति पठित्वा। इदं विष्णुरिति प
ठेत्। अन्ने द्विजाङ्गुष्ठं निवेश्य ॐ विष्णो कव्यं रक्षेति· तिलान्विकीर्य· अपहतेति पठेत्। पूर्ववदङ्गुष्ठ
ग्रहणम्। इदमन्नमिति पठेत्। सजलमोदकमादाय· अद्येह· अमुकगोत्रेभ्यो ऽस्मन्मातामहप्रमातामह
हवृद्धप्रमातामहेभ्यो ऽमुकामुकशर्मभ्यः सपत्नीकेभ्यो वसुरुद्रादित्यस्वरूपेभ्य इदमन्नं सोदकं घृता रामः
द्युपस्करसहितं यत्परिविष्टं यच्च परिवेक्ष्यमाणं ब्राह्मणस्यातृप्तिपर्यन्तं· अमृतस्वरूपान्नं यथाविभा १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

गं वः स्वधा नमः॥ इदमस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्योऽमुकामुकशर्मभ्यः सपत्नीकेभ्यो
वसुरुद्रादित्यस्वरूपेभ्यो न तत्सन्न मम। इति त्यागः। ततः सव्येनोदङ्मुखो वैश्वदेविकद्विजकरे अपोशानं द
त्वा यवकुशपत्रद्वयमादाय। ॐ ये देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ अप्सुक्षितो महिनैका
दशस्थ ते देवासो यज्ञमिमं जुषध्वम्। ॐ नमो देवेभ्य इति यवान्कुशान्विसृज्य। वैश्वदेविकद्विजं यथासु
खं जुषध्वम्॥ इति वदन्प्रणमेत्॥ ततोऽपसव्येन दक्षिणाभिमुखः पितृब्राह्मणकरे अपोशानं दत्वा। तिल
मोदकमादाय। ॐ ये चेह पितरो ये च नेह यांश्च विद्मयां २ उ च न प्रविद्म। त्ववेत्थ इति ते जातवेदः स्वधाभिर्यज्ञ
ं सुकृतं जुषस्व। ॐ स्वधा पितृभ्य इति तिलमोदकं विसृज्य पितृद्विजं यथासुखं जुषध्वम्। इति वदन्प्रणमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सकृत्त्रिर्वा पठेदितिगदाधरैः ८

त्॥ एवं मातामहद्विजेभ्योऽप्यशातं दत्वा तिलमोदकं विसृज्य मातामहद्विजं यथासुखं जुषध्वमिति वदन्प्रणा
११ मेत्॥ ततः कृताञ्जलिः॥ पितापितामहश्चैव तथैव प्रपितामहः॥ तृप्तिं प्रयान्तु मे भक्त्या यन्मयैतदुदाहृतम्॥
मातामहस्तृप्तिमुपैतु तस्य तथा पिता तस्य पिता तथान्यः॥ विश्वे च देवाः परमां प्रयान्तु तृप्तिं प्रणश्यन्तु च यातु
117 धानाः॥ २॥ यज्ञेश्वरो हव्यसमस्तकव्यभोक्ताव्ययात्मा हरिरीश्वरोऽत्र॥ तत्सन्निधानादपयान्तु सद्यो रक्षांसि स
र्वाण्यसुराश्च सर्वे॥ इति पठेत्॥ अपसव्येन विप्रपूजनम्॥ ततो विप्रेष्वश्नत्सु सव्येन प्राङ्मुखः प्रणवव्याहृ
तिपूर्वां गायत्रीं मधुवातेत्यादि ऋचो रक्षोघ्नीऋचः पितृसूक्तादिसूक्तानि अन्यानि पुराणोक्तानि पावनानि स्तो
त्राणि च पठेत्॥ अपसव्येन। मध्वाज्यदुग्धचन्दनकर्मपात्रोदकतिलतुलसीदलयुतमन्नं शाकलवणादि रामः ११

ब्राह्मणाश्च संयता अविमुक्तभाजना दक्षिणोद्धृतजलपात्रा मौनिनः। अपेक्षितमन्नादि अङ्गुल्यादिसंज्ञया दर्शयन्तः
अतिवारिताः अकृतजानुनिपाता अन्तर्जानुकराः परस्परमस्पृशन्तोऽन्नमवलोकयन्तो निःशब्दं भुञ्जीरन्। भोजयित्वा च
इदं मिष्टं इदं स्वादु इत्यादिगुणोच्चारणपूर्वकं प्रीत्याऽन्नं देयं मध्येमध्ये च शीतसुरभि वस्त्रपूतं जलं देयमिति। इदानी
मेव पिण्डकरणमिति पक्षे,

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोस्यकार्योऽग्निसंस्कार इति निषेधात्संस्काराणेन द्वबालानां तथा कुलस्त्रीणां अदृष्टदोषाणां वे संस्कारस्तेषां पात्र स्थप्राक्छिष्टं दर्भेषु यो विकरः स भागः स्यात्। अन्ये तु त्यागिनामिति गर्वादित्यागिनां कुलयोषितामिति। स्यातत्रैणान् कुलयोषितामनूढकन्यानामिति व्याचक्षते। गोविन्दराजस्तु त्यागिनां कुलयोषितामिति स्वकुलं त्यक्त्वा गता नां कुलस्त्रीणाम् ॥

व्यतिरिक्तं मग्नौ करणाशेषसहितं पात्रे कृत्वा विल्वफलोपमान्पिण्डान्षट् पिण्डास्पत्नीस्त्रयं वा कुर्यात्। ततो ब्राह्मणांस्तृप्तान्ज्ञात्वा सव्येन शाकाद्याहाराः क्षमध्वमित्युक्त्वा। सम्यं कृत्वा। भो ब्राह्मणाः युष्मदनुज्ञया विकरप्रदानमहं करिष्ये इति पृष्टे। कुरुष्वेत्यनुज्ञातः अपसव्यं विधाय। नैऋत्यदिशि तिलोदक मभिषिच्य कुशान्निधाय विकरासनं दद्यात्। तिलमोदकं गृहीत्वा॥ ॐ असंस्कृतप्रमीतानां त्या गीनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकरासनम्॥ इति कुशोपरि आसनं दत्वा। घृताक्त मन्नमादाय मोदकं चादाय। ॐ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु पराङ्गतिम्॥ येषां न पचते माता येषां न पचते पिता॥ उच्छिष्टं ये च काङ्क्षन्ति तेभ्योऽन्नं दत्तमक्षयम्।

Nepal Sanskrit University, Dang

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पितृतीर्थेन तदन्नं विकीर्य। पुनस्तिलोदकं निषिच्य। उच्छिष्टभागिभ्यो नमः इत्याचारात् कुशाक्षतैः सम्पू
ज्य हस्तगतपवित्रं त्यक्त्वा पवित्रान्तरे निधाय हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य। आद्यदेशं गत्वा द्विराच
१८ मेत्। वैश्वदेविकद्विजपाणौ सकृदपो दत्वा पुनरपसव्येन पित्रादिमातामहादिब्राह्मणकरे सकृदपो द
118 त्वा। ततः सव्येन प्राङ्मुखः प्रणवव्याहृतिपूर्वां गायत्रीं जपेत्॥ मधुवाता इति ऋचो मधु ३ इति च जप्त्वा वै
श्वदेविकद्विजं पृच्छेत्। भो ब्राह्मणाः अस्मिन्पाकमध्ये यत्किञ्चिद्रोचते तं नीयतां तत्प्राप्त्यर्थं इति पृष्टे रोचिता
स्म इति प्रतिवचः। शेषमन्नं किं क्रियतामिति पृष्टे इष्टैः सह भुज्यतामिति प्रत्युक्तिः। अपसव्येन एवमेव प्र
श्नोत्तरं पित्रादिमातामहादिब्राह्मणयोरपि कुर्यात्। ततो वालुकातुलसीमृदादिभिः पूर्वोत्तरप्रदेशे चतु

पित्रादि विप्रोत्तरप्रदेशे

देशस्य इतिव
कुवचनात्सर्वे
प्रष्टव्याः

राम:
१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रत्नां वेदिंकल्पयित्वा· गोमयोदकेन समुपलिप्य· त्रिभिर्दर्भैः ॐ अपहता असुरा रक्षांᳬसि वेदिषदः
इति दक्षिणाग्रां रेखाद्वयं लिखित्वा· तिलोदकेनाभ्युक्ष्य· ज्वलदुल्मुकं गृहीत्वा। ॐ ये रूपाणि प्रतिमुञ्च
माना असुरा सन्तः स्वधया चरन्ति· परापुरो निपुरो ये भरन्त्यग्निष्टां ल्लोकात्प्रणुदात्यस्मात्। इति वे
द्युपरि भ्रामयित्वा नैर्ऋत्यां दिशि निक्षिपेत्॥ उदकस्पर्शः। ततोऽवनेजनम्। तिलमोदकमादा
य। अद्येहामुकगोत्र अस्मत्पितरमुकशर्मन्वसुस्वरूप सपत्नीक महालयान्तर्गत अमुकपार्वण
श्राद्धे — पीठासनेऽवने निक्ष्व। इति पितृतीर्थेन रेखामूलेऽवनेजनं दत्वा तद्दक्षिणातो रेखाम
ध्ये पितामहाय तद्दक्षिणातो रेखाग्रे प्रपितामहाय दत्वा द्वितीयरेखामूलमध्याग्रेषु मातामह

इति पितृतीर्थेन रेखामूलेऽवनेजं दत्वा· तद्दक्षिणातो रेखामध्ये पितामहाय· तद्दक्षिणतो रेखाग्रे प्रपिता
महाय· द्वितीयरेखामूलमध्याग्रेषु मातामहादित्रिभ्योऽवनेजनं तथैव दद्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिविभ्योऽवनेजनं तथैव दद्यात्। अद्येहामुकगोत्र अस्मत्पितामह अमुकशर्मन् सपत्नीक रुद्रस्वरूपम
१६ हालयान्तर्गत अमुकपार्वणश्राद्धे पिण्डासने ऽवनेनिक्ष्व। अद्येहामुकगोत्र अस्मत्प्रपितामहामुकश
र्मन् सपत्नीक आदित्यस्वरूपमहालयान्तर्गत अमुकपार्वणश्राद्धे इदं पिण्डासने ऽवनेनिक्ष्व। अद्येह अ
मुकगोत्रास्मन्मातामहामुकशर्मन् सपत्नीक वसुस्वरूप·म· अमुकपार्वणश्राद्धे इदं पिण्डासने ऽवनेनि
क्ष्व। अद्येहामुकगोत्रास्मत्प्रमातामहामुकशर्मन् रुद्रस्वरूप·म· अमुकपार्वणश्राद्धे इदं पिण्डासने
ऽवनेनिक्ष्व॥ अद्येहामुकगोत्रास्मद्वृद्धप्रमातामह अमुकशर्मन् सपत्नीक आदित्यस्वरूप·म· अमुक राम:
पार्वणश्राद्धे इदं पिण्डासने ऽवनेनिक्ष्व॥ उपमूलं लूनकुशास्तरणम्। सव्येन पदस्तरणम्। ईशान १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णुकमलासनकार्तिकेयवह्नित्रयार्करजनीगणेभ्याराणाम्। कौन्त्वामोऽपकलशोद्भवकाश्यपानां
पादान्नमामिशिरसापितृमुक्तिहेतोः॥ॐगङ्गायैनमः। ॐगयायैनमः। ॐगदाधरायैनमः। ॐकुरुक्षे-
त्रायनमः। ॐपुष्करायनमः। इतितीर्थानिनत्वा। भोब्राह्मणाःयुष्मदनुज्ञयापिण्डप्रदानमहङ्करिष्ये।
इतिसव्यापसव्येनब्राह्मणांपृष्ट्वा। कुरुष्वेतिप्रतिवचः॥अपसव्येन वामजानुनिपात्य। सतिलमोद
कमादायपिण्डंगृहीत्वा। अद्येह। अमुकगोत्रअस्मत्पितरमुकशर्मन्सपत्नीकवसुस्वरूप। म। अमुक
पार्वणश्राद्धे एषोऽन्नपिण्डोऽमृतस्वरूपोमद्दत्तस्तेस्तुस्वधा॥इदंभूमिर्गयातुल्या। इदमुदकंगङ्गाज
लतुल्यम्। अमुकगोत्रायास्मत्पित्रेऽमुकशर्मणेसपत्नीकायवसुस्वरूपायतस्मैन्नमम॥अद्येहामुक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गोत्रास्मत्पितामहामुकशर्म्मन्सपत्नीकरुद्रस्वरूप स· अमुकपार्वणश्राद्धे एषोन्नपिण्डोऽमृतस्वरूपो म
२० द्दत्तस्तेस्तु। इयं भूमिर्गयातुल्या· इदमु· गङ्गा· अमुकगोत्रायास्मत्पितामहायामुकशर्म्मणे सप· रुद्र·।अद्ये
ह· अमुकगोत्रास्मत्प्रपितामहामुकशर्म्मन्सपत्नीक आदित्यस्व· एषोऽन्नम द्दत्तस्तेस्तु·। इयं भू· इदमु०
120 गङ्गाजल· अमुकगोत्रायास्मत्प्रपितामहायामुकशर्म्मणे सप· आ· स्व·।। अद्येह· अमुकगोत्रास्मन्मातामह
हामुकशर्म्मन्सप· वसुस्व· महालयान्तर्गते अमुकपार्वणश्राद्धे एषोन्नोऽमृतस्वरूप स्तेस्तु। इयं भू· गया·
इदमु· गङ्गा· अमुकगोत्रायास्मन्मातामहायामुकशर्म्मणे सप· वसु०।। अद्येहामुकगोत्रास्मत्प्रमातामह राम:
ह अमुकशर्म्मन् रुद्रस्वमहालये एषोन्नोम द्दत्तस्तेस्तु।। इदं भू· गया· इदमु· गङ्गा· अमुक· अस्मत्प्रमा· अमु २०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क॰सपत्नीकायहदत्तं॰। अद्येहामुकगोत्रास्मत्कृष्णप्रमातामहामुकशर्मन्नादित्यस्वरूप एषोन्नोमद्दत्तमस्तु·
इदंभूमि·इदमुद·गङ्गा· अमुकगोत्रापास्मत्द्वृद्धप्र·अमुक·सपत्नी·आदित्यस्वं॰। ततोलेपभागीनामयं
भागोऽस्तु। इतिलेपभागंदद्यात्· ततः कुशेनहस्तलेपोन्मार्जनम्। वेद्यास्तृतकुशमूलेषुकार्यंतेनत
प्तिर्लेपभाजाम्। वेद्यास्तृतकुशेनहस्तलेपोन्मार्जनंकृत्वा। हस्तगतपवित्रंत्यक्त्वा·पवित्रान्तरेनि
धाय· हस्तौपादौप्रक्षाल्य· सव्येनपिण्डदानाचमनंकृत्वा। अपसव्येनपुष्पाण्यादायोत्थाय। ॐ
अत्रपितरोमादयध्वंयथाभागमावृषायध्वम्· इतिमन्त्रंपिण्डसम्मुखमुक्त्वा·सव्यंविधाय·वामा
वर्तेनोदङ्मुखोभूत्वा·श्वासधारणंयथाशक्तिकृत्वापितॄन्ध्याय·स्वप्रदक्षिणामावृत्य·अपसव्येनपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णसंमुखोभूत्वा ॐ अमीमदन्त पितरो यथाभागमावृषायिषत। इतिमन्त्रमुक्त्वा तानिपुष्पाणि पिण्डोपरि
२१ निक्षिपेत्। ततः प्रत्यवनेजनम्। अद्येहामुकगोत्रास्मत्पितरमुकशर्मन् सपत्नीक वसुस्वरूप महालया-
न्तर्गत·अमुकपार्वणश्राद्धे इदं पिण्डं प्रत्यवनेजने निक्ष्व। अद्येहामुकगोत्रास्मत्पितामहामुकशर्मन्
|२१| सपत्नीक रुद्रस्वरूप महालयान्तर्गत अमुकपार्वणश्राद्धे· इदं पिण्डं प्रत्यवनेजने निक्ष्व। अद्येहामु
कगोत्रास्मत्प्रपितामहामुकशर्मन् सपत्नीक आदित्यस्वरूप मह· अमुक·पा·श्राद्धे इदं पिण्डं प्रत्यव
नेजने निक्ष्व॥ अद्येहामुकगोत्रास्मन्मातामहामुकशर्मन् सपत्नीक व·महालयान्तर्गत अमुकपा॰ एम:
श्राद्धे पिण्डं प्र॰॥ अद्येहामुकगोत्रास्मत्प्रमातामहामुकश॰ सपत्नीक रुद्रस्वरूप महालयान्तर्गत २१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

नमोव इति षट् नमस्काराः इति गदाधरः

अमुकपार्वणश्राद्धेपिण्डेप्र॥अद्येहामुकगोत्रास्य वृद्धप्रमातामहामुकशर्मन्सपत्नीकआदित्यस्वरूप
महालयान्तर्गतअमुकपार्वणपार्वणश्राद्धेपिण्डेप्र॰।इति प्रतिपिण्डप्रत्यवनेजनंदत्वा॰किञ्चिन्नीविं
विस्रंस्योक्षाय्यपुष्पाक्षतै र्नमोव इतिषडञ्जलींकृत्वा।नमोवः पितरोरसायनमोवः पितरःशोखायन
मोवः पितरोजीवयनमोवः पितरःस्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्यवे इत्यन्तैःषड
ञ्जलिंकृत्वा नमोवः पितरः पितरोनमोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मे॥इतिमन्त्रंजप्त्वा॰
एतद्वः पितरोवास इति प्रतिपिण्डं त्रिगुणितंसूत्रंदद्यात्।ततः स्वजपात्रोदकेन प्रतिपिण्डमूर्जं
कराणाम्।ॐ ऊर्जंवहन्तीरमृतंघृतंपयःकीलालंपरिस्रुतम्।स्वधास्थतर्पयतमेपितॄन्।त्रिरावृत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सव्येनदेवताभ्यइतित्रिर्जपः।भोब्राह्मणायुष्मदनुज्ञयापिण्डार्चनमहंकरिष्ये।इतिपृष्टेकुरुष्वेत्य
२२ नुज्ञातः।अपसव्येनपिण्डपूजनम्।पितृभ्यःस्वधायिभ्यःस्वधानमःपितामहेभ्यःस्वधायिभ्यःस्वधान
मःप्रपितामहेभ्यःस्वधायिभ्यःस्वधानमः॥अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरःपितरःशुन्ध
L22 ध्वम्।पुनन्तुमापितरःसोम्यासःपुनन्तुमापितामहाःपुनन्तुप्रपितामहाः॥पवित्रेणशतायुषा।पुन
न्तुमापितामहाःपुनन्तुप्रपितामहाः।पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै।इतिमन्त्रेणपूजयेत्पि
ण्डस्थपितृभ्योऽर्घंनमः।सुगन्धंनमः।अक्षताःपुष्पाणिधूपंदीपंनैवेद्यंताम्बूलंपूगीफलम्‌·वस्त्रंय- राम:
ज्ञोपवीतम्‌दक्षिणांतुलसीदलादीनिसमर्पयामिनमः सजलमोटकमादाय।अद्येहामुकगोत्राः २२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

स्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपास्तथाऽमुकगोत्राः
अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकशर्माणः सपत्नीका वसुरुद्रादित्यस्वरूपा म
हालयान्तरगत अमुकपार्वणश्राद्धे पिण्डार्चनविधौ इमानि गन्धाक्षतपुष्पधूपदीपनैवेद्यवस्त्रय
ज्ञोपवीत ताम्बूल पूगीफल आभूषण तुलसीदलादीनि यथाशक्त्युपकल्पितानि यथाविभागं वः स्व
धा· भो ब्राह्मणा पिण्डार्चनविधेः सर्वं परिपूर्णमस्तु। अस्तु परिपूर्णमिति प्रतिवचः॥ हस्तगतपवि
त्रे त्यक्त्वा पवित्रान्तरे निधाय। सव्येनाचम्य। अपसव्येन पिण्डाग्रभूमौ सुप्रोक्षितमस्तु। इति संप्रोक्ष्य॥
वैश्वदेविकाद् ब्राह्मणात्र हस्ते पृथक्पृथक्सव्यापसव्येन जलं दद्यात्॥ अपां मध्ये स्थिता देवाः सर्वमप्सु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिष्ठितम्। ब्राह्मणास्यकरेन्यस्ताःशिवाआपोभवन्तुमे॥ इत्युक्तेभवन्तुशिवापइतिविप्रोक्तिः।पुनस्ते
२३ षांहस्तेपुष्पम्॥ लक्ष्मीर्वसतिपुष्पेषुलक्ष्मीर्वसतिपुष्करे। लक्ष्मीर्वसतिसदागोष्ठेसौमनस्यंसदास्तु
मे॥ अस्तुसौमनस्यमिति प्रतिवचः। पुनस्तेषांहस्तेऽक्षतांदद्यात्॥ अक्षतंचास्तुमेनित्यंशान्तिर्वृद्धि
123 र्यशोऽस्तुमे॥ यच्छ्रेयस्करंलोकेतत्तदस्तुसदामम। इत्युक्तेऽक्षतंचारिष्टमस्त्विति प्रतिवच स्ततःसव्येन
प्राङ्मुखः। कर्मपात्रोदकेनकुशैर्मूर्द्धाभिषेकः। अस्मत्कुलेदीर्घमायुरस्तु· अस्त्वितिसर्वत्रप्रतिवचः·
शान्तिरस्तु·पुष्टिरस्तु· वृद्धिरस्तुयच्छ्रेयस्तदस्तु·यत्पापंरोगः शोकोदुःखं दारिद्र्यं तत्प्रति हतमस्तु इति रामः
भूमौनिषिञ्च्य·अमृताभिषेकोऽस्तु· इति· पुनःशिरसि अभिषिञ्चेत्। ततः अक्षय्योदकदानम्॥ २३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यवकुशजलान्यादाय। अद्येहामुकगोत्राणामस्मत्पित्रादित्रयश्राद्धसम्बन्धिनां तथाऽमुकगोत्राणामस्मन्मातामहा
दित्रयश्राद्धसम्बन्धिनां पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानां महालयान्तर्गत अमुकपार्वणश्राद्धे
इदमन्नोदकादियद्दत्तं तदक्षय्यमस्तु· अस्तु अक्षय्यमिति प्रतिवचः। अपसव्येन जलमोटकं गृहीत्वा·
अद्येहामुकगोत्रस्यास्मत्पितुरमुकशर्मणः सपत्नीकस्य वसुस्वरूपस्य महालयान्तर्गत अमुकपार्वण
श्राद्धे इदमन्नोदकादियद्दत्तं तदक्षय्यमस्तु· अस्तु अक्षय्यमिति विप्रोक्तिः॥ पिण्डोपरि जलम्॥
ब्राह्मणहस्ते मोटकम्। अद्येहामु॰ गोत्रस्य॰ अस्मत्पितामहस्यामुकशर्मणः सपत्नीकस्य रुद्र॰ म·
हालया॰ अमुकपार्वणश्राद्धे इदम॰ तदक्षय्यमस्तु· अस्त्वक्षय्यमिति। अद्येहामुकगोत्रस्यास्मत्प्रपिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महस्यामुकशर्मणः सपत्नीक आदित्यस्वरूप महालयान्तर्गत अमुकपार्वणश्राद्धे इदमन्नं तदक्ष
य्यमस्तु अस्तु अक्षय्यम्॥ मातामहादि द्विजकरे दत्वा। अद्येहामुकगोत्रस्यास्मन्मातामहस्या
२४ मुक० सपत्नी० वसुस्वरूप महालयान्त० अमुकपार्वण श्राद्धे इदमन्न० तदक्षय्य० अस्तु अक्षय्य०
१२४ अद्येहामुकगोत्रस्यास्मत्प्रमातामहस्यामुकशर्मणः सपत्नीक रुद्रस्वरूपमहालयान्तर्गतअ
मुकपार्वणश्राद्धे इदमन्नं तदक्षय्यमस्तु अस्त्वक्षय्यं॥ अद्येहामुकगोत्रस्यास्मद्वृद्धप्रमाता
महस्यामुकश० सप० आदित्यस्वरूप० महालयान्तर्गत अमुकपा० श्राद्धे इदम० तदक्षयम
स्तु अस्त्वक्षयम्॥ सव्येनाऽऽशीर्ग्रहणम्॥ ॐ अघोराः पितरः सन्तु इत्युक्ते सन्त्विति प्रतिवचः। राम: २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ गोत्रंनोवर्धन्तांदातारोनोभिवर्धन्तां॰ वर्द्धन्तांवेदाः॰ वर्द्धन्तां२ सन्ततिर्वर्द्धन्तां२ अश्वाचनोमाव्य
गमत्॰ माव्यमत्। बहुदेयंचनोस्तु॰ अस्तु॰ अन्नंचनो बहुभवेत्॰ भवतु॰ अतिथींश्चलभेमहि न
मध्वम्॰ याचितारश्चनःसन्तु॰ सन्तु। मायाचिष्मकंचन मायाचेथाः॥ इत्येताएवाशिषःसत्यास
न्तु। इत्याशिषंप्रतिगृह्य॰ अपसव्यादिविधाय। स्वधावाचनीयान्कुशान्[illegible]जपात्रोपरिस्थिता
न्पिण्डेषु दक्षिणाग्रांश्चास्तीर्य। भोब्राह्मणायुष्मदनुज्ञया स्वधांवाचयिष्ये इति पृष्टे वाच्यता
मिति विप्रोक्तिः। सतिलमोदकमादाय॥ अद्येहामुकगोत्रेभ्योऽस्मत्पितृभ्योऽमुकशर्मभ्यः सप
त्नीकेभ्यो वसुस्वरूपेभ्योमहालयान्तरगतअमुकपार्वणश्राद्धेब्राह्मणानामधुरस्वधोच्यतामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिविप्रकोरजलम्· पितृभ्योऽक्षम्॥ अस्तुस्वधेति प्रतिवचनम्॥ अद्येहामुकगोत्रेभ्योऽस्मत्पितामहे-
२५ भ्योऽमु·शर्मभ्यः सपत्नीकरुद्ररूप·महालयां· अमुकपार्वणश्राद्धेब्राह्मणामध्युर अस्तु। अद्येहा
मुकगोत्रेभ्योऽस्मत्प्रपितामहेभ्योऽमुकश०सपत्नीकआदित्यमहालयां०अमुकपा०श्राद्धेब्रा०॥ अद्येहामु
125 कगोत्रेभ्योऽस्मन्मातामहेभ्यः सप०वसु०महालयान्तरगत अ०पा·श्राद्धेब्रा०॥ अद्येहामुकगोत्रेभ्यो
स्मत्प्रमातामहेभ्यः सप०रुद्र०महालयां· अमुकपा श्राद्धेब्रा०॥ अद्येहामुकगो०अस्मद्वृद्धप्रमाता
महेभ्योऽमुकश०आ०स्वरूपेभ्यो महालयां·अमुकपा०श्राद्धेब्राह्मणा· अस्तु॥ ततः स्वधावाचनीय राम:
कुशेषु स्वङ्गपात्रेणार्घ्येन पितृतीर्थेन प्रतिपित्राऽमूर्जकरणम्। ततोदुग्धेन ऊर्जकरणम्॥ ॐ ऊर्जं २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधास्थतर्पयमे पितॄन्॥ विरावृत्तिः। अर्घपात्रमुत्तानं कृ
त्वा। ततः सव्यं विधाय पितृमातामहब्राह्मणदक्षिणा सङ्कल्पः। देयद्रव्यं संप्रोक्ष्य संपूज्य। हिरण्य
गर्भगर्भस्थं हेमबीजं विभावसोः अनन्तपुण्यफलदमतः शान्तिं प्रयच्छमे॥ तिलमोदकमादाय।
ॐ विष्णुरित्यादि देशकालौ सङ्कीर्त्यामुकगोत्राणामस्मत्पितृपितामहप्रपितामहानां अमुका
मुकशर्मणां वसुरुद्रादित्यस्वरूपाणां तथाऽमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमा
तामहानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामक्षय्यतृप्तिकामनया
कृतस्य महालयान्तर्गत अमुकपार्वणश्राद्धस्य साङ्गतासिद्ध्यर्थं न्यूनातिरिक्तपरिपूर्णार्थमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मो रजतनिष्कयीभूतां दक्षिणां ताम्रमादित्यदैवतं पितृमातामहब्राह्मणाभ्यां यथाभागं संप्रददे तत्स

न्नमम सङ्कल्पः ॥ पुन वैश्वदेविकद्विजाय । देयद्रव्यं संप्रोक्ष्य सम्पूज्य । यवकुशजलान्यादाय ॥ ॐ अ

२६ द्येहेत्यादिदेशकालौ संकीर्त्य अमुकगोत्रास्मत्पित्रादित्रयश्राद्धसंबन्धिनां तथामुकगोत्रास्मत्

128 मातामहादित्रयश्राद्धसंबन्धिनां पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानां कृतस्य महालयान्तर्ग

तअमुकपार्वणश्राद्धस्य साङ्गतासिद्ध्यर्थं न्यूनातिरिक्तपूर्त्यर्थमिमां सुवर्णनिष्कयीभूतं द्रव्यं

ताम्रमादित्यदैवतं वैश्वदेविकब्राह्मणाय तुभ्यमहं संप्रददे तत्सन्न मम तथेमां भूयसीं दक्षि राम:

णाञ्च रजतं चन्द्रदैवतं ताम्रं श्रीसूर्यदेवताकं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यः २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आवाहनं स्वधाशब्दः पिण्डोऽग्नौकरणं तथा। विकिरं पिण्डदानं च साङ्कल्पे श्राद्धे विवर्जयेत्। साङ्कल्पन्तु यदा कुर्यान्नकुर्यात्पात्रपूरणम्। पात्रपूरणमित्यस्य हस्तार्घपात्रस्येति शेषः (इति संवर्त्तः)

कन्याकुमारेभ्यः सुवासिनीबालणीभ्यश्च यथायथा विभागं विभज्य दानमहमुत्सृजे॥ इति दक्षिणा। हस्तगतपवित्रे त्यक्त्वा पवित्रान्तरे निधाय। स्वतिलकम्॥ सत्यानुष्ठानसम्पन्नाः सर्वदा यज्ञवृद्धयः॥ पितृमातृपराश्चैव सन्त्वस्मत्कुलजा नराः॥ विशेषपूजा॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छन्तु यथा राज्यं नृणां पितृपितामहाः॥ आयुः पुत्रान्यशः स्वर्गं कीर्तिं पुष्टिं बलं श्रियम्। पशुं सुखं धनं धान्यं प्राप्नुयात्पितृपूजनात्॥ इहास्माकं शिवं शान्तिरायुरारोग्यसम्पदः। वृद्धिः सन्तानवर्गस्य जायतामुत्तरोत्तरा॥ अपसव्येन। पितामहपिण्डमुत्थाप्य सव्येन स्थाल्यां निधायाऽवजिघ्रेत्॥ पिण्डस्थाने शङ्खचक्रादिकं विलिख्य शङ्खायनमः। चक्रायनमः। इति गन्धपुष्पाक्षतैः संपूज्य। तत्र दीपं संस्थाप्य जलेनाभ्युक्ष्य गन्धाक्षतैः

आवश्यकोपवासे प्राप्ते पितृसेवितं श्राद्धशिष्टमाघ्रायोपवसेत्। तथा च श्रुतिः। अवघ्रेयमेव तन्नैव प्राशितं नैवाप्राशितमिति, २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संपूज्य·ॐ वसन्ताय नमः।ग्रीष्माय नमः·वर्षाभ्यो नमः·शरद्भ्यो नमः·हेमन्ताय नमः·शिशिराय नमः।इति षड्
२१ तूनमस्कृत्य·अस्कन्नमम्पुष्प·अञ्जलिं बध्वा।यान्तु पितृगणाः सर्वे यतस्थानादुपागताः॥सर्वे ते हृष्टमन
सः सर्वान्कामान्ददातु मे॥ये लोका दानशीलानां ये लोकाः पुण्यकर्मणाम्॥सम्पूर्णां सर्वभोगैस्तु तान्व्रजध्वं
127 सुपुष्कलाम्॥ततो दीपस्थाने दीपः।अपसव्येन पिण्डस्थाने पिण्डम्।हस्तगत पवित्रं त्यक्त्वा पवित्रान्तरे निधा
(पिण्डोपरि) य।ततः कर्मपात्रोदकेन·खड्गपात्रेण तर्पणम्॥यः कश्चित्पितृरूपेण तिष्ठते परमेश्वरः।सोयं श्राद्धप्रदानेन
तृप्तिं लभतु शाश्वतिम्॥गयायां पिण्डदानेन स्वयमेको जनार्दनः॥यं दृष्ट्वा पुण्डरीकाक्ष मुच्यते च ऋणात्रयात्। रामः
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः॥यत्र यत्र स्मरिष्यामि पितॄणां दत्तमक्षयम्।शमीपत्र प्रमाणेन पिण्डं २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमावास्यां क्षयो यस्य पितृपक्षेऽथवा पुनः। सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्वणो विधिः॥

दद्यादुद्याङ्गिरे। उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतम्॥ पितुः शतगुणं पुण्यं सहस्रं मातुरुच्यते। भगिन्यां शतसा
हस्रं सोदर्ये दत्तमक्षयम्॥ तिलकुशजलान्यादाय। अद्य दिनेऽपरमपि आमं पक्वं हिरण्यमुदयास्तपर्यन्तं पद
त्तं यद्धस्येन तत्स्वर्गद्वारे स्मृतीभूय वः स्वधा। सव्येन देवताभ्य इति त्रिर्जपः अपसव्येन सप्तव्याधेति पठेत्। मनसा
च पितॄन्मातामहांश्चात्वा सव्येन विसर्जयेत्। अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामु
कशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथामुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमाताम
हानाममुकामुकशर्मणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणामक्षय्यतृप्तिकामनया विहितं पुरूरवार्द्रव
संज्ञकविश्वेदेवपूर्वकमिदं महालयान्तर्गतममुकपार्वणश्राद्धं मया विधिहीनं देशहीनं कालहीनं श्रद्धाहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ वाजे वाजे इति पितृपूर्वं विसर्जयेदिति याज्ञवल्क्यः २

आसनं पिण्डदानञ्च पुनः प्रसवने जनम्। दक्षिणा चान्नसङ्कल्पं तीर्थश्राद्धेष्वयं विधिः

नं भावहीनं दक्षिणाहीनं वाक्यहीनं यत्कृतं तत्सुकृतमस्तु। यन्न कृतं तन्न पितॄणां प्रसादाद्ब्राह्मणवचनात्सर्वं परि

२८ पूर्णमस्तु। अस्तु परिपूर्णमिति प्रार्थ्य। नीविं विस्रंस्य। अपसव्येन कुशाग्रेण पितृब्राह्मणं पृष्ट्वा। ॐ वाजे वाजे

वत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः। इति प

128 ठित्वा सव्येनोत्थापयेत्॥ ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे उप प्रयान्तु मरुतः सुदानव इन्द्र प्राशुर्भवा स

चा। इति पितृपूर्वकं ब्राह्मणानुत्थाप्य। ताम्बूलादि दत्वा। अञ्जलिं बध्वा प्रार्थयेत्॥ अद्य मे सफलं जन्म भवत्पाद

दिवन्दनात्। अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद्दिवम्॥ पत्रशाकादिदानेन क्लेशितायूयमीदृशाः। तत्क्लेशजा एपः

नाचित्तात्तु विस्मृत्य क्षन्तुमर्हथ॥ इति प्रार्थ्य॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः। श्राद्धं सम्पूर्णतां या २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आमन्त्रितस्तु यो विप्रोभोक्तुमन्यत्रगच्छति· नरकाणांशतंगत्वाचाण्डालेष्वभिजायते,

तुप्रसादाद्भवतांमम इतियजमानोक्तेः स्तुपरिपूर्णमिति विप्रोक्तिः।ततोब्राह्मणेभ्य आशिषंगृहीत्वा।कर्म
पात्रंपित्वा।ॐआमावाजस्यप्रसवोजगम्यादेवेद्यावापृथिवीविश्वरूपे।आमागन्तांपितरामातराचामासोमो
अमृतत्वेनगम्यताम्।इतिकर्मपात्रंभ्रामयित्वा विप्रपादाभ्यांन्युब्जंसंस्थाप्य।गन्धाक्षतपुष्पैर्न्युब्जकर्मपात्रा
पनमइति संपूज्य।उत्तानपात्रंकृत्वा।अच्छिद्रमस्तु इतियत्किञ्चिज्जलंदत्वा।कुशद्विजशिखांविमोचयेत्
ॐमुञ्चन्तुमासपथ्यादथोवरुण्यादुत।अथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात्।।तद्धस्तेजलंगृहीत्वा·
ऊर्द्धंक्षिपेत्।पिरलोपरिपातयेत्।ॐश्रीन्समुद्रान्समसृपत्स्वर्गाल्लपांपतिर्वृषभइष्टकानाम्।।पुरीषंवसा
नःसुकृतस्यलोकेतत्रगच्छपत्रपूर्वेपरेता।।इति कुशान्पिरोऽपातयेत्।ततःपारिणाद्दीपंनिर्वाप्य।हस्तग

पित्रादिनामस्थानेतु·पितामहप्रपितामहेत्येवंब्रूयात्नामोच्चारयेदित्याश्वलायनः, शाखान्तरेतु·पितॄणांप्रः
स्थानेपृथिवीषदिति, पितामहस्थानेन्तरिक्षषदिति·प्रपितामहस्यादिविषदिति नामोच्चार्य·गोत्रस्यच
पारिस्थानेकाश्यपं गोत्रमुच्यते.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदंचभार्यायांरजस्वलायांपञ्चमेऽह्निकुर्यात्

तपवित्रेत्यक्त्वापवित्रान्तरेनिधाय। हस्तौपादौपादौप्रक्षाल्य। यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु।
न्यूनंसम्पूर्णतांयातुसद्योवन्देतमच्युतम्॥ अच्युतायनमः॥३॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुच। स्म
रणादेवतद्विष्णोःसम्पूर्णंस्यादितिश्रुतिः। चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपञ्चभिरेवच॥ हूयतेचपुनर्द्वाभ्यांत
स्मैयज्ञात्मनेनमः॥ ॐ कायेनवाचामनसेन्द्रियैर्वाबुद्ध्यात्मनावानुसृतेस्वभावात्। करोमियद्यत्सकलंपरस्मैना
रायणायेतिसमर्पयामि॥ अनेनकर्मणाश्रीभगवान्यज्ञपुरुषःप्रीतोऽस्तु· इतिश्राद्धफलंनिवेद्य। [illegible]वंकुर्यात्। ततइष्टैःसहभुञ्जीत॥ पितृस्वरूपीनारायणः
॥ इतिपार्वणश्राद्धविधिः॥ ॥ ॥ ॥शुभम्॥ श्राद्धः

२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशायनमः॰ अथएकोद्दिष्टश्राद्धप्रारंभः ॥ ॥कर्त्तासांगणेशदीपंप्रज्वा
 ल्य॰ आचम्य॰ अपसव्यंकृत्वा॰ ताम्बूलादिकं विप्रकरेदत्वा दक्षिणाभिमुखः
पितृब्राह्मणवामजानुंस्पृष्ट्वा निमंत्रयेत्॰ ॥ ॥ॐअद्यकाश्यपगोत्रस्यअ
स्मत्पितुः रौद्रप्रतापवीरविक्रमवर्मणः वसुस्वरूपस्य अद्यकर्त्तव्यसांवत्सरि
केकोद्दिष्टश्राद्धे अनेनतांबूलगन्धपुष्पादिनात्वंमयानिमंत्रितः॰ ॐनिमं
त्रितोस्मीतिप्रतिवचनम्॰ ॥ ॥अंजलिंबध्वा॰ अक्रोधनैः शौचपरैः सततंब्र
ह्मवादिभिः॰ भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणा॰ सर्व्वायासविनिर्मु

L30

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रैः कामक्रोधविवर्जितैः । भवितव्यं भवद्भिर्नो यतने श्राद्धकर्मणि ॥२॥
भवितव्यमिति प्रतिवचनम् । ततः ब्राह्मणचरणौ प्रक्षालयेत् ॥ ॥ ॐ नमो
स्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरु
षाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥१॥ यत्फलं कपिलादाने का
र्तिक्यां ज्येष्ठपुष्करे । तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने ॥ ॥ अद्य (मोटकमादाय)
काश्यपगोत्रः अस्मत्पितः रौद्रप्रतापवीरविक्रमवर्मन् वसुस्वरूप अत्र
श्राद्धे एष पादार्घस्ते स्वधा ॥ ॥ ततः सव्येन आचम्य । अपसव्येन ॐ आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 गतायूयम्· ॐसुस्वागतावयम्· इदमासनमास्यताम्· ॐआस्येइति
 प्रतिवचनम्· ॥ ब्राह्मणं उदङ्मुखं उपवेशयेत्· ॥ ॥ॐकर्मपात्रम
हं करिष्ये· ॐकुरुस्व· इत्यनुज्ञातः भूमौ शंखचक्रं लिखित्वा तदुप
रिआसनम्· आसनोपरीपात्रम्· तदुपरिपवित्रम्· ॐपवित्रेस्थोवैष्ण
व्यौसवितुर्वः प्रसवउत्पुनाम्यछिद्रेण पवित्रेण सूर्यस्यरश्मिभिः इ
तिमंत्रेण· ॥ शन्नोदेवीरितिजलम्· ॐशन्नोदेवीरभिष्टयआपोभ
वन्तुपीतये· शंयोरभिस्रवन्तुनः इति· ॥ तिलोसीतितिलान्· ॐति

.131

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धं- ॐ गन्धद्वारान्दुराधर्षा न्नित्यपुष्टां करीषिणीम् ॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
अक्षतान् ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ॥ अस्तोषत स्वभानवो विप्रा नविष्ठया मती सोमाभिषुतं हविः ॥

त्नोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄन्
लोकान् प्रीणाहि नः स्वाहा इति यवोसीति यवान् ॐ यवोसि यवयास्म
द्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पि
तृषदनाः पितृषदनमसि इति ॥ ततो गंधपुष्पादिकं क्षिपेत् ॐ यद्देवाद
तिकंडिकाद्वयेन कर्मपात्रं कर्तव्यम् ॐ यद्देवा देवहेडनं देवासश्चकृमा
वयम् अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः १ यदि दिवा यदि नक्त
मेनांसि चकृमा वयम् वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः २ ॥
पुष्पं ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषा
णामुम्म इषाण सर्वलोकम्म इषाण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री·श्रा· यदिजाग्रद्यदिस्वप्नस्नाथं सिंचन्तु मावयम्· सूर्योमा तस्मादेनसो विश्वा
२ न्मुञ्चत्वंहसः· २ ततः कुशोदक(सर्व्वेन)सहितं कर्मपात्रोदकमादाय· ॐ अप
वित्रः पवित्रोवासर्वावस्थांगतोपिवा· यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्य
132 न्तरः शुचिः· ॐ पुंडरीकाक्षः पुनातु· अत्युक्ता श्राद्धदेशे द्रव्याणि आ
त्मानश्चसिंचेत्· ततः कुशादिकमादाय· ॐ अद्येह काश्यपगोत्रस्य अ
स्मत्पितुः रौद्रप्रतापवीरविक्रमवर्मणः वसुस्वरूपस्य अद्यकर्तव्य सा एम:
म्वत्सरिकैकोद्दिष्टश्राद्धमभिर्द्रव्यैरहं करिष्ये· ततः प्राणायामं कुर्यात्॥ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः अञ्जलिं बध्वा पठेत् । ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । न
मः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ ३ ॥ सप्त व्याधा दशार्णेषु मृगाः
कालंजरे गिरौ । चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे । तेपि जाताः कुरुक्षे
त्रे ब्राह्मणा वेदपारगाः । प्रस्थिता दूरमध्वानं यूयं किमवसीदथ । श्राद्धारम्भे
गयां ध्यात्वा ध्यात्वा देवं गदाधरम् । ताभ्यां चैव नमस्कृत्य ततः श्राद्धं समारभे
त् । ॥ ॥ ततोऽपसव्येन । दिग्बन्धनं कुर्यात् । तिलसहितमोदकमादाय । पूर्वा
दिक्क्रमेण तिलान् विकिरेत् । ॐ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिशम्‌. अपहता असुरा रक्षां छ सि वेदिषदः ॥ पूर्वे ॥ ॥ नथा वर्हिषदः पा
नु याम्यां ये पितरः स्थिताः । अपहता असुरा रक्षां छ सि वेदिषदः । दक्षिणे ॥ ४
ॐ प्रतीचीमाज्यपास्तद्वत्‌ अपहता असुरा रक्षां छ सि वेदिषदः । पश्चिमे ॥ ॥
ॐ उदीचीमपि सोमपाः. अपहता असुरा रक्षां छ सि वेदिषदः. उत्तरे ॥ ॥ ॐ ऊ
र्ध्वेन स्त्वर्यमा रक्षेत्‌. अपहता असुरा रक्षां छ सि वेदिषदः । ऊर्ध्वे ॥ ॥ ॐ कव्य
वाडनलोप्यधः. अपहता असुरा रक्षां छ सि वेदिषदः । अधः ॥ ॥ सम्‌ः सर्वतः
सिद्धान्‌ क्षिपेत्‌. रक्षोभूतपिशाचेभ्यस्तथैवासुर दोषतः । सर्वतश्चाधिपस्तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमोरक्षांकरोतुमे ॥ ॥अथनीविबन्धनम् ॐ निहन्मिसर्वंयदमेध्यवद्भवे
त् हताश्चसर्वेसुरदानवामया। रक्षांसियक्षाः सपिशाचगुह्यका हतामया
यातुधानाश्चसर्वे ॥ कुशापत्रत्रयसहितान् तिलान् दक्षिणस्यांक्षिपेत् ॥
ॐ प्रयान्तुदूरतः सर्वेदैत्येयादानवास्तथा सर्वविघ्नोपशांत्यर्थंक्षिपामि
चकुशान् तिलान् ॥ ॥ ततः सव्येन विष्णुस्मरणम् ॥ अपसव्येन ॥ ॥आस
नम् मोदकमादाय ॐ अद्येह काश्यपगोत्रस्य अस्मत्पितुः रौद्रप्रतापवी
रविक्रमवर्मणो वसुस्वरूपस्य इदमासनन्ते स्वधा। इति मोदकरूपमासनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री·श्री· दद्यात्॥ मन्त्रः हस्तार्घपात्रमहं करिष्ये· ॐ कुरुष्व· इत्यनुज्ञातः मन्त्र·॥ ॥एकं पुट
२. कमध्येकृत्वा·मन्त्र· ॐ पवित्रेस्थो वैष्णव्यौ मवितुर्वः प्रसवउत्पुनाम्यच्छिद्रेण
पवित्रेणसूर्यस्यरश्मिभिः· इति पूर्वाग्रं पवित्रं धारयेत्· ॐ शन्नो देवीरभि
134 ष्टयआपोभवन्तुपीतये· शंयोरभिस्रवन्तुनः· इति जलम्· ॐ तिलोसि सो
मदैवत्यो गोसवो देवनिर्मितः।प्र त्नमद्भिः पृक्तः स्वधयापितॄन् लोकान्
प्रीणाहिनः स्वाहा· इति तिलान्। श्रीश्चतेलक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वेन एम:
क्षत्राणिरूपमश्विनौव्यात्तम्· इष्णन्निषाणामुम्मइ आणसर्वलोकम्मइ २.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धारण· इति उपचारः। गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम्· ईश्वरीं
सर्वभूतानान्तामिहोपह्वये श्रियम्· इति उपचारः· ॐ हस्तार्घपात्रं संपन्नम्·
इति ब्राह्मणं पृच्छेत्· ॐ सुसंपन्नमिति उक्ते सति· ॐ हस्तार्घपात्रमुत्थापया
मि· उत्थापयस्व· इति उक्ते सति· हस्तार्घपात्रं वामहस्ते कृत्वा· ॐ नमो ना
रायणाय· इतिमंत्रेण पुष्पसहितं पवित्रं उत्तराग्रं धृत्वा· वामकरस्थहस्ता
र्घपात्रमुखं दक्षिणकरेण पिधाय· ॐ या दिव्या आपः पयसा संबभूवु
र्या अन्तरिक्षा उत पार्थिवीर्याः· हिरण्यवर्णा यज्ञियास्तान आपः शिवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्री·श्रा· सर्व॰ स्योना सुहृवा भवन्तु · इतिमंत्रेण अर्घपात्रस्थजलमभिमंत्र्य · मोटक
६ मादाय · अद्य काश्यपगोत्र अस्मत्पितः रौद्रप्रतापवीर विक्रमवर्मन् व
सुस्वरूप अद्य कर्तव्य सांवत्सरिकैकोद्दिष्टश्राद्धे एषहस्तार्घस्ते स्वधा ·
135 इति ब्राह्मणकरे अर्घं दद्यात् · ॐ अर्घं प्रत्यर्घमस्तु · तदर्घपात्रं भूमौ धृत्वा ·
॥ सव्यं कृत्वा · तज्जलेन · ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् · पश्ये
मशरदः शतं जीवेम शरदः शतं॰ शृणुयाम शरदः शतं प्रब्रवाम शरदः राम:
शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् · इति चक्षुः स्पर्शः ॥ ६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा-
नमः ॥ अक्षन्न् पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ॥

अपसव्यं कृत्वा · ब्राह्मणस्य वामपार्श्वे · ॐ पित्रे स्थानमसीति न्युब्जं कुर्यात्
तदुपरि कुशत्रयं दद्यात् · नमः ॐ अर्चयिष्ये · ॐ अर्चय · स्वयुके · जल
चन्दन पुष्पाक्षत तांबूल यज्ञोपवीत वस्त्रादिभि ब्राह्मणं संपूज्य · धूपदीपौ च
कारयेत् · ॥ ।मोटकमादाय · ॐ अद्येह काश्यपगोत्र अस्मत्पितः रौद्रप्रता
पवीर विक्रमवर्मन् वसुस्वरूप अत्र श्राद्धे एतानि अर्चनानि अत्र गंधपुष्पा
क्षत धूपदीप तांबूल यज्ञोपवीत द्रव्य वासांसि ते स्वधा · ॥ नमः अर्चनवि
धेः सर्वपरिपूर्णमस्तु · इति जलं दद्यात् · ॐ अस्तु परिपूर्णम् · ततो वामाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्री·श्रा· नैनत्ति कोणामसडलंविधाय·॥ सव्येन आचम्य· अपसव्येन·॥ ॥भूस्वा
८ मी· तिलघृतमधुजलयुतं अन्नं मोदकंचादाय· ॐइदमन्नं सजलं एतद्
भूस्वामि पितृभ्योनमः· इतिभूमौ निक्षिपेत्·॥ ॥अथान्नसंकल्पः· सोप
स्करं तिलजलयुतं अन्नं उपनीय मधुनाभिघार्य· अधोमुखाभ्यां व्यस्ताभ्यां
136 पाणिभ्यामन्नपात्रमालभ्य· ॐ पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्यमु
खे अमृते अमृतं जुहोमिस्वाहा· ॐइदं विष्णुर्विचक्रमे त्रेधानिदधेपदम्·
समूढमस्यपांसुरेस्वाहा· इतिपठित्वा· विप्रदक्षिणाङ्गुष्ठं गृहीत्वा· ॐ रामः ७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदमन्नम्· ॐ इमा आपः· ॐ इदमाज्यम्· ॐ इदं हविः· ॥ एतान्युपकरणा
नि· इति तिलान् विकीर्य· ॐ अपहता असुरा रक्षा ᳦ सि वेदिषदः· इति पठि
त्वा· ॥ मोटकमादाय· वामहस्ताङ्गुष्ठाङ्गुलिभिः क्रमेण अन्नं अपश्च स्पृष्ट्वा·
ॐ अद्य काश्यपगोत्राय अस्मत्पित्रे रौद्रप्रतापवीरविक्रमवर्मणे वसुस्वरू
पाय अत्र श्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेष्यमाणं अक्षय्य
तृप्तिहेतोस्ते स्वधा· इति ब्राह्मणसमीपे उत्सृजेत्· ॐ अन्नसंकल्पसि
द्धिरस्तु· भवान् प्राशयतु· इति ब्राह्मणकरे अपोशानं दद्यात् ॥ सव्येन· ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री·श्रा· आद्यकर्मांकुशोपरिविशन् पठेत् · ॐ मधुवाताऋतायते मधुक्षरन्ति सिन्धवः·
८ माध्वीर्न्नः सन्त्वोषधीः · मधुनक्तमुतोषसो मधुमत्पार्थिवर्ठ॑ रजः ॥ मधुद्यौर
स्तु नः पिता · मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः · माध्वीर्गावो भवन्तु नः·
ॐ मधु ॐ मधु ॐ मधु · ॥ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् · तत्स
137 र्वमछिद्रमस्तु भास्करस्य प्रसादतः ॥१॥ नमस्तुभ्यं विरूपाक्ष नमस्ते नेकच
क्षुषे · नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥२॥ पिन्तृस्तकं च पठेत् · ॥ ॥
नन : कर्मपात्रसन्निधौ गत्वा आस्तृन दक्षिणाग्रकुशत्रयायां भूमौ विक रामः
८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रासनम्। अपसव्येन। मोदकमादाय। असंस्कृतप्रमीतानांत्यागिनांकु
लयोषिताम्। उच्छिष्टभागधेयानां दर्भेषुविकिरासनम् ॥१॥ इतिविक
रासनम्॥ ॥मधुघृततिलयुतमन्नं आदायजलेनाप्लाव्य। मोदकमा
दाय। अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम। भूमौदत्तेनतृप्यंतुतृप्ता
यान्तुपरांगतिम् ॥१॥ इतिआसनोपरिविकरंदद्यात् ॥ ॥ततःकुशान्
परित्यज्यहस्तौपादौप्रक्षाल्य। सव्येन। द्विराचम्य। गायत्रींजपेत्।
ॐ मधुवाताऋतायतेमधुक्षरन्तिसिन्धवः। माध्वीर्नःसंत्वोषधीः। म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री·षा· धुनक्तमुतोषसोमधुमत्पार्थिवं रजः . मधुद्यौरस्तुनः पिता . मधुमान्नोव
९ नस्पतिर्मधुमाँ२ अस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनः ॥ ॐ मधु३ इतिपठेत् .
॥ ॥ अपसव्येन . ॐ जलगण्डूषमिदन्ते . इतिब्राह्मणाय प्रत्यपोशानं दद्या
138 त् . ॥ अंजलिंबध्वा ब्राह्मणान्पृच्छेत् . ॐ स्वदितम् . ॐ सुस्वदितम् . ॐ
तृप्ताःस्थः . ॐ तृप्ताःस्मः शेषमन्नं किं क्रियताम् . इष्टैः सह भुज्यताम् ॥ ॥
ॐ पिण्डदानमहं करिष्ये . ॐ कुरुष्व . ॥ ॥ ततः पिण्डदानार्थं हस्तमितां
चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणाप्लवां पिण्डिकां निर्माय . ॥ तदुप राम: ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रि. ॐ येरूपाणि प्रतिमुंचमाना असुराः सन्तः स्वधयाचरन्ति . परापुरो नि
पुरो येभरंत्यग्निष्टाँल्लोकात् प्रणुदात्यस्मात् . ॥ इतिअंगारं भ्रामयित्वा
दक्षिणदिशि क्षिपेत् . ॥ ततः पिण्डिकामध्ये वामेन पाणिना रेखां कृ
त्वाउत्तरदिशि क्षिपेत् . ॐ अपहता असुरा रक्षांꣳसि वेदिषदः इति मं
त्रेण . ॥ ततो जलेन पिण्डिका सेचनम् . तदनुच्छिन्नमूलकुशान् पिण्डि
कायां दद्यात् . ॥ ॥ ततः सव्येन . देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च .
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः पठेत् . ॥ ॥ अपसव्यं .

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वा· मोरकमादाय ·। ॐ अद्येह काश्यपगोत्र अस्मत्पितः रौद्रप्रतापवी
रविक्रमवर्मन् वसुस्वरूप अद्यकर्तव्यसांवत्सरिकैकोद्दिष्टश्राद्धे अत्रावने
·· निक्ष्वतेस्वधा· इतिकुशोपरिदद्यात्· ॥ ॥ ततः पिण्डमोटकंचादाय·
ॐ अद्येह काश्यपगोत्र अस्मत्पितः रौद्रप्रतापवीरविक्रमवर्मन् वसुस्वरूप
अत्रश्राद्धे एषपिण्डो मतन स्वरूपोक्षय तृप्तिहेतोस्ते स्वधा· इतिअवने
जनोपरिदद्यात् · ततआस्तरणकुशमूलेन·
· करंप्रोक्ष्य· ॥ ॥ सर्वंकृत्वा द्विराचम्य हरिंस्मरेत्·। ततः सक्षेनैवपु

L39

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्थाप

ष्पादीन्यादाय पितरमुद्दिश्य । ॐ अत्र पितरो मादयध्वं यथाभागमावृषा
यध्वम् । इत्युक्त्वा उत्तराभिमुखो भूत्वा श्वासन्नियम्य भास्वरमूर्तिं ध्याय
न् तथैव अपसव्यं कृत्वा । दक्षिणावर्तेन दक्षिणाभिमुखो भूत्वा । ॐ अमीमद
न्त पितरो यथाभागमावृषायिषत । इति मंत्रेण पुष्पादीनि पिण्डोपरि क्षि
पेत् । ॥ ॥ ततः अवनेजनं पात्रं वामहस्ते कृत्वा । मोटकमादाय । ॐ अद्येह
काश्यपगोत्र अस्मत्पितः रौद्रप्रतापवीरविक्रमवर्मन् वसुरूप इदं पिण्ड
प्रत्यवनेजनं ते स्वधा । इति पिण्डोपरि दद्यात् । ततो नीवीं विस्रंस्य । सव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

140

कृत्वा· आचम्य हरिं स्मरेत् · ॥ ॥अपसव्यं कृत्वा· वामेन पाणिना धृतं सूत्रं
दक्षिणेनादाय· ॐनमोवः पितरो रसाय नमोवः पितरः शोषाय नमोवः पि
तरोजीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय नमोवः पितरोम
न्यवे नमोवः पितरः पितरो नमोवो गृहान्नः पितरोदत्त सतोवः पितरोदेष्मैतद्वः
पितरो वासः· इति पिण्डोपरि सूत्रं दद्यात् · ॥ ततः पिण्डं गंधादिभिः संपूज्य·
तद्यथा। पाद्यं· पंचामृतं· शुद्धोदकं· वस्त्रं· यज्ञोपवीतं· गंधं· पुष्पाणि· अक्ष
तान्· यवान्· तिल्लान्· धूपं· दीपं· ऐक्षवादि नैवेद्यं· तांबूलं· पूगीफलं· द्रव्यं·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पयामि ॐ पितृभ्यो नमः ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहे
भ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः। अक्षन्पि
तरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् इति मंत्रेण पिण्डं
पूजयेत् ॥ ॥ ततो मोटकमादाय ॐ अद्य काश्यप गोत्र अस्मत्पितः रौद्र
प्रताप वीर विक्रम वर्मन् वसुस्वरूप अत्र श्राद्धे एतानि पिण्डार्चनानि अत्र
सूत्र यज्ञोपवीत गन्धपुष्पाक्षत धूपदीपेक्षवादि नैवेद्य तांबूल पूगीफल द्रव्य वासांसि
तेस्वधा इति उत्सृजेत् ॥ ततो विप्रकरे ॐ शिवा आपः सन्तु इति जलम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 ॐ सौमनस्यमस्तु· इति पुष्पम्· ॐ अक्षतंचारिष्टमस्तु· इति नरकुड्लान् ॥ ॥
 सव्येन· अंजलिं वध्वा पूर्वाभिमुखः पठेत्· ॐ अपांमध्येस्थितादेवा सर्वम
प्सुप्रतिष्ठितम्· ब्राह्मणस्य करेन्यस्ताः शिवा आपो भवन्तु मे ॥१॥ लक्ष्मी
र्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे· लक्ष्मीर्वसति सदा गोष्ठे सौमनस्यं सदा
तु मे ॥२॥ अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिस्तथा· यद्यच्छ्रेयस्क
रं लोके तत्तदस्तु सदा मम ॥३॥ ततः कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमं
त्रं शिरसि सिंचेत् ॥ ॐ अस्मत्कुले दीर्घमायुरस्तु· ॐ शान्तिरस्तु· ॐ

141

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्टिरस्तु · ॐ वृद्धिरस्तु · ॐ यच्छ्रेयस्तदस्तु · ॐ यत्पापं तत्प्रतिहतमस्तु · इ
ति भूमौ · ॐ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु · ॥ अपसव्यं कृत्वा · पिण्ड
शेषान्नं पिण्डसमीपे विकिरेत् · वामहस्ते गंगाजलं कृत्वा · मोटकमादा
य · ॐ अद्य काश्यपगोत्रस्य अस्मत्पितुः रौद्रप्रतापवीर विक्रम वर्मणः
वसुस्वरूपस्य अत्र श्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु · इति पिण्डो
परि दद्यात् · ॥ ॥ सव्येन · कृतांजलिर्दक्षिणां दिशं पश्यन् · ॐ अघोराः
पितास्तु · इति पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् · ॥ ततः प्राङ्मुखो भूत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 अंजलिंवध्वा आशिषः प्रार्थयेत्· ॐ गोत्रन्नोवर्द्धताम· ॐ वर्द्धताम्। ॐ दा
 तारो नोभि वर्द्धन्ताम्· ॐ वर्द्धन्ताम्। ॐ वेदाः संततिरेवच ॐ सन्तु। ॐ श्रद्धा
चनोमाव्यगमत्· ॐ मागात्। ॐ वहुदेयंचनोस्तु· ॐ अस्तु· ॐ अन्नंचनो
142 वहु भवेत्· ॐ भवतु। ॐ अतिथींश्च लभेमहि ॐ लभध्वम्। ॐ याचिता
रश्चनः सन्तु· सन्तु। ॐ मायाचिष्मकंचन· ॐ मायाचेथाः·। ॐ एताः सत्या
आशिषः सन्तु· ॐ सन्तु·।। ।। ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं कुर्यात्·
ॐ यंकामं कामयते सोस्मैकामः समृद्ध्यताम्· इतिमंत्रेण·।। ।। अपसव्येन. श्राः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सपवित्रकुशान् न्युब्जपात्रान्समादाय पिण्डोपरि निक्षिपेत्. ॐ स्वधां वाच
यिष्ये. ॐ वाच्यताम्. ॥ ॥ नमोस्त्विकांजलिना. अद्येह काश्यपगोत्राय अ
स्मत्पित्रे रौद्रप्रतापवीरविक्रमवर्मणे वसुस्वरूपाय स्वधोच्यताम्. ॐ अ
स्तु स्वधा. ॥ ॥ ततः पय आदिसहितं पुटकं वामहस्ते कृत्वा. ॐ ऊर्जं
वहन्तीरमृतङ्घृतं पयः कीलालं परिस्रुतम्. स्वधास्थ तर्पयत मे पितॄ
न्. इति सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात्. ततः पिण्डः सं
पन्न इति ब्राह्मणं पृच्छेत्. । ॐ सुसंपन्न इत्युक्ते. ॐ पिण्डमुत्थापयाा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 मि· ॐउत्थापयस्व· इत्यनुज्ञातः नम्रीभूय पिण्डमाघ्राय उत्थापयेत्·
 पिण्डाधारकुशान्· उल्मुकंच वन्हौ क्षिपेत्· ॥ ॥ततः सव्येन पिण्डिका
यां शंखचक्रं लिखित्वा· ॐ शंखायनमः ॐ चक्रायनमः· इतिपदैः शं
143 खचक्रपूजां विधाय· ॥ ॥अपसव्यं कृत्वा· पिण्डमूल्याय उत्थाय· ॐ गयायां पितृरूपेण स्वयमेव ज
नार्दनः· तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात्· इतिपिण्डं पिण्डि
कोपरि निधाय· सव्येन पूजयेत्· ॥ ॥ ॐ वसन्तायनमस्तुभ्यं ग्रीष्माय च न
मोनमः· वर्षाभ्यश्च शरत्संज्ञऋतवे च नमोनमः ॥१॥ हेमन्ताय नमस्तु राम॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शय्यादानम्

कर्पूरवर्त्तिकां प्रज्वाल्य

भ्यं नमस्ते शिशिराय च . मास संवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ॥२॥
॥ ॥ ततोऽपसव्येन . पितृवर्गपात्रं उत्तानीकृत्य . ॥ ॥ सव्येन . दक्षिणादानम् . अद्ये
ह काश्यपगोत्रस्य अस्मत्पितुः रौद्रप्रतापवीरविक्रमवर्म्मणो वसुस्वरूपस्य
कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्ध प्रतिष्ठार्थमिदं दक्षिणां रजतं चन्द्रदेवता
कं यथानामगोत्राय यथानामशर्म्मणो ब्राह्मणाय संप्रददे . ततस्तन्मम . ॥॥
ततो भूयसी . अद्येह काश्यपगोत्रस्य अस्मत्पितुः रौद्रप्रतापवीरविक्रमवर्म
णो वसुस्वरूपस्य कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्ध प्रतिष्ठान्यूनातिरिक्तप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यगांच

रिपूरणार्थं यद्देयमन्नपानादिकं द्रव्यं तत्तद्दैवताकं नानानामगोत्रेभ्यो नानानाम
शर्मभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य यथाकालेन दातुं समुत्सृजे ॥ ॥ ततः
अपसव्येन. ॐ अभिरम्यताम्. ॐ अभिरम्ये. इत्युक्त्वा सति ब्राह्मणं गृही
त्वा उत्थाप्य । ॐ आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे.
आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात्. इति कर्मपात्र
जलेन त्रिवारं वेष्टयेत् ॥ ॥ सव्येन. ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य ए
व च. नमः स्वाहायै स्वधायै नित्यमेव नमो नमः. इति त्रिः पठेत्. अपसव्येन.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सद्योवन्देतमच्युतम्. ॐ अच्युतायनमः॥ ॥ इत्येकोद्दिष्टश्राद्धविधिः॥ ॥ १९६९
मार्गशीर्ष कृष्ण नवम्यां सोमवासरे समाप्तम्.॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्राचीनंकर्म्मकुर्यात् ॥ सर्वरात्रौजागरणंकुर्युः ॥ एतद्दिनेसर्वेषामुपवासोहविष्यासनंवा ॥ इत्यधिवासन
म् ॥ ॥ अथप्रयोगः ॥ प्रातराचार्यः कुंडसमीपस्थकलशेषुसप्तम्रदः रोचनाशर्षपकुंकुमकर्पूरचंदना
गुरुकस्तूरीजातीफलमुस्तांगुग्गुलुपंचपल्लववेतसांक्षिप्त्वातज्जलैः सकुटुंबंयजमानंगुर्वर्त्विजो
भिषिंचेयुः ॥ ततोयजमानोगुर्वर्त्विग्भ्यः कृतैतदधिवासनस्यसंपूर्णतासिध्यर्थंगवांशतं १०० ॥
६० ॥ ५० ॥ ३६ ॥ २५ ॥ वानिष्क्रयंवादक्षिणांवादत्वामुलग्नेहेमशृंगादियुतांगांसंपूज्यशांतिपाठवा
द्यघोषेजापनेष्वाचार्यप्रमुखान्वारब्धोयजमानः गोपुच्छंधृत्वापश्चिमतइत्वाभिमुखींगामवता
रयेत् ॥ ॐ इरावतीवसिष्ठोविष्णुर्गौर्वात्रिष्टुप्गोरवतारणेवि० ॥ ततंतीमनुमंत्रयीत ॐ इदंस
लिलंपवित्रंकुरुष्वशुद्धाः पूताअमृताः संतुनित्यं ॥ मांतारयंतीकुरुतीर्थाभिषेकंलोकाद्लोकंतर
तेतीर्थंतेचेति ॥ वापीकूपोत्सर्गेतुगांत्रिरुपरिभ्रामयेत् ॥ ततः समुद्रादूर्मिर्वामदेवोगौस्त्रिष्टुप् ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येवामीरोचनेदिवोवसिष्ठः सर्पाश्चनुष्टुप्छंदनिमंत्रोपठेत् ॥ ततईशान्यांपरपारेगत्वाजानुदघ्नेजलेगोः
पुच्छेनस्वशाखोक्तं ॥ देवर्षिपितृणांसर्वेस्वपितृणांचतर्पणंकृत्वा ॥ पौराणोः कुर्यात् ॥ यथा॰ पितापि
तामहश्चैवतथैवप्रपितामहः ॥ स्वस्वपत्नीसमेतास्तेषांयंतांजलतर्पणात् ॥ अजातदंतायेकेचिद्येच
गर्भेव्यवस्थिताः ॥ तेषामुद्धरणार्थायतडागोदकमस्तुमे ॥ पितृव्यकाश्चयेस्माकंभ्रातरश्चसहो
दराः ॥ गुरवोमातुलाःपुत्राश्चाचार्याः सखिबांधवाः ॥ तेषांपुत्राश्चपत्न्यश्चश्वशुरायेसपुत्रकाः
स्तेषांप्रीणनार्थायतडागोदकतडागोदकतर्पणं ॥ बंधुवर्गाश्चयेकेचिज्ज्ञात्रनामविवर्जिताः
स्वगोत्राःपरगोत्रावातेभ्यश्चेदंतिलोदकं ॥ तथा ॥ ब्रह्माद्यादेवताः सर्वाऋषयोमुनयस्तथा ॥ असु
रायातुधानाश्चमातरश्चंडिकास्तथा ॥ दिक्पालालोकपालाश्चग्रहदेवाधिदेवताः ॥ तेसर्वेतृप्ति
मायांतुतडागोदकतर्पणोः ॥ विश्वेदेवास्तथादित्याः साध्याश्चैवमरुद्गणाः ॥ क्षेत्रपीठमपीतानित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

घनद्यश्चसागराः॥ पाताले नागपत्न्यश्च नागाश्चैव सपर्वताः॥ पिशाचागुह्यकाःऽेनागंधर्व्वगराराक्ष
साः॥ पृथिव्यापश्च तेजवायुराकाशमेव च॥ दिवि भुव्यंतरिक्षे च ये च पातालवासिनः॥ शिवः शिवा
तथा विष्णुः सिद्धिर्लक्ष्मीसरस्वती॥ तपोधनाश्च भगवांनव्यक्तपरमेश्वरः॥ क्षत्रौषधिलतावृक्षाव
तस्पत्यधिदेवताः॥ कपिलः शेषनागश्च तक्षकोनंतस्वव॥ अन्येजलचराजीवाश्चसंख्यातास्त्व
नेकशः॥ चतुर्द्दशायमाश्चैव येचास्येयमकिंकराः॥ सर्वेच पक्षराजानः पक्षिराः पशवस्तथा॥
स्वेदजोद्भिज्जजाजीवाश्चांडजाश्चजरायुजाः॥ अन्येपिच न जीवाये दिवानिशंविहारिणः॥ अजागो
महिषीरूपायेचान्येपशवस्तथा॥ शांतिदाश्चभदास्तेस्तुस्तडागोदकतर्पिताः॥ आब्रह्मस्तंभपर्यंतं
येचान्येगोत्रिणास्तथा॥ तेसर्वेतृप्तिमायांतुतडागोदकतर्पिताः॥ सर्पव्याघ्रहतायेच शृंगिदंष्ट्र
तन्नाग्निभिः॥ अपुत्राश्चक्रियायेचअपराधमेवर्जिताः॥ आमगर्भास्तृतायेचशस्त्रघातम्(

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताश्चये ॥ संस्काररहितायेचवैरौरवादिषुगामिनः ॥ आब्रह्मस्तंभपर्य्यंतंदेवर्षिपितृमानवाः ॥ तृप्यंतुपि
तरः सर्वेमातृमातामहादयः ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनांल्लोकादि
दमस्तुतिलोदकं ॥ पितृवंशेमृतायेचमातृवंशेतथैवच ॥ गुरुश्वशुरबंधूनांयेचान्येबांधवामृताः ॥
येमेकुलेलुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रियालोपगतायेचजात्यंधाः पंगवस्तथा ॥ विरूपाआ
मगर्भाश्चज्ञाताज्ञाताकुलेमम ॥ तेभ्योदत्तंतडागस्यजलमेतत्तुतृप्तये ॥ येबांधवाबांधवावायेन्यज
न्मनिबांधवाः ॥ वृक्षत्वंचगताः केचित्तृणगुल्मगताः स्थिताः ॥ पातनासुचघोरासुजातीषुविविधा
सुच ॥ नरकेषुचघोरेषुपतितायेस्वकर्म्मणा ॥ तेषामुद्धरणार्थायजलमेतद्ददाम्यहं ॥ आब्रह्मणो
पिपितृवंशजातामातुस्तथावंशभवामदीयाः ॥ वंशद्वयेयेममदासभृताभृत्यास्तथैवाश्रितसेव
काश्च ॥ मित्राणिसख्यः पशवश्चवृक्षादृष्टाश्चदृष्टाश्चकृतोपकाराः ॥ जन्मांतरेयेममसंगताश्चते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यस्तडागोदकमेतदस्त्विति॥ ततश्चापोऽस्मान्० देवश्रवा० आयस्त्रिष्टुप्० स्नपवसा० दीर्घतमा०
गौस्त्रिष्टुप्० गोर्जलताडनात्तारगोविपदिसा हिंकरोतिसा हिंकृरावनीतिजपेत्॥ ततोधौतवस्त्रेक्षत्वाद
धिदूर्वागंधाद्यैस्तांगांसंपूज्यप्रार्थयेत्॥ वसूनांदुहितासित्वंसंसारार्णवतारिणी॥ तीर्थपुरोपादके
स्नातापावयस्वजलाशयं॥ अर्चितासिसुगंधेनचंदनेनासरार्चिते॥ सत्कीर्तिसफ़लांकर्तुंपावयस्वज
लाशयं॥ सर्वदेवमयीयस्मात्पूजनीयासिरोहिणी॥ सर्वकामदुघेधेनोसर्वपातकनाशिनि॥
सर्वांगैः सर्वभावेनपावयस्वजलाशयं॥ त्वयाक्रांतंपवित्रंतुत्रैलोक्यंसचराचरं॥ अतोस्माकमिमं
धेनोपावयस्वजलाशयंइति॥ ततः सामगायत्रेणोद्यात्॥ ततोवाद्यादिघोषेसतिहरिद्राकुं
कुमरक्तेनत्रिवृतासूत्रेणजलाशयंवेष्टयेत्॥ केचिद्वाससापिवेष्टयंति॥ ततोयजमानोनवंश्वे
तमुष्णीषंशिरसिवध्नीयात्॥ अथाचार्यः॥ वेद्यांस्थापितांनदीजलपूर्णांयात्रीचतुर्भिर्होतृभिर्ब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

227

तामाराध्यजलस्थः सौवर्णौ कूर्ममकरावगाधेजले पूर्वोक्तेपयोः अन्यमुखौ क्षिपेत्॥ राजतौ मत्स्यडुं
डुभौ दक्षिणावर्तौ च्योरुदङ्मुखे॥ ताम्रौ कुलीरमंडुकौ प्राङ्मुखौ वायव्ये॥ लौहं शिशुमारं दक्षिणामुख
मुदीच्यां॥ ततः सार्त्विगाचार्यैउदङ्मुखः शन्नोदेवीरित्यस्याश्विगीतेनारणगानसाम्नापुनर्मामैत्वि
द्रियंपुनरायुः पुनरायुःपुनर्भगः॥ पुनर्द्रविणमैतुमांपुनर्ब्राह्मणोमैतुमामिति॥ आपोहिष्ठेति
अचेनवागाधेजलेपात्रीमुद्रीकृत्वा नदस्य निजलेक्षिप्त्वा नामादायगच्छेत्॥ ततः कर्त्ता क्षीषमाचा
र्यायदत्वा कुशात्तिलहस्तोदेशकालौस्मृत्वासर्वपापक्षयपूर्वकेत्यादिपूर्वोक्तफलमुक्त्वामुनडागादिज
लाशयंवरुणादैवतंस्नानपानावगाहनार्थंसर्वभूतेभ्योहमुत्सृज्येनममैनिजलक्षिप्त्वापठेत्॥ ॐ
सर्वभूतेभ्यउत्सृष्टंमयैतज्जलमूर्जितं॥ रमंतुसर्वभूतानिस्नानपानावगाहनैः॥ सामान्यंसर्वभूते
भ्योमयादत्तमिदंजलं॥ रमन्तु॥ सोपानान्यतितः खातान्जलेचैवनिजनात्॥ मरणोवास्थिमंगेच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्त्ता दोषैर्न लिप्यते ॥ पुष्करिणां पास्तत: कश्चिदस्थिभंगश्च वा भवेत् ॥ आत्मघाती च यस्तत्र कर्त्ता दोषे
र्न लिप्यते ॥ ततो विडेभ्यो दक्षिणां दत्वा पूर्वोक्तमंत्रैर्दिक्पालेभ्यो माषभक्तवलीन्दद्यात् ॥ ॥ अथना
गयष्टिः ॥ ॥ आचार्यो भूमौ यवे पूनिधाया भ्यर्च्य भूर्ज्जपत्रा ष्टके ऽनंतवासुकी तक्षक कर्कोटक पद्म
शंख महापद्म कुलिकेति नामानि विलिख्य ॥ तानि कुंभे निधायैकमाकृष्य तत्रामानं नागं वादश
पंचदश विंशत्यन्यतमान लिमितायां याज्ञियकाष्ठस्थूणायामावाह्य संपूज्यायां नागोस्य जलस्य रक्ष
कोस्त्विन्युक्त्वा नागयष्ट्यै नम इति संपूज्य तच्छीर्षे लोहं चक्रं निखाय संपूज्य प्रार्थयेत् ॥ ॐ चक्रंसुदर्श
नाख्यं त्वं नागदंड शिरोगत ॥ अत्र विघ्नस्य कर्त्तारं जहि दुष्टं हरिप्रियेति ॥ ततः सामात्यो यजमानो
यष्टिं स्कंधे गृहीत्वा वाद्यघोषे राजलाशयं प्रदक्षिणीकृत्य० जलमध्ये कृतेनीलतरागोमयदधि
मध्वक्षतकुशनदीजलानि जले क्षिप्त्वा पठेत् ॥ ॐ कुरुक्षेत्रं गयागंगाप्रभासापुष्करं तथा ॥ एता

Nepal Sanskrit University, Balmeeki Campus

॥ प्र० का ॥
॥ १२ ॥
228

निपंचतीर्थानि नितडागे निवसंतु मे ॥ दशार्णा गुरुडा सिंधुस्थावर्ण्णा इषद्वती ॥ एतानि मंचतीर्थानि नितड
गे निवसंतु मे ॥ वितस्ता कौशिकी सिंधुः शतद्रुश्च सरस्वती ॥ एतानि पंचतीर्थानि नितडागे निवसंतु मे
यमुना नर्मदा रेवा चंद्रभागा च देविका ॥ एतानि पंचतीर्थानि नितडागे निवसंतु मे ॥ गोमती रावती
शोणा गंडकी सागरस्तथा ॥ एतानि पंचतीर्थानि नितडागे निवसंतु मे ॥ ततो जलं स्पृष्ट्वा पठेत् ॥ ध्रुव
घे वरुणं देवमंभसां पतिरुर्ज्जितं ॥ याचितं देहि मे पुण्यं सर्वपापापनुत्तये ॥ सान्निध्यमत्र तोये
नु भवेशत्वदनुग्रहात् ॥ रुद्रान्प्रपद्ये वरुणान्सर्वान्मुपदस्त्वहं ॥ शमयंत्वाशु मे पापं रक्षंतु स्ते
क्षुर्भासद ॥ आपः पवित्राः पुण्याश्च प्राणिनां प्राणदास्तथा ॥ शमयंत्वाशु मे पापं तस्माद्रक्षं
तु सर्वदेति ॥ तत ॐ ह्रियै० श्रियै० शच्यै० मेधायै० विद्यायै० लक्ष्म्यै० इति जलमातृर्जलेऽक्ष
त पुंजेषु वा संपूज्यापोहिष्ठेति सूक्तेनाविच्छिन्नगोदुग्धधारया जलाशयं त्रिःप्रदक्षिणीकृत्य शेषं

॥ राम ॥
॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुस्थं किंचिद्दिव्यं यथेष्टं पापयेत् ॥ ततउत्सर्गोत्तरं त्रिदिनेस्थापितदेवानां पंचोपचारैः पूजांपूर्वोक्तं होम
च गन्धपहं गुर्वर्त्विज ॥ स्वस्वकुंडेकुर्युः ॥ चतुर्थदिनेहोमोत्तरं ब्रह्मणोहविरुच्छिष्टं पूर्णपात्रं हिरण्यं च द
क्षिणां दत्वा गुर्वर्त्विजः स्वस्वकुंडेत्वारब्धे यजमाने पूर्णाहुतीर्हुत्वा कर्मशेषं समापयेयुः ॥ ॥ अथच
तुर्थीकर्म ॥ ॥ चतुर्थदिनेऽमुकजलाशयोत्सर्गांगभूतं चतुर्थिकर्म करिष्यइत्युक्त्वाचार्यंवृणु
यात् ॥ सस्वाचार्यः ॥ ततस्त्वाचार्योयद्देवादेवहेडनमितिभूमिंप्रोक्ष्य० मानस्तोकेइतिगोमयेना
नुलिप्य० त्वांद्यग्नेथिंइदस्तुह्विरख्य० सदसस्पतिमितिमन्दकुक्षन्य० त्वामिद्धिहवामहेइत्यभ्युक्ष्य०
अग्निर्मूर्धेत्यग्निंप्रतिष्ठाप्य० ब्रह्माणंवृत्वा० हिरण्यगर्भइतिब्रह्मासनंदत्वा० ब्रह्मयज्ञानमि
तिब्रह्माणमुपवेश्य० आपोहिष्ठेतिमन्त्रमयंप्रणीतापात्रंनिधाय० आजिघ्रकलशमितीशान्यां
कुंभंसंस्थाप्य० तत्रवरुणंसंपूज्य० कपानइत्यग्निपरिस्तीर्य० गायत्रेत्वाछंदसादयामीतिपात्रा

॥प्र॰का॥
॥१३॥

229

रण्यास्तच्छाद्य॰ विष्णोरराटमसीति पवित्रे कृत्वा॰ प्रोक्षणीरासादयेति प्रोक्षणीपात्रे प्रणीतोदकमानी
यत्युपवामहस्ते कृत्वा ध्यंगनं कृत्वा॰ पात्राणि प्रोक्ष्य॰ स्थाल्यामाज्यमासिंच्य॰ इषे त्वेत्यधिश्रित्य॰ उ
र्ज्जेत्वेत्यवेक्ष्य॰ अग्निं दूतं पुरोदधे इति पर्यग्निं कृत्वा॰ अनारभिंडमिति स्रुवं प्रतप्य॰ अग्निशितो
सीति दुर्ग्रो: संमज्य॰ प्रत्युष्टं॰ रक्ष इति पुन: प्रतप्य॰ निधायेति स्रुव स्रुगासयेते इत्याज्यमुद्वास्य॰
सवितुस्त्वेत्युत्पूय॰ उर्ज्जेत्यवेक्ष्य॰ प्रोक्षणी रुत्पूय॰ यस्यास्ते घोरयत्रासमिति कुशानादाय॰ समिधा
ग्निं मित्रिसमिधो भ्याधाय॰ विश्वतश्चक्षुरित्यग्निं संदीप्य॰ त देवाग्निसत्वायुरितिसंप्र॰ देवसवितः
प्रसुवेति प्रोक्षणीजलेनाग्निं पर्युक्ष्य प्रणीता सु पवित्रे निधाय दक्षिणं जान्वाच्य ॥ ॐ प्रजापतये स्वा
हेति पूर्वाघारं हुत्वा ॥ ॐ इंद्राय स्वाहेत्युत्तराघारं दक्षिणतो हुत्वा॰ अग्नये स्वाहा ॥ ॐ सोमाय स्वाहेति
चक्षुषी हुत्वा॰ त्वन्नो अग्ने स त्वं न: ॥ अयाश्चाग्ने॰ ये ते शतं॰ उदुत्तमं॰ प्रजापतये स्वाहेति व्याहृत

॥राम॥
॥१३॥

भिर्हुत्वा॰ प्रणवादिनाहुंफडित्यनेन॰ इमम्मे वरुणेति जलेनाग्निमभ्युक्ष्य॰ गायत्र्या १५ इमम्मे वरुणेति
शतमाज्येन हुत्वा॰ व्याहृतिभिश्च हुत्वा॰ अग्नये स्विष्टकृते स्वाहेति जुहुयात्॥ ॥अथ वरुणस्नानं॥
दध्यक्षतकुशाग्नक्षीरदूर्वामधुयवसर्षपफलपुष्पताम्रपात्रे वरुणायार्घ्यं दत्वोद्धृतासीति॥ गजदंतो
द्धृताश्वस्थानवल्मीकवराहोत्खातअग्न्यागारतीर्थह्रदसंगमगोष्ठमृदेन वक्षं मे पक्षिप्त्वा॰ आपो
हिष्ठेति नदर्भैर्जलेनापूर्य॰ ताभिरेव तडागाधिवासनं वरुणांस्तर्पयेत्॥ ॥ततो गायत्र्या गोमूत्रं पलर
गंधद्वारेति गोमयं पंगनर्द्धः आप्यायस्वेति पलद्वक्षीरं॰ दधिक्राव्णा इति दधि रतेजोसीति घृतं १ देवस्य
त्वेति कुशोदकं १ चैकीकृत्यनेन॰ आपो हिष्ठेत्यभिषिंचेत्॥ ततः पृथक् पल १ पंचामृतैः स्वस्वमंत्रैः
सस्वैभेषज्येनेति उष्णोदकेन॰ हिरण्याक्षः सवितेति रत्नोदकेन॰ देवस्य त्वेति कुशोदकेन॰ अग्न आ
याहीति फलोदक॰ सावित्र्या गंधोदकेन॥ ततो घटानां सहस्रेण॥ ॥५००॥२५०॥२०८॥६४॥३२॥१६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४॥वास्त्रपर्येत॥ ततः सुवर्णरूप्यताम्रकांस्यपित्तलमयरामयैः कुंभैः॥ ततः सहदेवीव्याघ्रीबलातिबलाशं
खपुष्पीसिंहीसुवर्चलेत्यष्टौषधीकुंभोदकेन॥ ततो यवगोधूम्॰ मनीवारतिलश्यामाकशालिप्रियंगुव्रीहि
कुंभोदकेन॥ ततो गोमयेनमृदावाकृतैः स्वस्तिकपद्मशंखोत्पलकलशश्रीवत्सदर्पणादिपावनैः पंच
वर्णादकैः पंचवर्णरजोभिर्दूर्वाकुलमभक्तवलिभिर्वरुणं नीराज्य० गांगजलमाचमनीयं दत्वा विदस्त्रस
मायुक्ते यज्ञपात्रसमन्विते॥ सर्ववर्णप्रभेदे च वाससीतवनिर्मिते इति वस्त्रे दत्वा॥ शरीरं ते न जाना
मि चेष्टां नैव च नैव च ॥मया निवेदितं भक्त्या प्रतिगृह्य विलिप्यतामिति गंधं॥ नूलीपुष्पं॰ तं सूर्यचंद्र
ज्योतींषि विद्युदग्निस्तथैव च॥ त्वमेव सर्वज्योतींषि दीपोयं प्रतिगृह्यतामिति चत्वारिंशद्दीपान्धूपदीपनै
वेद्यानि च दद्यात्॥ ॥इति वरुणस्नानम्॥ ॥ततः संस्त्रवप्राशनादि कृत्वा० इमम्मे वरुणेति पूर्णा
हुतिं हुत्वाग्निं संपूज्य विसृज्याचार्याय दत्वा० यज्ञोपकरणं तु वर्त्विग्भ्यो गोसुवर्णादि दक्षिणां दत्वाक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लशोदकैर्यजमानमभिषिक्तोवेद्यांयज्ञादीन्संपूज्य विसृज्याचार्याय दत्वायज्ञोपकरणांगुर्वेन्निर्विघ्न्योवि
भज्यदत्वा हेमपात्रीशय्यांचाचार्यायदत्वा१००० ॥१०८ ॥५०॥२०॥ वाविज्ञान्तंभोज्यमूर्यसीदक्षिणां
दत्वा ॥यस्यस्मृत्या० प्रमादात्कुर्वतामित्युक्त्वा० कर्म्मेश्वरार्पणंकृत्वा० सुहृद्युतो भुंजीतेति॥ ॥इति
श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृतो जलाशयोत्सर्गप्रयोगः समा
प्तः॥ ॥वह्वृचगृह्यपरिशिष्टे॥ अथातोवापीकूपतडागयज्ञंव्याख्यास्यामः पुरोपतिषिकरणोद
कसमीपेऽग्निमुपसमाधायवारुणंचरुंश्रपयित्वाज्यभागांतंकृत्वाज्याहुतीर्जुहुयात्समुद्रज्येष्ठेति
प्रत्यृचंतत्तोहविषाष्टाभिर्ज्जुहुयात्० तत्त्वायामीतिपंच० त्वन्नोअग्नइतिद्वे० इमम्मेवरुणेतिचस्वि
ष्टकृतंनवमंमार्ज्जनांतेधेनुंतारयेदवतीर्यमाणामनुमंत्रयेदिदंसलिलंपवित्रंकुरुष्वशुद्धाः पूताअ
मृताः संतुनित्यं॥ मांतारयंतीकुरुतीर्थाभिषेकंलोकांहोकेतरतेतीर्यतेचेतिपुच्छायेऽन्वारब्धउ

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तीर्यापोअस्मानित्यथा पराजितायां दिश्युत्थापयेन्मूपवसाङ्गवतीहि भूयाइति ॥ हिंकृतं चेति हिंकृस
वती ॥ सचैत्वकेठंकांचनश्रुंगीरौप्यखुरां कांस्योपदोहं विपायदद्यादितरां वाशक्त्या दक्षिणां ॥ ततउत्स
र्जेद्देवपितृमनुष्यः प्रीयतामिति ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयीत ॥ शौनकः ॥ नवे तडागे खाते
वापीकूपसरित्सु च ॥ कुर्यात्तु विधिवद्धोमं शुद्धये तत्फलाप्तये ॥ तडागपश्चिमे तीरे होमशालामलं
कृतं ॥ उपलेपादियत्नेन प्रणीतास्थापनोत्तरं ॥ सलिलेन च संपूर्णं वाससा वेष्टितं घटं ॥ मंडुकादीनि
रौप्याणि सौवर्णानि क्षिपेज्जले ॥ ततस्तत्प्रोक्षयित्वा वारुणं पापसंप्लुतः ॥ पयोदधिभ्यां मालोद्गस
र्पिलाजाक्षतसर्षपाः ॥ आपोहिष्ठामयइति नवभिर्जुहुयाद्घृतं ॥ आपोअस्मानिदं च मिथ्यसमुद्रादूर्मि
तंस्तथा ॥ अथसक्तुभक्षजुहुयाद्देवदत्तस्य संपदा ॥ शुभसवस्त्रापइत्यापोसूक्तेन नवकेन च ॥ अव
यायंनिसूक्तेन लाजाहोमो विधीयते ॥ इतिदिक्प्रत्यंचं हुत्वा प्रागारभ्य प्रदक्षिणं ॥ नहि नेक्षत्रमि

232

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्याउर्द्धं क्षिप्रत्वष्टतारातीः ॥ उसंन्वाजेहृदिति सूक्तेन जुहुयाच्चरुं ॥ अथ स्विष्टकृतं हुत्वा यजमानस्य वां
धवाः ॥ अर्चिताश्चाज्यधाराभिरपांचपरितोहरेत् ॥ तडागमध्ये पांकुभं निधाय स्वस्तिवाचयेत् ॥ सौव
र्णादीनि रौप्याणि विप्राणां प्रतिपादयेत् इति ॥ ॥ अत्रायं भविष्योत्तरशौनकपरिशिष्टाद्यनुसा
रावापीकूपोत्सर्गप्रयोगः ॥ ॥ कर्त्तादरायणादौ शौनकमन्ते पूर्वेद्युरुपवासं कृत्वा परेद्युर्देशकालौ स्मृ
त्वा मम रुद्रालयगमनानेककल्पव्यापिस्वर्गवासपरार्द्धद्वयकालव्यापिमहत्फलपः वस्तिलोकाग
नाभोगपूर्वकविष्णुपदप्राप्त्यर्थं शौनकमतेन धनयज्ञ. शांतिपुष्ट्यायुष्यधर्म्मवृद्धिमहापातक
नाशार्थं कूपोत्सर्गं करिष्ये इति संकल्प्य गणेशपूजास्वस्तिवाचनेमातृपूजानांदीश्राद्धानि कृत्वा चा
र्यं कृत्वा. तुलादानवन्मंडपप्रतिष्ठां कृत्वा वा. यद्वत्संस्थापनमिति शार्षपात्विकी ग्यांपोहिष्ठेति
त्र्यचेन पुत्रीव इति मंत्रं वक्ष्यमाणं प्रतिदिक्षुदिक्पालान्संपूज्याग्निं प्रतिष्ठाप्येशान्यां वेद्यां नवग्रहान

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र॰का॥ ॥१६॥

धिदेवताः प्रत्यधिदेवता विनायकादिपंचदेवताः॥ संस्थाप्य॰ चतुर्दिक्षु अष्टदलेषु पद्मेषु महीद्यौरित्यौषधि
श्च तुः कुंभां संस्थाप्य तत्र गौरीवचनात् पंचरत्नाष्टमृत्सर्वौषध्यादि निक्षिप्य॰ तेषु तीर्थान्यावाहयेत्॰ इ
दं विष्णुरिति ॥ नमस्ते विश्वगुप्ताय नमो विष्णो ॥ अपांपते ॥ सान्निध्यं कुरु देवेश समुद्रादिह सत्यवे
ति॰ विष्णुमावाह्य॰ वायुस्सर्गेन्यस्मिन् कुंभचतुष्टये चतुरः समुद्रानपि संपूज्य वेद्यां लोकपाला
न्वरुडं ब्रह्माणं विष्णुं चावाह्य॰ गणानांत्वेति गणेशं॰ गंधद्वारामिति कमलां॰ जातवेदसे इत्यं दिकां॰
त्यायजं ते तिमृतानि॰ विश्वकर्म्मन् हविषेति विश्वकर्माणं चावाह्य॰ सौवर्णं कूर्मं राजतमत्स्य
त्रयुमयमंडूकं ताम्रमयकुलीरं लौहशिशुमारं तीर्थवारि पंचरत्नयुतां ताम्रपात्रीमिमम्मे वरुणेति
मंडलमध्ये संस्थाप्य॰ शौनकमते तु कुंभे सौवर्णमत्स्यादीन् संपूज्य वलिं दत्वा ॥ त्रैलोक्ये यानि भू
तानि इत्याद्युक्तदेवतानां पूजां कृत्वा वलिं दत्वा तत्पूर्वे पदत्रयं हित्वाऽवटं खात्वा तत्राक्षतां दर्भं ध्वनि

॥राम॥ ॥१६॥

232

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षिप्यप्रत्तियक्षीरवृक्षजंयजमानमात्रंचतुरश्रंस्थण्डिवर्त्तुलंयूपंप्रोक्ष्यऽवटेनिखायहरिद्रातैला
भ्यक्तमभिषिंच्यसर्षपगोरोचनागुग्गुलुदूर्वानिंवपत्रारांगापोटलिकांवध्वायुवासुवासाशन्निवास
साऽऽछाद्यगंधाद्यैस्तंपूज्यतत्रलोकपालान्सब्रह्मविष्णुशिवान्संपूज्यप्रकृवस्तकंपठेत्॥ ततोयव
मयंचरुंतन्दुलीनिर्वापादिनाकृत्वाज्यभागांतेग्रहादिहोमंकृत्वाव्यस्तसमस्तव्याहृतिभिश्चनस्त्वंनःस
त्वइज्येष्टेतिचतस्रच्चचाज्याहुतीर्हुत्वापुनस्त्वामिस्तन्वायामीतियंचभिस्तन्त्वोऽग्नइतिद्वाभ्यामिम
म्मेवरुणेतिचद्वादशमंत्राणांनवाहन्याउदुंवरसमिदाज्यचरूणांप्रत्येकमष्टोत्तरशतंशौनकमते
तुपयोदध्याज्यैरापोहिष्ठेतिनवभिरापोअस्मानितिपंचभिःसमुद्राद्दूर्मिरितित्र्यचेनाज्यंहुत्वा०
प्रसुवक्षापइतितिनवर्चेनधान्यचंचरुंपायसंचहुत्वावपापंत्यपधभिरितिसूक्तेनलाजान्हुत्वान
हिनक्षत्रमितितिसाग्निंशाम्निर्घृतंहुत्वाप्रसंम्राजेइतिचरुंप्रत्यृचंजुहुयात्॥ एवंचतुर्द्दिक्षुहोमः

Nepal Sanskrit University, Balmeeki Campus

॥ प्र॰ कां ॥
॥ १८ ॥

233

तडागेप्येवं ॥ एवं वरुणाय हुत्वा होमकाले तदिक्ष्वभिन्द्रादिवायुराज पंचकारयित्वा स्विष्टकृदादिप्रायश्चि
त्त होमं तत्तद्दिक्पालादिभ्यो बलिदानं कृत्वा॰ मूर्द्धानं दिवइति पूर्णाहुतिं हुत्वा पूर्णपात्रविमोकांते स्वर्णशृंगा
द्यलंकृतां गां संपूज्य यजमानः सकुटुंबः उदङ्मुखः ॥ ॐ इरावती वसिष्ठो गौस्त्रिष्टुप् पुच्छस्पर्शनेन त्रिः कू
पस्योपरि भ्रामयेत् ॥ इदं सलिलं पवित्रं कुरुध्वं शुद्धाः पूता अमृताः संतु नित्यं ॥ मां तारयंतीक्षत्तीर्था
भिषेकं लोकाल्लोकं तरंतेतीर्यते चैतान्मंत्रं॰ समुद्रज्येष्ठाः ॥ येवामीरोचने इति मंत्रौ पठित्वा॰ इशानां
गोपुच्छेन वापीकूपोदकेन देवर्षिपितृगणांस्त्वपितॄणां च तर्पणं कृत्वा पूर्वोक्तमौराणोध्वं कृत्वा॰ आपो
अस्मान्सूपवा सा भगवती तीर्थान्यानुत्थाप्य॰ यदि हिंकुर्यात्त्रिंक्रावतीत्यनुमंत्र्य दधिदूर्वागंधैः संपूज्य
वस्त्रं तोऽहितासिन्नमिति पूर्वोक्तैः पंचभिः संप्रार्थ्य॰ गामाचार्याय दत्वा त्रिवृत्ता सूत्रेणावासरसा चकू ॥ राम ॥
पं वेष्टयित्वा विचित्रपताकास्तंकयुतं कृत्वा तामपात्रीमादाय शौनकमतेन जलकुंभमादाय ॥ मित्रंश ॥ १८ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वभिभूतानां धनदोषनकांक्षिणां ॥ वैद्यो रोगाभिभूतानां शरणापः शरणार्थिनामिति जितुनर्मोमेन्द्रियमि
तिष्ठायोहिष्ठेतिस्त्वचेनवागाधे जलेत्पुञ्जीकृत्वातद्वस्त्वनिजले क्षिप्त्वा पात्रीमादध्यात् ॥ ततः कर्त्तादेशका
लौस्मृत्वा॰ सर्वपापक्षयपूर्वकेत्यादिपूर्वोक्तंफलमुक्त्वामुंकूपादिजलाशयंवरुणादेवतंस्नानपानावगा
हनाद्यर्थंसर्वभूतेभ्योहमुत्सृज्येनममेत्युक्त्वातज्जलंक्षिप्त्वापठेत् ॥ ॐ सर्वभूतेभ्यउत्सृष्टंमयैतज्ज
लमूर्ज्जितं ॥ रमंतुसर्वभूतानिस्नानपानावगाहनैः ॥ सामान्यंसर्वभूतेभ्योमयादत्तमिदंजलं ॥ रमं
तुसर्वभूतानिस्नानपानावगाहनैः ॥ ॥ सोपानात्यजितः स्वातज्जलेचैवनिमज्जनात् ॥ सरणोवा
स्थिभंगेवाकर्त्तादोषैर्नलिप्यते ॥ ततः कुरुक्षेत्रंगयागंगाइत्याद्यैस्तीर्थान्यावाह्यजलमानः । संपूज्या
पोहिष्ठेतिसूक्तेनदुग्धेनजलाशयंत्रिःप्रदक्षिणीकृत्यशेषंदुग्धंविप्रंपापयेत् ॥ इदंकृताकृतं ॥ ततः
आचार्यादीन्संपूज्यदक्षिणांशर्य्याचदत्वाग्रहादीनामुत्तरपूजांकृत्वाविसृज्यब्राह्मणान्तदर्द्धविंशतिंवावि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शान्त्यं भोज्यकर्म्मेश्वरार्प्पणं कृत्वा सुहृद्युतो भुंजीतेति ॥ ॥ इति श्रीमन्नारायणभट्टसूनुरामकृष्णभ
ट्टात्मजकमलाकरभट्टकृतो वापीकूपाद्युत्सर्गविधिः ॥ ॥ अथ वृक्षारामोत्सर्गः ॥ ॥ पूर्वोक्तकाले कर्त्ता
देशकालौ स्मृत्वामुककामावाप्त्यनंतपदभोगप्राप्त्यर्थमारामोत्सर्गं करिष्ये ॥ एकवृक्षप्रतिष्ठायां तु॰
इन्द्रायुतत्रयकालव्यापिस्वर्गवासमंतभवत्स्वरोमसमसंख्यस्ववंश्यमनुष्यतारणनरकानिरहित
परमपदप्राप्त्यर्थमस्य वृक्षस्य प्रतिष्ठां करिष्य इति संकल्प्य॰ गणेशपूजापुण्याहवाचनमातृपूजा
नांदीश्राद्धाचार्यर्त्विग्वरणानि प्राग्वत्कृत्वाचार्यमेवैकं वा कृत्वा मंडपपूजादि स्वस्ववेदोक्ताग्निस्था
पनांतं वेद्यां ग्रहानधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालांश्चावाह्य वनस्पते विड्वंगो गर्गो
वनस्पतिस्त्रिष्टुप् वृक्षेनेन मंडलमध्ये प्रतिवृक्षमष्टौ सप्त वासो वर्णानि राजतानि फलानि वाधिवास
येत् ॥ तत्र कर्मादिपात्रं ॥ ततो ब्रह्मादिमंत्रेण यामं नानावाद्यसंपूज्य प्रतिवृक्षमालवालेषु तरां नासी

234

॥ राम ॥
॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यादिसर्वौषधीजलं सिंचेत् ॥ वृक्षान्पिष्टातकैर्माल्यैश्च भूषयित्वा वाससैकैकेनावेष्ट्य हेमसूत्र्यास्कं
धदेशे कर्णाभकल्पवेधं कुर्यात् ॥ तदुपरि चक्षुषी प्रकल्प्य हेमशलाकयांजनं दत्त्वा गुग्गुलुना धूपयि
त्वा प्रतिवृक्षमष्टाष्टौ वृक्षाष्टके वाम्लसमीपे मही द्यौरिति भूमिं स्पृष्ट्वा० ओषधयः सममिति यवगो
धूमव्रीहितिलकंगुश्यामाकचीनकानि सप्तधान्यानि यवगोधूमव्रीहिकंगुकुलत्थमाषमुद्गमसूरनि
ष्पावश्यामाकसर्षपगवेधुकनीवाराढकीकलापचणकचीनकान्यष्टादशधान्यानि वा मिश्रितानि
निधाय तदुपरि कुंभान्निधाय० तत्र वनस्पतीन्संपूज्य वलिदानपुण्याहुयराविश्वतज्ञष्टयहोमादि
शाग्वत्कुर्यात् ॥ होमे वनस्पते वीडुंग इत्यनेन वनस्पतये आज्यपलाशसमिधोपवान्कृष्णतिलांश्चा
ष्टोत्तरशतं हुत्वा ग्रहादिभ्यो ऽष्टाविंशत्याहुतीरैन्द्रैश्चैः शाग्वज्जुहुयुः ॥ ततः स्विष्टकृतादि पूर्णाहु
त्यंतं ॥ एवमधिवासनं कृत्वा प्रातरलंकृतां गां वृक्षमध्यादुदङ्मुखीमुत्सृजेत् ॥ ऐशान्यां निर्गमयेत्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदंवनंपवित्रंकुरुष्वेन्प्रभुः॥ एकवृक्षेत्वधत्ताद्युत्सृजेत्॥ इमंवृक्षमितिचोक्तः॥ मंत्राः॥ गोपुच्छतर्पणादि
सर्वंप्राग्वत्॥ ततोधिवासितेहोमैःफलैःकुंभैश्चवृक्षान्स्नपयेत्॥ ततोयजमानस्याभिषेकः॥ तत्र:१००
६८॥५०॥३६॥२५॥ वागादक्षिणांदद्यात्॥ नात्रनागपृष्टिः॥ दिनचतुष्टयंवृक्षमूलेक्षीरसेचनं॥
चतुर्थेह्निचतुर्थीकर्म्म:सद्योवा॥ अन्यत्सर्वंप्राग्वत्॥ ॥इतिकमलाकरभट्टकृतआरामोत्सर्गः॥
235 अथमदनरत्नाद्यनुसारेणशौनकोक्ताश्वत्थोपनयनं॥ ॥तच्चवर्णौःक्रमेणावृक्षस्थापनादष्टमेए
कादशेद्वादशेवावर्षेगुरुशुक्रयोरस्ताद्यभावेउपनयनोक्तमुहूर्त्तेपूर्वाह्णेकार्यः॥ भूदस्थापितेश्व
त्थेनुपूर्वोक्तपौराशिकारामवत्प्रतिष्ठामात्रंनतूपनयनं॥ तस्योपनयनानर्हत्वादित्युक्तंमदनरत्ने॥ त
था॥ मन्त्रेणच्छेदिताश्वत्थेविद्युद्दावाग्निनाहते॥ उपनीतिंप्रकुर्वीतस्कंधपर्णाकरात्विते॥ ॥अथ
प्रयोगः॥ ॥कर्त्तास्वायुर्बलमितिदंतधावनंकृत्वासचैलंस्नात्वादेशकालौसंकीर्त्यसर्वपापक्षयक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लकोटि समुद्धरणपूर्वकविष्णुसायुज्यप्राप्तिकामो ब्रह्मस्थोपनयनमहं करिष्ये इति संकल्प० गणेशपू
जापुण्याहवाचनमातृपूजानांदीश्राद्धानि कृत्वाचार्यं वृत्वा पूजयेत् ॥ अथाचार्यः पंचामृतैः शुद्धोदकेन
सर्वौषधिजलैश्च ब्रह्मस्थमभिषिंच्यपिष्टातकेन विभूष्य नापूर्वं स्थंडिलं कृत्वा वरुणपरागाद्याज्यभागांते
कृत्वा पुंगवस्त्राणी ब्रह्मस्थं वस्त्रयुगेनावेष्ट्य यज्ञोपवीतं दत्वा प्रवेयामेति मेखलां त्रिरावेष्ट्याजिनं दंड
चक्रंलीं दत्वा ब्रह्मस्थे वो निषदनमित्यवांगंधपुष्पैः संपूज्य देवस्यत्वेति मंत्रान्नेहस्तं गृहीत्वा ब्रह्मस्थेति स
स्त्वा सव्याहृतिकां गायत्रीं त्रिर्जपित्वा ब्रह्मस्थे वो निखदनमिति सूक्तेन व्याहृतिभिश्च ब्रह्मस्थं स्थापयि
मीति स्वर्णशलाकया स्पृष्ट्वाज्येन पलाशसमिभिश्च ब्रह्मरुणा च प्रत्येकं वक्ष्यमाणे द्वादशमंत्रैर्द्वादशाहु
तीर्जुहुयात् ॥ मंत्रास्तु ॥ भूः स्वाहा ॥ अग्नय इदं ॥ भुवः स्वाहा ॥ वायवे ॥ स्वः स्वाहा ॥ सूर्याय ॥ अग्न
आयुषि ॥ अग्निर्ऋषिः ॥ अग्ने पवस्वेति तिसृभिः ॥ अग्नये पवमानायेदं ॥ ओषधयस्संवदन्ते ॥ ओष

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धीभ्य इदं ॥ अश्वत्थे वो निषदनं ॥ ओषधीभ्य इदं ॥ वनस्पते शतवल्शः ॥ वासुपर्ण्णं पिप्पलायेदं ।
समस्तव्याहृतिभिः ॥ प्रजापतय इदं ॥ ततः स्विष्टकृदादि होमशेषं समाप्याश्वत्थे वह्निगंधपुष्पधूप
दीपनैवेद्यफलतांबूलाद्यैः संपूज्याश्वत्थं स्पृष्ट्वाचार्यं संपूज्य तस्मै गां सवत्सां दक्षिणां दत्वान्येभ्योपि
दक्षिणां दत्वाश्वत्थवस्त्राद्याचार्याय दत्वाष्टौ ब्राह्मणान् भोजयित्वा सुहृद्युतो भुंजीतेति ॥ ॥इति मह
कमलाकरकृतेश्वत्थोपनयनप्रयोगः ॥ ॥अथ तरुपुत्रकविधिः ॥ अपुत्रा स्त्री पुमान्वा पुरस्ये
ह्निदेशकालौ स्मृत्वा महापातकक्षयकुलत्रयसमुद्धरणप्रजापतिपुरगमननिरयस्थापितृत्वारम
धुधारावृष्टितृप्तिसिध्यर्थं ज्ञानपुत्रसिध्यर्थं पुत्रार्थममुकवृक्षं परिगृह्णिष्ये ० इति संकल्प ॥ सोपवासा
रात्रावस्थै विप्रानाहूय वृक्षं संपूज्य रात्रौ जागरणं कृत्वा भूमिशयनं वा कृत्वा प्रातर्वृक्षं संपूज्य तत्स
पायां विप्रान् संभोज्य पुराणपाठं वाचयित्वा तेभ्यः पुत्रीकृतवृक्षं निवेद्य प्रार्थयेत् ॥ गृहीष्यामि म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातुत्वांकर्त्तुमर्हथसत्तमाइति ॥ ततस्ताम्रपात्र्यांदशपंचवासौवर्णाफलानिसवीजपंचरत्नयुतान्यधि
वास्यलोकपालेभ्योवलिंदत्वापरेद्युस्तिलाज्यचरुभिरष्टशतंवनस्पतिमंत्रेणाहुत्वाजातकर्म्मादिषोड
शसंस्कारांकृत्वाभिषिक्तोयजमानः पुष्पांजलिमादायप्रार्थयेत् ॥ येशाखिनः शिखरिणांशिरसांवि
भूषयिनंदनादिषुवनेषुकृतप्रतिष्ठाः ॥ येकामदाः सुरनरोरगकिन्नराणांतेमेतरुस्यदरितान्निहरं
भवंतु ॥ स्नेहिजाविधिवदत्रहुताहुताशः पक्षस्यसौचहिमदीधितिरंतरस्थः ॥ त्वंवृक्षपुत्रपरि
कल्प्यमयाव्रतोसिकार्य्यंसदैवभवतामनपुत्रकार्य्यमिति ॥ अंगादंगादितिस्पृशेत् ॥ ततस्तेभ्यो
दक्षिणांदत्वाविसर्ज्जयेत् ॥ ॥इतितरुपुत्रकविधिः॥ ॥अथफलविशेषार्थंवृक्षदानं॥ ॥
हेमाद्रौभारते ॥ देवेभ्योथद्विजातिभ्योयोदद्यात्फलितंद्रुमं ॥ सपीयूषभुजांलोकेसेव्यमानोवरो
रुभिः ॥ क्रीडतेदेववत्कालमनंतंपूर्वजान्वितः ॥ सहकारद्रुमंदत्वाकिन्नरैः सहमोदते ॥ या२

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र॰का॥
॥२१॥
232

नित्दत्वाद्विजेजंबूमंविकापाः सलोकतां ॥ वाहरांनारिकेलेनरवर्ज्जूरैसाचधानंदं ॥ उगडुमप्रदानेन
लोकेसारस्वतंव्रजेत् ॥ यातिचंद्रमसोलोकंदत्वापनसमूरुहं ॥ चिंचाप्रदाननोयातिरूविरंलोक
माश्विनं ॥ कपित्थदाडिमाम्रातकदल्यामलकीतरून् ॥ दत्वानक्षत्रलोकेषुसुखमाप्नोतिमानवः ॥
मदनरत्नेपाद्मे ॥ सौभाग्यदश्चंयकरसालः सुखदायकः ॥ वहुभार्यानालिकेरिवक्षः सर्वांगसुंदरः
पुत्रप्रदस्मृता ॥ केलीमोचकीशत्रुनाशिनी ॥ मोचकीशाल्मलीः ॥ इत्यादयस्तथावान्येयेनोक्तास्तेपि
दायकाः ॥ प्रतिष्ठांतेगमिष्यंतियेनराभक्षदायकाः ॥ हेमाद्रौभारते ॥ अन्येषामपिवृक्षाणांसुमनः
फलशालिनां ॥ प्रदाननेनरोयातिपरमैश्वर्यसंपदं ॥ पुष्पोपगंवाथफलोपगंवापः पादपंस्पर्श
यतेद्विजाय ॥ सस्त्रीसमस्तंवहुरत्नपूर्णाप्राप्नोतियत्नोपननंगृहंवै ॥ ॥अथप्रासादप्रतिष्ठा ॥
सावजीर्णोलिंगेमत्स्यौवाजीर्णायांप्रासादमात्रेत्तननेक्लनेजलाशयोत्सर्गविधिनाकार्या ॥ मात्स्ये ॥

॥राम॥
॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलाशयगतं विष्णुमुवाच रविनंदनः ॥ तडागारामकूपानां वापीषु नलिनीषु च ॥ विधिं पृच्छामि देवेश
देवतायतनेषु चेत्युपक्रमात् ॥ अत्र राजन्महावाहो तडागादिषु यो विधिरित्यादिपदेन मध्ये प्रासाद
परामर्शादंतेच ॥ सर्वमेषु प्रारोषु तडागविधिरुच्यते ॥ कूपवापीषु सर्वासु तथा पुष्करिणीषु च
एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव च ॥ मंत्रतस्तु विशेषः स्यात्प्रासादोद्यानभूमिषु ॥ अयं त्वशक्ता
वर्धनविधिर्दृष्टः स्वयंभुवा ॥ स्वल्पेप्येकाग्निवत्कार्यं वित्तशाठ्याद्दृते नृभिरित्युपसंहाराच्च जलाशय
विधेः प्रासादप्रतिष्ठावागतेः ॥ ॥~~अथ प्रासादेनात्योक्त प्रासादविधिः~~ ॥ ॥~~तडागप्रतिष्ठाविधिश्च~~
तत्र प्रासादे देवतां ध्यायंतो जापकाजपेयुः ॥ उपक्रमोपसंहारैकवाक्यतया मंत्राणां गौणार्थे विनि
योगात् ॥ वा~~रुण्या होमस्थाने प्रासादवास्तु~~ ॥ शिरव्यादिदेवतापो वास्तोष्पते प्रतिजानीह्यस्मानित्याद्यैर्मं
त्रैश्च होमः ॥ यानि तु प्रकार्याणि गोरुत्तारणावर्णापात्रीजलप्रक्षेपनागयष्ट्यारोपणादीनि तानि निष्क

Nepal Sanskrit University, Balmeeki Campus, K...

॥प्र·का॥ स्थलचराचरवथानवक्षीरवाधान्नभवंति॥ वास्तुपूजाचादौकार्य्या॥ अंतेदेवस्यमहाभिषेकंःपूजा
॥२२॥ चेति॥ देवोपिनूतनश्चेत्प्रासादप्रतिष्ठासहितादेवप्रतिष्ठाकार्य्या॥ केवलप्रासादप्रतिष्ठायामात्स्योक्त
एवमंडपप्रतिष्ठाविधिर्ज्ञेयः॥ जलाशयोत्सर्गोतस्यातस्याएवविधानाद्यन्तनिकान्तिदेशेनतस्याए
वप्राप्तेः॥ यत्रतुप्रासादेदेवप्रतिष्ठातत्रदेवप्रतिष्ठायाःप्राधान्यात्तत्रचाग्निपुराणोक्तमंडपपूजाविशे
238 षोक्तेःप्रासादस्यचांगत्वादंगगुणाविरोधेवतादर्थ्यादितिन्यायेनाग्निपुराणोक्तेवमंडपपूजाज्ञेया
अथप्रासादारंभकालः॥ ॥मात्स्येगृहकालएवप्रासादेप्युक्तः॥ चैत्रेव्याधिमवाप्नोतियोगृहंकार
येन्नपः॥ वैशाखेधेनुरत्नानिज्येष्ठेमृत्युस्तथैवच॥ आषाढेभृत्यरत्नानिपशुवर्गमवाप्नुयात्॥
श्रावणेभृत्यलाभंचहानिंभाद्रपदेतथा॥ पत्निनाशोश्विनेचैवकार्त्तिकेधनधान्यकं॥ मार्गशीर्षे ॥राम॥
तथाभक्तंपौषेतस्करतोभयं॥ लाभंचबहुशोविंद्यादग्निंमाघेविनिर्दिशेत्॥ फाल्गुनेकांचन ॥२२॥

नक्षत्रानितिमासफलंस्मृतं॥ अश्विनीरोहिणीमूलमुत्तरात्रयमैन्दवं॥ स्वातीहस्तोनुराधाचगृहा
रंभेप्रशस्यते॥ आदित्यभौमवर्ज्यंतुसर्वेवाराःशुभावहाः॥ वज्रव्याघातशूलेषुव्यतिपातातिगंड
योः॥ विष्कंभगंडपरिघवर्ज्जंयोगेषुकारयेत्॥ चंद्रादित्यवलंज्ञात्वालग्नंशुभनिरिक्षितं॥ स्तंभो
छ्रयादिकर्त्तव्यामन्यत्रुपरिवर्ज्जयेत्॥ प्रासादेष्वेवमेवस्यात्कूपवापीषुचैवहि॥ कल्पतरौदेवी
पुराणे॥ सिंहसंस्थंगुरुंशुक्रंसर्वारंभेषुवर्जयेत्॥ प्रारब्धंनचसिध्येतमहाभयकरंभवेत्॥ पुत्र
मित्रकलत्राणिहन्याद्दीर्घ्रनसंशयः॥ देवारामतडागेषुप्रपोद्यानगृहेषुच॥ सिंहस्थंमकरस्थंतुगु
रुंयत्नेनवर्ज्जयेत्॥ मात्स्ये॥ पूर्वंभूमिंपरिक्षेतपश्चाद्वास्तुप्रकल्पयेत्॥ अरत्निमात्रेगर्त्तेतुप
रीक्षेखातपूर्णयोः॥ ॥अधिकेश्रियमाप्नोतिन्यूनेहानिःसमेसमं॥ फालकृष्टेथवादेशेसर्वबीजा
निवापयेत्॥ त्रिपंचसप्तरात्रेणयत्ररोहंतितान्यपि॥ ज्येष्ठोत्तमकनिष्ठाभूर्वर्ज्यास्याद्वर्ज्याचसाम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र॰का॥ ता॥ एकाशीतिपदं कृत्वा रेखाभिः कनकेन तु॥ दशपूर्वापरा रेखा दश चैवोत्तरायताः॥ पदस्थान्पूजये
॥२३॥ द्देवांस्त्रिंशत्पंचदशैव तु॥ द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदशेत्याद्युक्त्वा॥ चतुःषष्टिपदे वास्तु
प्रासादे ब्रह्मलरास्मृतः॥ ब्रह्मा चतुःपदस्तत्र कोणेष्वेकपदस्तथा॥ वहिःकोणेतु राज्यांतु सार्द्धपश्च्यो
239
भयसंस्थिता॥ विंशतिर्द्विपदाश्चैषां चतुःषष्टिपदः स्मृताः॥ एतत्सयोगे व्यक्तो भविष्यति॥ अथ
सूत्रस्तंभन्यासः॥ मात्स्ये॥ अथ सांवत्सरोक्ते तु मुहूर्ते शुभलक्षणे॥ पायसं भोजयेद्विप्रान्मधु
मक्षसर्पिषा॥ वास्तोष्पते प्रतिजानीहि मंत्रेणानेन सर्वदा॥ सूत्रपातेन थाकार्यमेवं स्तंभोदये पु
नः॥ ईशाने सूत्रपातः स्यादाग्नेये स्तंभरोपणं॥ अथ शिलान्यासः॥ कर्त्तोप्युभेहि हस्तकार्यावित
स्तिविस्तृताष्टांगुलस्थूला नव पंच च तस्त्रि वा शिलाघटयेत्॥ नव चेल्लोकपालाग्रधांकिताः॥ ॥राम॥
अन्यपक्षयोः पद्मस्वस्तिकांकिताः कार्याः॥ पक्षत्रयेपि शिलासंख्या नानाधारान् शिलामयान्कुर्या ॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्र॥ नवघणश्च॥ इष्टकामेषादेशदीर्घाः षडंगुलापत्ताः॥ इष्टकास्त्व॥ ततः खातोत्तरे ष्टहस्तेमराउ
पंनदत्तः पंचकुंडानिमध्येवेदीचक्रत्वामंडपपूजांदिक्पालवलिंचदत्वाचार्यकुंडेसंस्कृतेग्निंप्रति
ष्ठाप्यतमन्यकुंडेषुविभज्यप्रणीयकुंडेषुचरुंश्रपयित्वाचार्य्यकुंडैशान्यांवेद्यांग्रहान्संपूज्यनंदेशाने
कलशवरुणंतीर्थानिचावास्य॥ कुंडेषुसमिच्चर्वाज्यैरष्टसंख्ययाप्रत्येकंहुत्वापूर्णांदत्वामध्यवेद्यां
वत्तुःषष्टिपदंवास्तुमंडलेचवक्ष्यमाणावास्तुपूजांकृत्वावास्तोष्पतयेशिखयादिभ्यश्चतिलपवै
राज्येनचहुत्वाशांतिकैःपौष्टिकैःश्चसमिदाज्यतिलैर्हुत्वापूर्णांदत्वाशिलाःपीठंस्नपयेत्॥ अ
ग्निर्मूर्द्धेतिमंत्रतकुंभेनः॥ यज्ञायज्ञेतिपंचकषायैः॥ गायत्र्यागोमूत्रेण॥ मानस्तोकेगोमयेन
गंधद्वारांगंधेनः॥ पयःपृथिव्यांपंचगव्येन॥ आप्यायस्वक्षीरेण॥ दधिक्राव्णाःदध्ना॥ घृतवती
तिघृतेन॥ मधुवातामधुना॥ आपश्नैः शर्करया॥ गंधद्वारांगंधेन॥ याःफलिनीःफलोदकेन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ प्र॰का ॥
॥ २४ ॥

हविष्मतीः पंगोदके ॥ याश्चौषधीः सर्वौषधीजलेन ॥ श्रीमधयशनिधान्योदकेन ॥ इमम्मेगंगेतीर्थो
दकेन ॥ गंधद्वारांपुनर्गंधोदकेन ॥ प्रत्याल्पकुंकुमचंदनान्याविलप्यवाससाछाद्यनामभिः पूजये
त् ॥ नामानितु ॥ तत्रमध्ये॰ नंदा॰ भद्रा॰ जया॰ पूर्णा॰ जेता॰ अपराजिता॰ विजया॰ मंगला॰ धर
णीचेति ९ ॥ तासांनिधिकुंभास्त ॥ भद्रशुभजविभद्रसनंदपुष्पदंतजयविजयकुंभकर्णोत्तरसं
ज्ञाः ॥ ९ ॥ पंचपक्षे ॥ नंदाभद्राजयारिक्तापूर्णाच ॥ निधिकुंभास्तु ॥ पद्ममहापद्मशंखमरकतः स
मुद्रश्चेति ॥ चतुःपक्षे ॥ गायत्री॰ उष्णीक्॰ अनुष्टुप्॰ बृहतीच ॥ तासांपद्माद्याश्चत्वारोनिधिकुं
भाः ॥ ततः शिलामंडपेवेद्यांकुशेषुनिवेश्यकुंडेषुसर्वाः शिलानामभिर्मंत्रैराज्येनशान्तधारेराच
शतंकृत्वापूर्णांतेकुंभेषुसंभवाभ्युक्ष्यानैः शिलामूलमध्याग्रेषुनामभिःसिंचेत् ॥ अथाचार्यः
खानमभौदिग्वलिंदत्वाशिलास्थानेषुशिलाधारान्न्यसेत् ॥ यथा ॥ प्रासादमध्येखातेधरणी

॥ राम ॥
॥ २४ ॥

240

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शिलायां शिलामक्षतो परिसंस्थाप्योत्तरसंज्ञं कुंभं मध्वाज्यपारदसवर्णरत्नगर्भं गंधादिभूषितं
स्थापयेत् ॥ एवं पूर्वाद्यष्टदिक्षु भिन्नखातेषु नंदाद्या धारशिलाः ॥ भद्रादिनिधिकुंभाश्च स्थाप्याः ॥
ततः प्रासादमध्ये उत्तरकुंभोपरि धरशिलां न्यस्य पूर्वादिषु नंदाद्या न्यसेत् ॥ पंचपक्षे ॥ पूर्णां म
ध्येऽग्न्यादिकोणेषु पद्मादिनिधिकुंभोपरि न्यसेत् ॥ तासां मंत्राः ॥ ॐ पूर्णे त्वं महाविद्ये सर्वसंदोह
लक्षणे ॥ सर्वसंपूर्णमेवास्य कुरु प्रांगिरसः सुते ॥ ॐ नंदे त्वं नंदिनि पुंसां त्वामत्र स्थापयाम्यहं ॥ प्रा
सादे भीष्म संहृष्टा यावच्चंद्रार्कतारकं ॥ आयुः कामश्रियं देहि देवि वासिष्ठनंदिनि ॥ अस्मिन् रक्षा
सदा कार्या प्रासादे यत्नतस्त्वयेति याम्यां नंदां ॥ ॐ भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि ॥ आयु
र्दा कामदा देवि सुखदा च सदा भवेति नैर्ऋते भद्रां ॥ ॐ जये त्वं सर्वदा देवि तिष्ठ संस्थापिता मया ॥ नि
त्यं जयाय भूत्यै च स्वामिनो भव भार्गवि ॥ इति वायव्ये जयां ॥ ॐ रिक्ते त्वं रिक्तदोषघ्ने सिद्धिमुक्तिप्रदे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभे॥ सर्वदासर्वदेवेषुप्रीतिस्तास्मिन्नीशरूपिणि॥ इतीशान्यांरिक्तांदेवेजीर्णेप्रासादेनूतनेनंदाद्या
श्रपो॥ चतुःपक्षेनंदाद्याश्चनस्त्रः॥ ततोदिग्बलिंदत्वाऽघोरेणशतमष्टोत्तरमाज्येनहुत्वाकर्मशेषं
समापय्यशांतिपाठंकृत्वाभिषिक्तोयजमानऋत्विग्भ्योदक्षिणांदत्वाविप्रान्भोजयेत्॥ ॥अथ
स्तंभोच्छ्रायः॥ ॥वास्तुहोमंकृत्वास्तंभंस्नपयित्वागंधादिनाभ्यर्च्योर्ध्वदेशेनशुक्लवस्त्रेणावेष्ट्या
ग्नेयकोणेशुभेमुहूर्तेस्तंभमाचार्यः॥ उच्छ्रयस्ववनस्पते॥ ऊर्ध्वस्तिष्ठामयइतिद्वाभ्यामनुमंत्र्या
भ्यर्च्यतस्योपरिनवकुंभंन्युब्जंकृत्वा॰ सिद्धार्थसर्वौषधीधान्ययुतांपोटलिकामध्येवोचदिनिस्तंभे
वध्वाकोणेस्तंभमान्यस्य॰ वास्तोष्पतइतिमधुघृतेनाष्टोत्तरशतंहुत्वाशिख्यादिभ्यःप्रत्येकमाज्या
हुतित्रयंहुत्वादिग्बलिंदत्वाशांतिकलशोदकेनस्तंभंयजमानंचाभिषिंचेत्॥ ततस्त्वाचार्यादिभ्यो
दक्षिणांदत्वाविप्रान्भोजयेत्॥ एवंद्वारशाखोच्छ्रयोपि॥ ॥इतिपूर्तकमलाकरेप्रासादकरणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथप्रासादप्रतिष्ठा॥ ॥मात्स्येसूतउवाच॥ ॥अथातःसंप्रवक्ष्यामिप्रासादविधिनिर्णयं॥ वास्तोः
परिक्षितेसम्यग्वास्तुदेहेविचक्षणाः॥ वास्तूपशमनंकुर्यात्समिद्भिर्वलिकर्म्मणा॥ जीर्णोद्धारेतथो
द्यानेतथान्यगृहवेशने॥ नवप्रासादभवनेप्रासादपरिवर्त्तने द्वाराभिवर्त्तनेतद्वत्प्रासादेभग्नगेहेषुच
वास्तूपशमनंकुर्यात्पूर्वमेवविचक्षणाः॥ एकाशीतिपदंलिख्यवास्तुमध्येचपिष्टकैः॥ होमस्त्रि
मेखलेकार्यः कुंडेहस्तप्रमाणके॥ यवैः कृष्णतिलैस्तद्वत्समिद्भिःक्षीरवृक्षकैः॥ पालाशैः खादिरै
र्वापामार्गौडंवरसंभवैः॥ ॥कुशदूर्वामयैर्वापिमधुसर्पिःसमन्विते॥ ॥कार्यस्तुपंचभिर्विल्वैर्विल्वबी
जैरथापिवा॥ होमांतेभक्ष्यभोज्यैस्तुवास्तुदेशेवलिंहरेत्॥ तद्वद्विशेषनैवेद्यमिदंदद्यात्क्रमेणतु
ईशकोणेघृताक्तंतुशिखिनेविनिवेदयेत्॥ ओदनंसोत्पलंदद्यात्पर्जन्यायघृतान्वितं॥ जयंताय
ध्वजान्पीतान्नैवेद्यंकुर्म्मंचसंन्यसेत्॥ इंद्रायपंचरत्नानिपैष्टंचकुलिशंतथा॥ वितानकंचसूर्याय

Nepal Sanskrit University, Valmeeki Campus

॥प्र·का॥ धूम्रंशक्तुंतथैवच ॥ सत्यायघृतगोधूमंमत्स्यंदद्याद्भृशायच ॥ शष्कुल्यश्चांतरिक्षायदद्यात्सक्तुंचवा
॥२६॥ पवे ॥ लाजाःपूष्णेचदातव्याविततथेचणकोदनं ॥ गृहक्षतायमध्वन्नंयमायपिशितोदनं ॥ गंधोदनंच
गंधर्वेभृंगेमेषस्यजिह्विका ॥ मृगाययावकंदद्यात्पितृभ्यःकृशरंतथा ॥ दौवारिकेदंतकाष्ठंपैष्टंकु
ल्वबलिंतथा ॥ सुग्रीवेपूरिकांदद्यात्पुष्पदंतायपायसं ॥ कुशस्तंबेनसहितंपुष्पपद्मंचवारुणे पैष्टीं
242 सुरामयंदद्यादसुरायसुरामता ॥ घृतोदनंचशोषाययवान्नंराजयक्ष्मणे ॥ घृतलड्डुकांस्तुरोगायना
गेपुष्पंफलान्वितं ॥ भक्ष्यंमुख्यायदातव्यंमुद्गौदनंततःपरं ॥ भल्लाटस्थानकेदद्यात्सोमायमधुपा
यसं ॥ भगायशालुकंपैष्टमदित्येपोलिकास्तथा ॥ दित्येतुपूरिकांदद्याद्दैवंवास्यनोवलिं ॥ क्षीर
मद्यःप्रदातव्यमापवत्सायवैदधिः ॥ सावित्रेलड्डुकान्दद्यात्समत्स्यंचकुशोदनं ॥ सवितृर्गुडपूपा ॥राम॥
सुजयायघृतचंदनं ॥ विवस्वतेपुनर्दद्याद्रक्तचंदनपायसं ॥ हरितालोदनंदद्यादिंद्रायघृतसंयु ॥२६॥

नं ॥ घृतोदनं तु मित्राय रुद्राय घृतपायसं ॥ आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मरो ॥ पृथ्वीधराय
मांसानि कूष्माण्डानि च दापयेत् ॥ शर्करापायसं दद्यादर्यम्णो पुनरेव तु ॥ भक्ष्यं भोज्यं च विविधं ब्रह्म
णो विनिवेदयेत् ॥ सर्वैकां चनं दद्याद् ब्रह्मरोगां पयस्विनीं ॥ माषोदनं घृतं पद्मकेशरं हविषान्वितं ॥ ई
शानभागमाश्रित्य चरक्यै विनिवेदयेत् ॥ मांसोदनं सरुधिरं हरिद्रोदनमेव च ॥ आग्नेयां दिशमा
श्रित्य विदार्यै विनिवेदयेत् ॥ दध्योदनं सरुधिरमस्थिखण्डैश्च संयुतं ॥ पीतरक्तं बलिं दद्यात्तन्ना
येन तु राक्षसे नैऋते ॥ वायव्ये पापराक्षस्यै मत्स्यमांसं सुरासवं ॥ पायसं चापि दातव्यं स्वनाम्ना स
र्वतः क्रमात् ॥ नमस्कारान्तयुक्तेन शरावाद्येन संयुतं ॥ ततः सर्वौषधिस्नातं यजमानस्य कारये
त् ॥ एवं वास्तूपशमनं कृत्वा कर्म समारभेत् ॥ प्रासादभवनोद्यानप्रारंभे परिवर्त्तने ॥ पुरवेश्म
प्रवेशेषु सर्वदोषापनुत्तये ॥ उरंदुर्गा ॥ इति वास्तूपशमनं कृत्वा सूत्रेणावेष्टयेत् ॥ रक्षोघ्नपावमा

॥प्र.का॥
॥२८॥
243

नेनसूक्तेनभवनादिकं॥ अनेनविधिनायस्तुइतिसंवत्सरंबुधः॥ गृहेदेवालयेकुर्यान्नसदुःस्वप्नमवाप्नु
यात्॥ नवव्याधिभयंनस्यनचवंधुधनक्षयः॥ जीवेद्वर्षशतंस्वर्गेकल्पमेकंचतिष्ठति॥ ॥इतिप्रासाद
प्रतिष्ठा॥ ॥अथकलशारोपणं॥ ॥मंडपपूजाग्रहपूजाहोमवास्तुदेवस्थापनहोमादिवलिदानांते
वेदिकोणेषुचतुरःकुंभान्यंचरत्नपल्लवाद्युपेतान्संस्थाप्यश्रीसूक्तेनाभिमंत्र्याचार्यःसर्विकूपंच
कलशैःस्थाप्यकलशंस्नाप्यदिग्वलिंदत्वातैलेनाभ्यज्यगंधाद्यैःसंपूज्यत्रिसूत्रावेष्ट्यप्रथमाप्यायस
त्वेतिघोषमङ्गलस्नानमंडपमानीयमंडपपीठेउपवेश्यपुण्याहंवाचयित्वाघृतवतीतिघृतेनाभ्यस्यद्रु
पदादिवेतियवाम्नस्नहरिद्रापिष्टेनोद्वर्त्योष्णोदकेनप्रक्षाल्यमूर्द्धानंदिवइतिवाल्मीकमृदःया
दिव्याइतिगन्धोदकेन॰ हिरण्यगर्भइतिपञ्चगव्योदकेन॥ याओषधीरितिसर्वौषधैः॥ ह॰८॰स॰पु
विषदित्यक्षतोदकेनस्नपयेत्॥ अथवेदिकोणस्थैः॥ मानस्तोके॥ विल्वोररा८म्॥ सोम८॰रार

॥राम॥
॥२८॥

जानं॥ विश्वतश्चक्षुरिति क्रमेण संस्थाप्य॰ समुद्रज्येष्ठा इति प्रक्षाल्य॰ देवमंत्रेमंत्रेणावाह्य संपूज्य॰
वस्त्रैराछाद्याभित्वाशूरनोनुम इति सूक्तेनामंडपमानीय॰ वेद्युपरिशय्यायां गंधाद्यैः संपूज्य॰ वि
श्वतश्चक्षुरित्यभिमंत्र्य कुंडे घृतदधिक्षीरमधुभिः प्रत्येकं मिलितैश्च देवमंत्रेण हुत्वा॰ पलाशादुं
बराश्वत्थशम्यपामार्गसमिच्चरुतिलैः प्रत्येकमष्टसहस्रमष्टशतं वा हुत्वा पूर्णां दत्वा कुंभे संस्रवा
न्क्षिप्त्वा· तेन पादनाभिहृद्वक्षःशिरांसि स्पृशेत्॥ ततः पुरुषसूक्तेन कलशमभिमंत्र्य सपूज्य प्रासादं
गंधोदकेन प्रक्षाल्य॰ वक्ष्यमाणरत्नन्यासं कृत्वा सत्त्वर्यघोषप्रासादे कलशमारोप्य देवमंत्रेण क
लशे स्थितिं वसंस्थाप्यास्त्रेणाभिमंत्र्य फडिति शूलं चक्रं वा देवायुधं न्यसेत्॥ ततः शीलीस्थिरीकृत्य
फलोदकेनाभिषिंच्य गंधाद्यैः संपूज्य पुष्पवस्त्रास्यन्योन्यवद्यानि कलशाग्रे वध्ये शान्त्यां भूमौलं वध्ये
त्॥ ततः कर्मशेषं समाप्य पूर्णां दत्वा दिग्बलिं दत्वा· यजमानोभिषिक्तश्चाचार्यादिभ्यो दक्षिणां द

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र॰का॥ त्वाविप्रान्भोजयेत् ॥ ॥इतिकलशारोपणं॥ ॥अथवार्वाशुद्धिः॥ कल्पतरौमार्कंडेयपुराणे॥ ॥वास
॥२८॥ येत्सप्तरात्रंतुत्रिरात्रंवानदीजले॥ ह्रदेतुविमलेगव्येपात्रेवापिसुरक्षितः॥ अधिवास्यजलेदेवमेव
पार्थिवपुंगवाः॥ ततस्तुस्थाप्यविप्रस्तुस्नात्वालंकृत्यपूर्ववदिति॥ ॥अथदेवप्रतिष्ठा॥ ॥तत्रमूल
244 प्रमाणमुच्यते॥ मात्स्ये॥ सूतउवाच॥ अथातःसंप्रवक्ष्यामिप्रतिष्ठाविधिमुत्तमं॥ कुंडमंडपवे
दीनांप्रमाणंचयथाक्रमं॥ चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा॥ माघेवासर्वदेवानांप्रतिष्ठा
शुभदाभवेत्॥ प्राप्यपक्षंशुभंशुक्लमतीतेचोत्तरायणे॥ पंचमीचद्वितीयाचतृतीयासप्तमीतथा
दशमीपौर्णमासीचतथाश्रेष्ठात्रयोदशी॥ आषाढेद्वेतथामूलमुत्तरात्रयमेवच॥ ज्येष्ठाश्रवण
रोहिण्यःपूर्वभाद्रपदातथा॥ हस्ताश्विनीरेवतीचपुष्योमृगशिरस्तथा॥ अनुराधातथास्वाती ॥राम॥
प्रतिष्ठासुप्रशस्यते॥ बुधोबृहस्पतिःशुक्रस्त्रयोप्येतेशुभावहाः॥ ग्रहतारावलंलब्ध्वाग्रहपूजांवि ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धायच॥ शुभेलग्नेशुभेऋक्षेप्रतिष्ठादिकमुत्तमं॥ अयनेविषुवेचैवषडशीतिमुखेतथा॥ एतेषु
स्थापनंकार्यंविधिदृष्टेनकर्म्मणा॥ प्रजापत्येषुशयनंश्वेतेनस्थापनंतथा॥ मुहूर्त्तंस्थापनंकुर्या
त्पुनर्व्वांसेविचक्षणः॥ प्रासादस्योत्तरेवापिपूर्व्वेवामंडपोभवेत्॥ हस्तान्षोडशकुर्वीतदशवाद्वादश
वापुनः॥ मध्येवेदिकयायुक्तःपरिक्षिप्तःसमन्ततः॥ परिक्षिप्तोवेष्टितः॥ पंचसप्तचतुर्वापिक
रान्कुर्वीतवेदिकां॥ कल्पतरौभविष्ये॥ भरणापायेवनक्षत्रेभानोःस्थापनमुत्तमं॥ ॥अग्निपुरा
णे॥ विनाचैत्रेणमाघादौप्रतिष्ठामासपंचके॥ शुक्लपक्षेविशेषेणकृष्णेवाप्यापमंदिनं॥ च
तुर्थीनवमींषष्ठींवर्ज्जयित्वाचतुर्दशीः॥ शोभनास्तिथयःप्रोक्तायदोषाक्रूरवर्ज्जिताः॥ ज्ञान
मिघाधनेष्ठार्द्राश्रुतिरोत्तरात्रयं॥ रोहिणीश्रवणाश्वेतिस्थिरावस्थमहोदया॥ केशरीवृषभःकुं
भःस्थिराःस्युःसिद्धिसाधकाः॥ तथादशमंडपास्तत्रैवोक्ताः॥ हस्तैकेदशहस्तोवामंडपोर्कक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥प्र·का॥
॥२९॥

245

रोथवा ॥ द्विहस्तोत्तरयावद्वाशेषं स्यान्मंडपाष्टकं ॥ इत्युक्तं ॥ चतुर्विंशाद्यष्टविंशतिपर्यंतान्यष्टौ मं
डपा इत्यर्थः ॥ वेद्युच्छ्रितात्रचतुर्थांशो छ्रितिस्तस्याश्विसप्तपंचतोपिवा ॥ नवैकादशभागैस्ता मिष्ट
काभिष्टकल्पयेदितिमात्स्योक्ताः ॥ तस्याः षोडशारं सर्वतोभद्रं वा कुर्यात् ॥ नारदपंचरात्रेतु पा
दुदर्शिशिप्रासापश्त्रिंशद्धस्तं द्विजाथवै ॥ एषधिकं मंडपं कुर्याद्दयत्रिदशैः करैः ॥ स्यात्तूर्यभागे
तन्मध्ये वेदी तो तत्र पंचकापरितः पंचहस्तं च विद्वहस्तोत्तरीयकं ॥ वेद्यामुत्तरदिक्स्थाप्यां कु
र्यात्कुंडं सलक्षणं ॥ ततोऽपरस्यां च तथा नेतत्र मुन्मीलयेत्सुते ॥ मंडपं मध्यमायां तु वेद्यां तन्ध्यक
पंकजं ॥ वेदिकायां चतुर्थ्यां सशयनं परिकल्पयेत् ॥ स्नानकर्म तथा कुर्यात्स्वम्यां दक्षिणे तु ॥ ॥राम॥
इत्युक्तं मात्स्ये ॥ तोरणाद्युक्तौ क्तं ॥ स्वपल्लिप्तं तथा युक्तं भूतलस्यान्तु शोभनं ॥ वस्त्रैर्नानाविधैस्तद्व ॥२९॥
त्पुष्पदवशोभितं ॥ कृत्वैवं मंडपं पूर्वे चतुर्द्वारे प्रविन्यसेत् ॥ अश्वत्थान्कलशान्तद्वैजलकांचनग

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भितान्॥ चूतपल्लवसंछन्नान्सितवस्त्रयुगान्वितान्॥ सर्वौषधिफलोपेतांचंदनोदकपूरितान्
ध्वजांश्चलोकपालानांसर्वदिक्षुनिवेशयेत्॥ पताकाजलकारांमध्येस्यान्मंडपस्यतु॥ गंधपुष्पा
दिकंकुर्यात्स्वैःस्वैर्मंत्रैरनुक्रमात्॥ बलिंचलोकपालेभ्यःस्वमंत्रेणनिवेदयेत्॥ ऊर्ध्वंतुब्रह्मणोदे
यस्त्वधस्ताच्चवासुके॥ संहितायांतुयेमंत्रास्तद्दैवत्याःश्रुतौस्मृताः॥ तैःपूजालोकपालानांक
र्त्तव्यावसनंततः॥ त्रिरात्रमेकरात्रंवापंचरात्रमथापिवा॥ अथवासप्तरात्रंतुकार्यंस्यादधिवा
सनं॥ स्वंसतोरणांकृत्वाश्चधिवासनमंडपं॥ तस्याप्युत्तरतःकुर्यात्स्नानमंडपमुत्तमं॥ तद
र्द्धेनविभागेनचतुर्भागेनवापुनः॥ ॥आनीयलिंगमर्च्चांवाशिल्पिनःपूजयेद्बुधः॥ क्षमस्वमितिऽ
तान्ब्रूयाद्यजेमानोस्यतःपरांदेवंप्रस्त्रवर्णांकृत्वानेत्रयोनिःप्रकल्पयेत्॥ लक्षणोद्धरणांवक्ष्येलिं
गस्यापिसमंततः॥ सर्वतःस्रुवलिंदत्वासिद्धार्थघृतपायसैः॥ पुक्लपुष्पैरलंकृत्यघृतगुग्गुल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

246

धूपितैः॥ विप्रवाचनकं कुर्यात् दत्वाशक्त्या च दक्षिणां॥ गामेकां कनकं चैव स्थापकाय निवेदयेत्॥ आ
चार्यायेत्मर्थः॥ लक्षणं कारयेत्पश्चान्मंत्रेणानेन वै द्विजाः॥ ॐ नमो भगवते तुभ्यं शिवाय हरये नमः
हिरण्यरेतसे विष्णो विश्वरूपाय ते नमः॥ मंत्रोयं सर्वदेवानां नेत्रज्योतिष्वपि स्मृतः॥ एवमामंत्र्य देवे
शं कांचनेन विलेखयेत्॥ लक्षणोद्धरणं कुर्याल्लिंगस्य तु समाहितः॥ त्रिधा विभज्य पूजायां लक्षणं
स्याद्विभागकं॥ रेखात्रयं तु कर्त्तव्यं यवाष्टन्यात्र संयुतं॥ आचार्यस्तु भवेन्नित्यं सर्वदोषविवर्जितः॥ मू
र्त्तिपाश्च द्विधाश्चैव कुलीनाश्च जवस्तथा॥ मूर्त्तिपाश्च द्विजः॥ द्वात्रिंशत्षोडशावापि अष्टौ वा श्रुतिपा
रगाः॥ अष्टमध्यकनिष्ठेषु मूर्त्तिपाला प्रकीर्त्तिताः॥ स्नानेलिंगमथार्चां वा नीत्वा स्नपनमंडपं॥ गीत
मंगलशब्देन स्नपनं तत्र कारयेत्॥ पंचगव्यकषायेन मृद्भिर्भस्मोदकेन च॥ शौचं तत्र प्रकुर्वीत नवेदं
त्रवतुष्टयात्॥ समुद्रज्येष्ठमंत्रेणाप्यापोहिष्ठेति चापरः॥ यासां राजेति मंत्रेश्च आपो हिष्ठेति चापरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वं स्नाप्य ततो देवपूज्य गंधानुलेपनैः ॥ वस्त्राद्यवस्त्रयुग्मेन त्वभिवस्त्रेणुदाहरं ॥ उत्थापयेत्ततो देवमु
त्तिष्ठब्रह्मणास्पते ॥ आमूरजमिति तथा रथेतिष्ठेति वा परः ॥ रथे ब्रह्मरथे वापि वहनं शिल्पिगणेन तु ॥
आरोप्य चानयेद्विद्वान्नाक्रमेण प्रवेशयेत् ॥ ततः प्रस्तीर्य संस्थानि स्थापयेद्धुनकैर्बुधः ॥ कुशानास्तीर्य
उष्णीशि स्नापयेत्त्वाम्मुखं ततः ॥ ततस्तु निद्राकलशं वस्त्रकांचनसंयुतं ॥ शिरोभागे देवस्य जपन्नेवं
निधापयेत् ॥ आपो देवीति मंत्रेण आपो अस्मान्मातरीति च ॥ ततो दुकूलपट्टवस्त्रैश्चाच्छाद्य शीर्षोप
धानकं ॥ दध्याच्छिरसि देवकौशेयं वा विचक्षणः ॥ मधुना सर्पिषाभ्यज्य तथा सिद्धार्थकैस्ततः ॥ आ
प्यायस्वेति मंत्रेण जपन्नेवं निधापयेत् ॥ आपो देवीति मंत्रेण या ते रुद्र शिवेति च ॥ उपविश्य पालये दे
वं छत्रचामरदर्पणं ॥ शिरोपरि त्रिसरं दद्याद्वाहस्पत्येति मंत्रतः ॥ उकूलपट्टैः कार्पासैर्नानाचित्रैर
थापि वा ॥ आच्छाद्य देवं सर्वत्र छत्रं चामरदर्पणं ॥ पार्श्वे तु स्थापयेत्तत्र वितानं पुष्पसंयुतं ॥ रत्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र·का॥ ॥३१॥ न्यौषध्ययस्तद्वद्दयन्तान्यासनानि च ॥ अभिन्नास्त्रमंत्रेणायथाविभवतोन्यसेत् ॥ क्षीरं क्षौद्रं घृतं त
द्वद्भक्ष्यभोज्यान्नपायसैः ॥ षड्विधैश्च रसैस्तद्वत्समंतान्परिपूजयेत् ॥ बलिं दद्यात्प्रयत्नेन मंत्रेणाने
न भूरिशः ॥ त्र्यंबकं यजामहे सर्वतः शनकैर्भवि ॥ मूर्तिमान्स्थापयेत्पश्चात्सर्वदिक्षु विचक्षणः
ऋत्विजः प्रतिदिशं होमार्थं स्थापयेदित्यर्थः ॥ चतुरो द्वारपालांश्च द्वारेषु विनिवेशयेत् ॥ श्रीसूक्तं
247 पावमानं च सोमसूक्तं सुमंगलं ॥ तथा च शांतिकाध्यायमिंद्रसूक्तं तथैव च ॥ रक्षोघ्नं च तथा सूक्तं
पूर्वतो बह्वृचः पठेत् ॥ रौद्रं पुरुषसूक्तं च श्लोकाध्यायं सशुक्रियं ॥ तथैव मंडलाध्यायमध्वर्युर्द
क्षिणतो जपेत् ॥ श्लोकाध्यायो देवसवितः प्रसुव यज्ञं ॥ शुक्रियं ऋचं वाचमिति ॥ मंडलाध्याय
आदित्यो वा एष इति ॥ वामदेव्यं बृहत्साम रथंतरं ॥ तथा पुरुषसूक्तं च रुद्रसूक्तं सशांतिकं ॥ भारुं ॥राम॥ ॥३१॥
डानि च सामानि छंदोगः पश्चिमे जपेत् ॥ भारुंड इमं स्तोममर्हत इति ॥ अथर्वांगिरसं तद्वन्नीलरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽनथैवच ॥ तथापराजितांदेवांमधुसूक्तंसरौद्रकं ॥ तथैवशांतिकाध्यायमथर्वाचोत्तरेजपेत्० अथर्वादे
शोत्यायवरुणाय० आंगिरसं० त्वांगिरसोजन्मानि० नीलरुद्रस्याऽऽद्यइति ॥ अपराजितापरिमानी
नि ॥ मधुवाता ॥ रुद्रसूक्तेभवाशर्वयोमृडतं ॥ शन्नइंद्राग्नीतिच ॥ शिरःस्थानेतुदेवस्यस्थापकोहोम
माचरेत् ॥ शांतिकेःपौष्टिकेस्तत्तन्मंत्रैर्व्याहृतिपूर्वकैः ॥ पलाशोडुंवराश्वत्थास्त्वपामार्गःशमीतथा ॥
हुत्वासहस्रमेकैकंदेवंपादेउपस्पृशेत् ॥ ततोहामंसहस्रेणाहुत्वाहुत्वाततस्ततः ॥ नाभिंमध्यंतथावक्षः
शिरस्त्वाप्यालभेत्पुनः ॥ हस्तमात्रेषुकुंडेषुमूर्तिर्याःसर्वतोदिशं ॥ समेषलेषुनेकर्ण्येयोनिवक्त्रेषुचा
दरात् ॥ वितस्तिमात्रायोनिःस्याद्गजोष्ठसदृशीतथा ॥ आयताच्छिद्रसंयुक्तापार्श्वतःकालयोद्वि
ता ॥ कुंडाकृत्यनुसारेणासर्वतश्चतुरंगुला ॥ विस्तारेणोछ्रयात्तद्वच्चतुरस्रासमाभवेत् ॥ वेदिभिर्त्तिं
परित्यज्यत्रयोदशभिरंगुलैः ॥ सर्वतवस्तुकुंडेषुलक्षणाचैवहृश्यते ॥ आग्नेयशक्रयाम्येषुहोतव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥प्र॰ का॥ मुद्गाननैः॥ ॥अग्निपुराणे॥ वेदीपदं ततं स्यत्कुंडानीनवपंचवा॥ एकं वा शिवकाष्ठायां प्राच्या
॥३२॥ वाननुरोः परं॥ तथा॥ भगमश्चैतत्रयंखंडेन्दुपक्षेत्र्यस्त्रंचनैऋते॥ हत्तेषडस्त्रंपद्मंचसौम्येचाष्टास्त्रंवंशि
वे॰ इत्युक्तं॥ नवत्वेशाच्यामीशानपूर्वान्तरालेवद्धेचतुरस्त्रे॥ पंचपक्षे॥ प्रागादिदिक्षुईशान्यांवेति
नवपक्षेपंचपक्षेचसर्वाणिचतुरस्त्राणिवर्तुलानिवाकार्याणीतित्रिविक्रमः॥ प्रागादिचतुर
248 स्त्रमगादीनिवाहस्तामात्राणि॥ कल्पतरौभविष्ये तु॰ चतुरस्त्रंप्रियायुक्तंपूर्वकुंडंतुकारयेत्॥ दक्षि
णेनार्द्धचंद्रस्याद्वारुणंपादिशिवर्तुलं॥ पद्माकारंतुवैकुर्यादुत्तरेणविचक्षणाइतिचत्वार्युक्तानि॥
तत्रैवमार्कंडेयपुराणेपि॥ ॥चतुर्भिस्तुचतुर्दिक्षुहोमः कार्योविचक्षणैरित्युक्तं॥ तत्रैवभविष्ये ॥राम॥
पार्श्वतश्चाग्निकुंडानिदिक्क्रमेण॥ एकल्पयेद्यथोक्तानिचत्वार्येकामथापिवा॥ मात्स्ये॥ मूर्त्तिपालो ॥३२॥
कपालेभ्योमूर्त्तिभ्यःक्रमशस्तथा॥ तथामूर्त्त्यधिदेवानांक्रमात्कुंडं॰ समंततः॥ वसुधावसुरेताश्च

यजमानोदिवाकरः॥ जलंवायुस्तथासोमस्त्वाकाशंवाएवंमतं॥ देवस्यमूर्त्तयस्त्वष्टावेताः कुंडेषुसंस्म
रेत्॥ स्तासामधिपान्वक्षोयेविशामूर्त्तियामताः॥ पृथिवीयात्तुशर्वस्तुपशुपश्चाग्निमेवच॥ य
जमानंतथैवोग्रोरुद्रश्चादित्यमेवच॥ भवोजलंतथापानिवायुमीशानमेवच॥ महादेवस्तथाचं
द्रंभीमश्चाकाशमेवच॥ सर्वदेवप्रतिष्ठासुमूर्त्तियास्थेवमेवहि॥ एतेभ्योवैदिकैर्मंत्रैर्यथास्वंहोममा
चरेत्॥ तथाशांतिघटंकुर्यात्प्रतिकुंडेषुसर्वतः॥ शतंतेवासहस्रंतेसपूर्णाहुतिरिष्यते॥ सम
पादस्तथाहोतान्प्रशांतात्माविनिक्षिपेत्॥ आहुतीनांचसंपातंपूर्वकुंडेषुसंन्यसेत्॥ मूलमध्यो
त्तमांगेषुदेवेनैनावसेचयेत्॥ स्थितंचस्नापयेत्तेनसंपाताहुतिवारिणा॥ प्रतियामेषुधूपंचनैवेद्यं
चंदनोदकं॥ पुनःपुनःप्रकुर्वीतहोमःकार्यःपुनःपुनः॥ पुनःपुनश्चदातव्यायजमानेनदक्षि
णा॥ समवेतैर्द्विजैस्तैसर्वैःपूजनीयाःसमंततः॥ विचित्रवासकटकैर्हेमसूत्रांगुलीयकैः॥ वासो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिः शयनीयैश्च पानीयामेपुशक्तितः ॥ भोजनं चापि दातव्यं यावत्तस्याधिवासनं ॥ वलिस्त्रिसंध्यं
देयस्तु भूतेभ्यः सर्वतो दिशं ॥ ब्राह्मणान्भोजयेत्पूर्वं शेषान्वर्णांस्तु कामतः ॥ रात्रौ महोत्सवः कार्यो
नृत्यगीतकमंगलैः ॥ सदा पूज्यः प्रयत्नेन चतुर्थीकर्म यावता ॥ त्रिरात्रमेकरात्रं स्यात्पंचरात्रमथा
पि वा ॥ सप्तरात्रमथो कुर्यात्क्वचित्सद्योधिवासनं ॥ कृत्वाधिवासं देवानां शुभं कुर्यात्समाहितः ॥
पुष्पोदकेन प्रासादं प्रोक्ष्य मंत्रयुतेन तु ॥ ऐशानीं दिशमाश्रित्य मध्ये देवं प्रपूजयेत् ॥ स्वधः कूर्मं
शिलायां प्रोक्ता सदा ब्रह्मशिलाधिका ॥ उपर्यवस्थिता तस्य ब्रह्मभागादिका शिला ॥ ततः प्रक्षालि
तां कृत्वा पंचगव्येन पिंडिकां ॥ कषायतोयेन पुनर्गंधयुक्तेन सर्वतः ॥ देवभार्याश्रयं सत्र पिंडिका
स्तु नियोजयेत् ॥ देवभार्या गौरी ॥ ततउत्थाप्य देवेशं मुक्तिपुष्पसरोति च ॥ आनीय गर्भभवनं पी
ठं तेस्थापयेद्बुधः ॥ अर्घ्यपाद्यादिकं तत्र मधुपर्कं प्रयोजयेत् ॥ ततो मुहूर्ते विप्र स्मरत्तन्यासं स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माचरेत् ॥ वज्रमौक्तिकवैडूर्यशंखस्फटिकमेवच ॥ पुष्परागेंद्रनीलञ्चनन्तं पूर्वादितः क्रमात् ॥ ताल
कंचसिलंवज्रमंजनश्यामनमेवच ॥ कौक्षिकंसुवर्णमाक्षिकं ॥ गैरिकंसवीदै ॥ गोधूमंचयवंयंचैव
तिलंमुद्गंतथैवच ॥ नीवारमथश्यामाकंशर्षपंव्रीहिमेवच ॥ न्यसेत्क्रमात्पूर्वादिचंदनंरक्तचंदनं स्त्र
गुरुचांजनचैवउशीरंचनतः परं ॥ वैष्णवीसहदेवीचलक्ष्मणांचततः परं ॥ स्वलोकपालनाम्ना
नुन्यस्येदोंकारपूर्वकं ॥ सर्ववीजानिधातूंश्चरत्नान्योषधयस्तथा ॥ कांचनंपद्मरागंचपारदंपद्ममेवच
कूर्मंधरांवृषंतत्रन्यसेत्पूर्वादितः क्रमात् ॥ वृत्तस्थानेप्रदातव्याः संहताः स्युः परस्परं ॥ पुलकंविद्रु
मंताम्रंकांस्यंचैवारकूटकं रजतंविमलंपुष्पलोहंचानुक्रमेणतु ॥ पुलकंरोमकंञ्चयस्कान्तइ
तिकल्पनहः ॥ विमलंसूर्यकांतः ॥ पुष्पंपद्मंविदुर्लोहं ॥ कांचनंहरितालंचसर्वाभावेविनिः
क्षिपेत् ॥ इत्यादीजौषधीस्थानेसहदेवीयवानपि ॥ न्यासमंत्रास्ततोवक्ष्येलोकपालात्मकानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह इंद्रस्तु महसा दीप्तः सर्वदेवाधिपो महान् ॥ वज्रहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥ आग्नेयः
पुरुषो रक्तः सर्वदेवमयोव्ययः ॥ धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः ॥ यमश्चोत्पलवर्णाभः
किरीटी दंडधृक्सदा ॥ धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः ॥ निर्ऋतिस्तु पुमान्कृष्णः स
र्वरक्षोधिपो महान् ॥ खड्गहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥ वरुणः धवलो विष्णुः पुरुषो
निम्नगाधिपः ॥ पाशहस्तो महासत्वस्तस्मै नित्यं नमो नमः ॥ वायुश्च सर्ववर्णोयं सर्वगंधवहः शु
चि ॥ पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥ गौरो यस्तु पुमान्सौम्यः सर्वौषधिसमन्वितः ॥ न
क्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥ ईशानः पुरुषः शुक्लः सर्वविद्याधिपो महान् ॥ शूलहस्तो
विरूपाक्षस्तस्मै नित्यं नमो नमः ॥ पद्मयोनिश्चतुर्मूर्त्तिर्वेदवासः पितामहः ॥ यज्ञाध्यक्षश्चतुर्व
क्त्रस्तस्मै नित्यं नमो नमः ॥ योसावनंतरूपेण ब्रह्मांडं सचराचरं ॥ पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं

250

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमो नमः ॥ ॐकारपूर्वकाद्येनेन्यासे वलिनिवेदयेत् ॥ मंत्राः स्फः सर्वकार्य्याणामृद्धिपुत्रफलप्रदाः
स्थासे क्षिप्त्वा तु रत्नानि पायसेनानुलेपयेत् ॥ पठनाछादयेत्सूत्रं पुष्कैनापिब्रयत्नतः ॥ ततस्त्वस्थाप्यदे
वेशमिष्टंपीठे तु सुशोभने ॥ अंशो लग्नं ध्रुवा द्यौरिति मंत्रेणाभ्युक्ष्य परिनिवेशयेत् ॥ ततः स्थिरीकृ
त्य यास्य हस्तं दत्त्वा तु मस्तके ॥ देवद्रुतं तथा सौम्य रौद्रं स्त्रक्कं तथैव च ॥ आत्मानमीश्वरं ध्यात्वाना
नाभरणभूषितं ॥ यस्य देवस्य यद्रूपं तद्ध्यानेन संस्मरेत्तदा ॥ स्थापनेन तु देवविशेषेणामंत्रणाह ॥ अत
नसीपुष्पसंकाशं शंखचक्रगदाधरं ॥ तं स्थापयामि देवेशं देवीभक्त्या जनार्दनं ॥ इति हरेः ॥ एवंत्
लिंगादग्नेपिज्ञेय ॥ अष्टादशभुजं देवं चंद्रार्द्धकृतशेखरं ॥ गणेशं वृषभस्थं च स्थापयामि त्रिलोच
नं ॥ शंभोः ॥ ऋषिभिः संस्तुतं देवं चतुर्वक्त्रं जटाधरं ॥ पितामहं महाबाहुं स्थापयाम्यंबुजोद्भव ॥ ब्रह्म
णः ॥ सहस्रकिरणाभानुं मप्सरोगणासेवितं ॥ पद्महस्तं महाबाहुं स्थापयामि दिवाकरं ॥ सूर्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥प्र०का॥ वेदमंत्रांस्तथा रौद्रान् रुद्रस्य स्थापने जपेत् ॥ विष्णोस्तु स्थापने तद्वद्ब्राह्मस्यं ब्राह्मशिवैर्बुधः ॥ सौर्यं सूर्यस्य
॥३५॥ जपेत्तथान्येषु तदाश्रयाः ॥ वेदमंत्रेषु निष्ठास्तु यस्मात्तत्तुःप्रदायिनी ॥ स्थापयेद्यस्तु देवेशं तं प्रकल्पये
त् ॥ तस्य पार्श्वस्थितानन्यान्स्मरेत्तान्परिचारकान् ॥ गणान्नंदी महाकालं वृषभं भृंगिरिटिं गुहं ॥ देवीं
विनायकं चैव विष्णुं ब्रह्माणमेव च ॥ रुद्रं शक्रं जयंतं च लोकपालान्समंततः ॥ तथैवाप्सरसः सर्वा गं
251 धर्वं गणगुह्यकान् ॥ यो यत्र स्थाप्यते देवस्तस्यैतान्परितः स्मरेत् ॥ आवाहयेत्तथा रुद्रं मंत्रेणानेन
यत्नतः ॥ यस्य सिंहा रथे युक्ता व्याघ्राश्च तात्तथोरगाः ॥ ऋषयो लोकपालाश्च देवाः स्कंदस्तथा वृषः
प्रियागणा मातरश्च सोमो विष्णुः पितामहः ॥ नागयक्षाः सगंधर्वा ये च दिव्या नभश्चराः ॥ तम
व्यत्ययेन होरा ॥१०॥ स्वपञ्चनवमेशा द्रेष्काणाद्याः ॥११॥ चरे मेषस्वस्मात् स्थिरे नवमभाद्द्विस्व
भावे पञ्चमभान्नवांशाः ॥१२॥ स्वभाद्द्वादशांशाः ॥१३॥ समे शुक्रज्ञेज्यार्किकुजानां पञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृष्टशेषवास्त्रिंशांशाविषमेन्यथा॥ १४॥ षड्वर्गास्ते ससप्तमांशसहिताःसप्तवर्गाः॥ १५॥
विषमेस्वस्मात्समेसप्तमात्सप्तमांशः॥ १६॥ सप्तवर्गादशांशषोडशांशषष्ट्यंशयुताःदशव-
र्गाः॥ १७॥ ओजेस्वस्मात्समेनवमाद्दशमांशः॥ १८॥ चरेजाद्याः स्थिरेसिंहाद्याद्विस्वभावेचा-
पाद्याःषोडशांशाः॥ १९॥ स्वभात्षष्ट्यंशः॥ २०॥ आदिस्वोच्चाधिमित्रवर्गाःपारिजातोत्त-
मगोपुरसिंहासनपारावतदेवलोकैरावतवैशेषिकसंज्ञाःक्रमात्॥ २१॥ षष्ट्यंशेशास्त्वयु-
ग्मधोर॥ १ राक्षस २ देव ३ कुबेर ४ रक्षोगण ५ किन्नर ६ भ्रष्ट ७ कुलघ्न ८ विषा ९ ग्नि १०॥
माया ११ प्रेतपुरीष १२ वरुण १३ इन्द्र १४ काला १५ अहि १६ चन्द्र १७ चन्द्र १८ मृदु १९
मृदु २० पद्म २१ विष्णु २२ वागीश २३ दिगम्बर २४ देव २५ र्द्र २६ नाश २७ क्षितीश
२८ कमलाकर २९ मन्दात्मज ३० मृत्यु ३१ काल ३२ दावाग्नि ३३ घोर ३४ भय ३५ क

397

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राक्षक ३६ सुधा ३७ मृत ३८ पूर्णेन्दु ३९ विष ४० कलि ४१ नाश ४२ वंशक्षयो ४३ त्पात ४४ का
२ लरूप ४५ सौम्य ४६ मृदु ४७ शीतल ४८ दंष्ट्राकराले ४९ न्दुमुख ५० कालाग्नि ५१ दण्डायुध
५२ निर्मल ५३ शुभा ५४ शुभ ५५ शीतल ५६ सुधा ५७ पयोधि ५८ भ्रमणो ५९ न्दुरेखा ६० युग्मे
त्वव्यत्ययः ॥ २२ ॥ लग्नाद्व्ययस्तदशमानि केन्द्राणि ॥ २३ ॥ स्वायास्तमात्मजाः पणफराः ॥ २४ ॥
अरिधर्मान्त्या आपोक्लिमाः ॥ २५ ॥ आयखारयुपचयाः ॥ २६ ॥ धर्मात्मजौ त्रिकोणौ ॥ २७ ॥ तुर्या
ष्टमौ चतुरस्रौ ॥ २८ ॥ स्वास्तौ मारकौ ॥ २९ ॥ स्वान्त्यौ नेत्रसंज्ञौ ॥ ३० ॥ षष्ठाष्टमान्त्यास्त्रिका
दुष्टाख्याः ॥ ३१ ॥ कर्कालिझषान्त्यभागाः कष्टसन्धयः ॥ ३२ ॥ सिंहादिचतुष्कं दीर्घं कुम्भादिचतु २
ष्कं ह्रस्वं शेषाः समाः ॥ ३३ ॥ अर्को १ जीवः २ कुजः ३ चन्द्रज्ञौ ४ गुरुः ५ मन्दारौ ६ शुक्रः ७ श
निः ८ सूर्येज्यौ ९ शार्केज्यमन्दाः १० जीवः ११ शनि १२ रिति क्रमात्तन्वादिकारकाः ॥ ३४ ॥ क

केघटैणाः झषालितुलाः सजलाः शेषाः शुष्काः ॥ ३५ ॥ क्षीणेन्द्वर्कयमार राहुशिखिनः पापा
स्तन्मालयुतो बुधश्च ॥ ३६ ॥ मन्दज्ञौ क्लीबौ चन्द्राच्छौ स्त्रियौ शेषा नराः ॥ ३७ ॥ चन्द्रार्केज्याः
सात्विकाः शाच्छौ राजसौ शेषास्तामसाः ॥ ३८ ॥ मेषगोमृगकन्याकर्कान्त्यतुलाः सूर्यादुच्च
भानि तत्सप्तमानि नीचभानि दशमतृतीयाष्टाविंशपञ्चादशपञ्चमसप्तविंशविंशाः शा 398
शुक्रादीनां परमोच्चनीचभागाः ॥ ३९ ॥ सिंहगोजाङ्गनाचापतुलघटाः सूर्यादीनां मूलत्रि
कोणभानि ॥ ४० ॥ स्वनवांशकाराशयो वर्गोत्तमाः ॥ ४१ ॥ पिङ्गलनेत्रो रक्तश्यामवर्णः पि
त्तप्रकृतिः समगात्रः प्रतापी स्वल्परोमवानर्कः ॥ ४२ ॥ शुक्लः कृशो वर्तुलाङ्गो मेधावी मृदु
वाक् शुभदृग् विवेकी वातकफात्मा चन्द्रः ॥ ४३ ॥ दुष्टदृक् तरुणाः कृशमध्यो रक्तसिताङ्ग
ः पैत्तिकश्चलधीरुदारप्रताप्यारः ॥ ४४ ॥ गम्भीरवाग्घास्यशीलः सुधीर्दूर्वाश्यामाङ्गस्त्रिधा

तुःपुंश्चलोक्षः ॥ ४५ ॥ स्थूलोगौरस्तुङ्गःकफात्मापिङ्गाक्षश्चमूर्द्धन्यकचाभियुक्तोविद्वान्युक्तः ॥ ४६
२ ॥ सुखीबलीदर्शनीयवपुःसुलोचनःकृष्णाकुटिलकेशःकामीवातकफात्माश्यामःशुक्रः ॥ ४७
॥ क्रियास्वपटुःकातराक्षःकृष्णःकृशदीर्घाङ्गोह्रस्वदन्तोरूक्षतनूरुहोवातात्माकठिनवाग्वि
न्द्योमन्दः ॥ ४८ ॥ अस्थिरक्तमज्जात्वग्वसाशुक्रस्नायूनिसूर्यादीनांधातवः ॥ ४९ ॥ सूर्यस्यमन्द
शुक्रौरिपूबुधःसमःशेषाःसुहृदः ॥ ५० ॥ चन्द्रस्यबुधार्कौसुहृदौशेषाःसमाः ॥ ५१ ॥ भौमस्यशुक्रा
र्कौसमौशौरिःशेषासुहृदः ॥ ५२ ॥ बुधस्येन्दुःशत्रुःशुक्रार्कौमित्रेशेषाःसमाः ॥ ५३ ॥ जीवस्य
बुधशुक्रावरीसमोऽर्कजःशेषामित्राणि ॥ ५४ ॥ शुक्रस्यबुधार्कजौमित्रेकुजेज्यौसमौशेषा ३
वरी ॥ ५५ ॥ मन्दस्यबुधशुक्रौसुहृदौजीवःसमःशेषाःशत्रवः ॥ ५६ ॥ अन्योन्यस्यपार्श्वेव्ययगा
स्तत्कालेमित्राणिशेषाःशत्रवः ॥ ५७ ॥ उभयथामित्राण्यधिमित्राणिशत्रवस्त्वधिशत्रवोमि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यंशान्नवः समामित्रसमामित्रागाशान्तुसमाः शात्रवः ॥ ५९ ॥ तृतीयदशमौ नवमपञ्चमौ
चतुर्थाष्टमौ सप्तमं पादवृद्धितो ग्रहः पश्यति ॥ ५८ ॥ तृतीयदशमौ शनिस्त्रिकोणं गुरुश्चतुर
स्रं भौमश्च विशेषतः पूर्णं पश्यति ॥ ६० ॥ दिनवारारम्भात्स्वकालो निरूपतो वारप्रवेशका
लान्नः स्ववारस्वराउनहतोष्टभक्तो लब्धं गुलिके ष्टकालः ॥ ६१ ॥ तत्काललग्नतुल्यो गुलि-
कः ॥ ६२ ॥ दिनेकांशगतौ शान्नगाङ्कापञ्चाग्निलिनेलेन्दुमिता गुलिकस्वरांशः ॥ ६३ ॥ अ- 399
न्योन्यदृष्टौ एकत्रदृष्टौ अन्योन्यस्थानस्थिता वेकत्रस्थितौ वा सम्बन्धो वेगन्तव्यः ॥ ६४ ॥
मन्दार्कारागाः शुष्काश्चन्द्रश्च सजलौ जलर्क्षगौ क्षेज्यौ च ॥ ६५ ॥ सर्वग्रहेभ्योधिकांशादिना
त्मकारकस्ततः क्रमेणान्यूनांशाश्च मात्यभ्रातृमातृपितृपुत्रज्ञातिदारकारकाः ॥ ६६ ॥ अं
शाशब्देनात्मकारकनवांशः ॥ ६७ ॥ ओजर्क्षे क्रमाद्बालकुमारयुववृद्धमृताख्यावस्थाः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मर्क्षेव्ययम् ॥ ६८ ॥ द्वादशांशांशकेशापट्केवास्थितः पूर्णफलदः ॥ ६९ ॥ बलं पञ्चगुणं क्रमम् ॥ ७० ॥
४ वक्रगउच्चगो वा महाबली ॥ ७१ ॥ स्वर्क्षे तुङ्गे मूलत्रिकोणगा नानानिष्टफलदाः ॥ ७२ ॥ तत्र पूर्ण
दृष्टो ग्रहेना निष्टफलदः ॥ ७३ ॥ ग्रहर्क्षसङ्ख्याग्रहसंख्याहताष्टनः ग्रहांशसंख्याहतानाडष्टजन्म-
नक्षत्रलग्नसङ्ख्याभिर्युतार्केनष्टाशेषावस्था ॥ ७४ ॥ शयनो १ पवेशन २ नेत्रपाणि ३ प्रका
श ४ गमना ५ गमन ६ सभा ७ गम ८ भोजन ९ नृत्यलिप्सा १० कौतुक ११ निद्रा १२ अव
स्था ॥ ७५ ॥ स्वोच्चगो दीप्तः स्वभगः स्वस्थो हितभगो हृष्टः पद्ध्रुकः शुभवर्गगः शान्तः स्फुरत्क
रिमिः शक्तो मृतो लुप्तो नीचगो दीनः पापशत्रुभगः पीडित ॥ ७६ ॥ इति महादेवकृत ४
जातककल्पे संज्ञानक्षत्रं प्रथमम् ॥ अथ प्रजातिकाध्यायः ॥ चन्द्रे लग्नादृष्टे पितुः परो-
क्षं जन्म ॥ १ ॥ स्थिरे केन्द्रमाङ्कायान्ये चन्द्रेण चाहृष्टे खे द्वादशस्थे पितुः परोक्षं जन्म ॥ २ ॥ च

रैर्केतुप्राग्वज्जातस्यापितरिघिदेशंगतेजन्म॥३॥मन्देङ्गेवास्तेभौमेपितुःपरोक्षंजन्म॥४॥श्वा
च्छान्तेचन्द्रेपि॥५॥भौमस्यांशेचन्द्रेपापलग्नेस्तुभाःस्वायगाःसर्पवेष्टितोजातः॥६॥चतुष्पदे
केशेषेषुसबलेषुखङ्गेगेषुयमलजन्म॥७॥द्वयाजसिंहेङ्गेमन्देवाभौमेभांशतुल्येवयवेनालवे
ष्टितः॥८॥सूर्याग्निकोणास्तगेभौमन्दारौपापभगोजन्मनिपितावक्रः॥९॥पूर्णोन्दौकर्केक्षलग्ने
जीवितुर्ज्येनौकाजन्म॥१०॥जलभेङ्गेऽस्तेपूर्णोन्दोजलासन्नेजन्म॥११॥जलभगावङ्गचन्द्रोज
ला०॥१२॥जलभगेचन्द्रवाम्बुस्थेज०॥१३॥चन्द्रेङ्गेमन्देन्त्येपापदृष्टेकारागारेजन्म॥१४॥क
कोल्पङ्गेर्केजेचन्द्रदृष्टेगर्तेजन्म॥१५॥जलभेमन्देङ्गेक्षदृष्टेक्रीडालयेर्केदृष्टेदेवालयेचन्द्रदृष्टे
सशर्करावन्यांजन्म॥१६॥नृलग्नेमन्देकुजदृष्टेस्मशानेसितेन्दुदृष्टेरमणीयगृहेगुरुदृष्टे
ग्निशालायांरविदृष्टेनरेन्द्रामरालयगोकुलान्यतमेश्वदृष्टेशिल्पालयेज०॥१७॥मन्दारास्यां

५००

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५

पक्षमेस्तेऽङ्के चन्द्रे मात्रा त्यज्यते गुरुदृष्टेतु चन्द्रे दीर्घायुः॥ १८॥ पापदृष्टे चन्द्रेऽङ्गे गेस्ते भौमे मात्रा त्य
क्तो विनश्यति॥ १९॥ पापदृष्टेऽङ्गे मन्दारौ लाभे मातृत्यक्तोऽपि॥ २०॥ मातापितृग्रहयोर्योव
लीतत्सम्बन्धिगृहे जन्म॥ २१॥ सौम्याः सर्वे नीचागा दृश्यनदीप्राकारादिषु जन्म॥ २२॥ नीच
गेषु शुभेषु चन्द्रेऽङ्गे ग्रहमाला दृष्टेऽप्यां जन्म॥ २३॥ चन्द्रे तुर्ये वा मन्दयुतदृष्टे वा जलभांशे स्वका
येजन्म॥ २४॥ सबले कर्के भौमदृष्टे वहुदीपगृहे ज॰॥ २५॥ चन्द्रात्तैलज्ञानम्॥ २६॥ लग्नाद्दीप
वर्तिज्ञानम्॥ २७॥ चरेऽर्के चरः स्थिरेऽर्के स्थिरो द्विस्वभावे स्वराउ वहीपः॥ २८॥ शीर्षोदयांशे
ऽङ्के मूर्ध्नतः प्रसव उभयोदयांशे हस्तौ न्यथा पादतः॥ २९॥ लग्नचन्द्रान्यतरं तौ वन्ध्यस्तगे ५
क्रूरे मातुः कष्टम्॥ ३०॥ केन्द्रगस्य वा वलिनो ग्रहस्य दिशि गृहद्वारम्॥ ३१॥ काष्टात्मन
वं दग्धं चित्रं दृढं रम्यं जीर्णं क्रमादर्कादिषु यो वली तदनुसारि गृहम्॥ ३२॥ वृषाजयोर्मद

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येगृहस्य पूर्वभागे युग्मस्याग्नेय्यां कर्कसिंहयोर्याम्ये कन्यायां नैरृत्ये तुलावृश्चिकयो
: पश्चिमे धनुषो वायौ मन्दभयोः कन्ते भषस्येशान्यां जन्म ॥ ३३ ॥ स्वंशाय्याज्ञानम् ॥ ३४
॥ लग्नादिशिशय्याशिरस्त्रिषड्ङ्कान्येषु पादाः ॥ ३५ ॥ यत्र पापस्तत्रो घातः ॥ ३६ ॥ ल-
ग्नचन्द्रान्तरगग्रहसंख्या उपसूतिका उदगर्द्धस्थ्यन्तरगा दक्षिणार्द्धे बाह्याः ॥ ३७ ॥ वक्रोच्च
संस्थैस्त्रिगुणाः स्ववर्गस्थ्यंशनवांशस्थैर्द्विगुणानि चास्तगैर्द्धमिता उपसूतिकाः ॥ ३८
॥ भिन्नाजाङ्गेषु गोधटाङ्कचतस्रः कर्कहयाङ्गे पञ्चशेषास्तिस्र उ० ॥ ३९ ॥ गोजाश्वियुग्म-
सिंहाङ्गे बहुकष्टो जातो न्यथान ॥ ४० ॥ अङ्गे चन्द्रग्रहमात्रादृष्टे निर्जने प्रसवः ॥ ४१ ॥ स्वा
म्बुगेषु शुभेषु सुखेन प्रसवस्त्रिकोणास्तगेषु पापेषु कष्टतः ॥ ४२ ॥ तुर्ये रवावामन्दाराकर्कयो
र्गे जन्मतः प्राक् पितृमरणम् ॥ ४३ ॥ लग्नषष्ठास्ताष्टमगाः पापा मात्रासहवालस्यमृति

४०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ः॥४४॥ ग्रस्तेचन्द्रेसमन्देलग्नाष्टमेभौमेमा॰॥४५॥ ग्रस्तेर्केमन्दज्ञाभ्यांतमयुतेरन्ध्रा

६ ङ्कजेमा॰॥४६॥ भौमभेऽर्कात्मन्देदृष्टेऽष्टमेचेज्जपेबालकस्यमहाकष्टम्॥४७॥ व्यया

शिपापयुतौबालमृतिः॥४८॥ लग्नेशोसार्किर्नीचगोरन्ध्रेशोबालस्यसद्योमृतिः॥४९॥ राहौ

केन्द्रेपापमात्रयुतदृष्टेबाल॰॥५०॥ नेगोर्केऽङ्कमन्देऽष्टमेभौमेवा॰॥५१॥ मन्दांशभेखेर्केपा

पैर्दृष्टेवा॰॥५२॥ षष्ठाष्टमेचन्द्रेपापैर्दृष्टेवा॰॥५३॥ चरांशेचन्द्रेशुभैरदृष्टेकोणपापावा

॰॥५४॥ मन्दर्क्षकेन्द्रगाव्ययाङ्कज्ञाष्टमगाःसबलाःरवेदृष्टावा॰॥५५॥ कोणान्त्यास्ताङ्गे

षुपापयुतश्चंद्रोबलिशुभायुतदृष्टोवा॰॥५६॥ चन्द्राङ्गेस्तेपापावा॰॥५७॥ मन्दाङ्गेन्दुबल ६

लिनःपापावा॰॥५८॥ क्षीणेन्द्रावङ्गेकेन्द्राष्टमगाःपापावा॰॥५९॥ कर्कोल्पङ्गेखला

ःपूर्वार्द्धेसौम्याःपरार्द्धेबालग्नात्स्थाप्तान्त्येसपापेन्दौशुभादृष्टेशुभायुतेषष्ठकेन्द्रेषुवा॰॥६०॥

त्रिकेसौम्याःकेन्द्रकोणगाःपापालग्नेर्केवा॰॥ ६१॥ चन्द्रपापयुतेषुसर्वकेन्द्रेषुवा॰॥ ६२॥
लग्नास्तगौपापौचन्द्रोमिश्रदृष्टोवा॰। ६३॥ क्षीणेन्दावन्येपापेषुलग्नाष्टगेषुकेन्द्रान्तर
गेषुशुभेषुवा॰॥ ६४॥ पापान्तरेचन्द्रेरन्ध्रास्तसप्तमगेवा॰। ६५॥ सन्ध्यायांभान्त्यगाःपाप
इन्दुहोरायांवा॰॥ ६६॥ रन्ध्रास्तगौपापौपापमात्रदृष्टौवा॰॥ ६७॥ लग्नान्त्याष्टाङ्कक्रमाच्च
न्द्रारार्कमन्दावा॰॥ ६८॥ षष्ठ्यांजातस्यभौमार्कौवङ्गेमृतिः॥ ६९॥ षष्ठाष्टमगेचन्द्रेपा ५०२
पवर्गस्थेतुर्यैर्ग्रहैःशिशुमरणम्॥ ७०॥ चन्द्रादस्तेभौमार्कौदशाहेशि॰॥ ७१॥ मन्दभग
जीविष्टमेपापैर्दृष्टेएकादशाहेशि॰॥ ७२॥ मन्देङ्गेपापमात्रदृष्टेषोडशाहेशि॰॥ ७३॥ ल
ग्नांशेशेषष्ठेषष्ठभतुल्यदिनेशि॰॥ ७४॥ षष्ठाष्टमगाःसौम्यावक्रगपापदृष्टामासेशि
॰॥ ७५॥ सपापेङ्गेशेद्यूनेमासेशि॰॥ ७६॥ कुजेङ्गेजीवेन्येशुभेषष्ठेमा॰॥ ७७॥ सपाप

जन्मेशेशरन्ध्रेमा ॥ ७८ ॥ लग्नपेस्वल्पबलविजितेमा ॥ ७९ ॥ मन्दार्कौतारन्ध्रेवाष्टमेमा ॥ ८० ॥ ग्रहरो-
८ गेशःबलेसपापपक्षत्रयंमासत्रयंवाजीवति ॥ ८१ ॥ रन्ध्रेलग्नेशेपापयुतेदृष्टेतुपंचमासायुः ॥ ८२
सर्वेस्वापोक्लिमगाविबलाःषण्मासायुः ॥ ८३ ॥ पापर्क्षेयुतेइन्दुकोणाः ॥ ८४ ॥ धनान्त्यगावाव्य-
याऽरिगावारन्ध्रारिगावाष्टमाङ्कगाःपापाःषष्ठेदृष्टेवामासिम्रुतिः ॥ ८५ ॥ लग्नेऽष्कारांशेषष्ठे
भतुल्येमासिम्रि ॥ ८६ ॥ षष्ठाष्टमगयोःपापदृष्टयोःपापयोर्वर्षान्तेमृ ॥ ८७ ॥ चन्द्रज्ञौकेन्द्रेमृत्
मन्दादृष्टेव ॥ ८८ ॥ लग्नपाश्चन्द्रेशोष्टमेपापमान्येदृष्टेवर्षद्वयायुः ॥ ८९ ॥ केन्द्राष्टषष्ठेवक्रगेगुरे ७
कुजभेसबलारदृष्टेवर्षत्रयायुः ॥ ९० ॥ सौम्येपापांशगेपापदृष्टोऽब्दचतुष्टयंनाव ॥ ९१ ॥ भौमभेष्ट-
मेजीवेमन्देन्दुकेदृष्टेभृग्वदृष्टेव ॥ ९२ ॥ षष्ठाष्टमेकर्कगेसेचन्द्रदृष्टेतुर्यब्देमृतिः ॥ ९३ ॥ स-
न्दर्केज्यौवासेन्दुकोकर्यारावासमन्देन्दुच्छाराःपञ्चमाब्देमृ ॥ ९४ ॥ लग्नेराहौपापमान्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्टयुतेप० ॥ ९५ ॥ सूर्येन्दुभे त्रिके शुक्रे पापदृष्टे षष्ठेब्दे मृतिः ॥ ९६ ॥ लग्नेर्कमन्दाराः क्षीणो-
न्दावस्ते षष्ठे सप्तमे वाब्दे मृ० ॥ ९७ ॥ क्षीणेन्दावस्ते लग्ने मन्दाराच्छुक्रगुर्वादृष्टाः सप्तमेब्दे मृ० ॥
९८ ॥ षष्ठाष्टमगाः सौम्याः क्रोराः पापाग्रष्टमेब्दे मृ० ॥ ९९ ॥ क्षीणेन्दावस्तो शुक्रभे लग्ने मन्दा-
रार्का गुर्वदृष्टाः सप्तमेब्दे मृ० ॥ १०० ॥ त्रिके चन्द्रार्कार्कियोगे नवमाब्दे मृ० ॥ १०१ ॥ स्वभगा इन्दु-
कौरा गुर्वदृष्टा न० ॥ १०२ ॥ घूने चन्द्रेष्टमे शेड्गे मन्ददृष्टे न० ॥ १०३ ॥ चन्द्राङ्गेशावस्ते वा त्रिके ५०३
भतुल्याब्दे मृतिः ॥ १०४ ॥ जन्मेशाङ्गेन्द्वगो शुक्रार्को वा लग्नेशो षष्ठे भतुल्याब्दे मृ० ॥ १०५ ॥ चन्द्रा-
ङ्गेशौ मन्दार्कयुतौ द्वादशाब्दे मृ० ॥ १०६ ॥ जीवे भौमभे भौमे जीवभे वा सूर्ये मन्दभे मन्दे सूर्यभे
वा० ॥ १०७ ॥ क्रमान्मेषादिगो विधुरष्टमनवमत्रयो विंशद्वाविंशपञ्चमप्रथमचतुर्थत्रयो विंशा-
ष्टादशविंशैकविंशद्दशमलवस्थो लवाङ्कमिते ऽब्दे मृतिः ॥ १०८ ॥ राशौ षष्ठाष्टमगश्चन्द्रः शुक्लेस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्वारिष्टहा॥ १०९॥ सौम्यभांसगाः सौम्याः सर्वा०॥ ११०॥ मेष्ठोकेन्द्रेवासौम्येकेन्द्रेस०॥ १११॥ स्त्री
८ र्षोदयगाः सर्वेस०॥ ११२॥ षष्ठाष्टमगोक्षीणोचन्द्रेदिवापापदृष्टेस०॥ ११३॥ स्वोच्चसुहृद्भेचन्द्रे
सर्वा०॥ ११४॥ चन्द्रात्खेजीवोव्ययेश्वाच्छोलाभेखलाःस०॥ ११५॥ कर्काजेइन्दौकेन्द्रेसदृ
ष्टेस०॥ ११६॥ कर्काजवृषेङ्गगोहोस०॥ ११७॥ केन्द्रेनदग्रेचसर्वखेटाःस०॥ ११८॥ शुभभेपूर्णेन्दौ
स०॥ ११९॥ षष्ठाष्टमेचन्द्रेशुभवर्गगेस०॥ १२०॥ इन्द्वङ्गेसर्वग्रहदृष्टेस०॥ १२१॥ शुभांशेकेन्द्रे
कोणेशुक्रदृष्टेचन्द्रेस०॥ १२२॥ बलीशुभःकेन्द्रगोलाभेसूर्यःस०॥ १२३॥ सबलेङ्गपेशुभमात्रदृ
ष्टेस०॥ १२४॥ जीवेस्वभोच्चगेकेन्द्रेस०॥ १२५॥ पापाःशुभवर्गगाःशुभमात्रदृष्टाःस०॥ १२६॥ ८
जायारिगोराहुःशुभमात्रदृष्टयुतःस०॥ १२७॥ सर्वेबलिनोवान्यराशिगावामित्रभगावाशुभभ
गावाशुभवर्गगाःस०॥ १२८॥ षष्ठाष्टमेशौचन्द्रायुतौतृयेगोजासजः॥ १२९॥ षष्ठाङ्केशौपापयु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नौजा॰॥ १३०॥ षष्ठाङ्कशयोर्मन्दयोगे क्रूरजो ज्ञयोगे वैरूपजोऽर्कयोगे स्वक्षजो जीवशुक्रान्यतरयो
गे ब्राह्मणाज॰॥ १३१॥ व्ययेशे पापमान्ते सम्बन्धजारजः॥ १३२॥ केन्द्रे सोऽस्थेशयोगे जा॰॥ १३३॥ द्वि
विपश्वारिशालग्नागाजा॰॥ १३४॥ पापेऽङ्गे शुभेऽपूर्णे स्वमन्दे जा॰॥ १३५॥ चन्द्रेऽङ्गेऽस्तं तेषु ऋक्षे सो
स्थे भौमे जा॰॥ १३६॥ लग्नेऽर्के सुखेराहौ पितृव्यजः॥ १३७॥ लग्ने राहुवारो पुष्पवन्नो घूर्णे नीचजः
॥ १३८॥ शून्येषु केन्द्रेषु जा॰॥ १३९॥ सर्वैर्द्विषट्स्थाष्टान्त्येषु जा॰॥ १४०॥ जीववर्गहीनेऽङ्गे जा॰
॥ १४१॥ स्वेऽङ्गे तुर्ये सपापचन्द्रे चन्द्रलग्ने गौरवदृष्टौ जा॰॥ १४२॥ पुष्पवन्नावेकभे गौरवदृष्टौ जा
॰॥ १४३॥ लग्नाम्बुषष्ठधर्मपयोगे जा॰॥ १४४॥ धर्मे सुखे च पापेऽङ्गपे ऽवले जा॰॥ १४५॥ सुखेपा
पान्तरे लग्नपे ऽवले पापदृष्टे जा॰॥ १४६॥ दारेशो धने सपापभौमदृष्टे जा॰॥ १४७॥ चन्द्रमन्दयोगे
जा॰॥ १४८॥ लग्नपेऽङ्गवा लग्नदृष्टे रिजा राजयोगभङ्गः॥ १४९॥ लग्ने जीवयुतदृष्टे जा॰ भ॰॥ १५०

४०५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥लग्नचन्द्रान्यतरोजीवभवर्गान्यतरगोजा०भ०॥ १५१॥ यद्वयवेकुजार्कौतन्यारन्ध्रचिह्नम्॥१५२॥ रा
९ हुर्केजौयत्नतन्नरूपामाचि०॥१५३॥ लग्नगाथ्वन्द्राराच्छाःशिरासिचि०॥ १५४॥ शुक्रेऽङ्गःरन्ध्रेराहौमस्तके
वावामकरोऽचि०॥ १५५॥ आरेऽङ्केकोगोमन्देलिङ्गःगुदसमीपेवाचि०॥ १५६॥ ज्ञेज्योरन्ध्रेकोगोशुक्रेमुख्वा
ङ्गःमन्देजठरेचि०॥ १५७॥ राहुस्कोतुर्येमन्देकुजेवाङ्गःवामपादेचि०॥ १५८॥ यस्यराज्ययोगोभङ्गःरहितस्त
स्यकाचराणान्यतन्नराजचिह्नम्॥१५९॥ चन्द्राकौयदङ्गेगोतदङ्गेचिह्नम्॥१६०॥ वर्गोत्तमेऽङ्गेवाचन्द्रेशु
भंजन्म॥१६१॥ सूर्याङ्गनेसकुहेशुभं०॥ १६२॥ एकस्मिन्नपिकेन्द्रे ग्रहयुतेशुभं॥ १६३॥ आत्मकार
केसबलेशुभं०॥ १६४॥ लग्ननन्दांशपतुल्याकारोवावीर्याधिकग्रहतुल्यतनु॥ १६५॥ चन्द्राकान्तन ९
वांशपवर्णः॥१६६॥ सूर्योयस्मात्रिंशांशेनकुगाभाक॥ १६७॥ ॥इतिमहादेवकृतजातकतत्त्वप्रक
रणिकातत्त्वंद्वितीयम्॥ २॥ अथप्रकीर्णतत्त्वारम्भः॥ ॥आलिङ्गनायसंहृष्टोभवोदेवोप्रियोभि

या॥ विश्लेषस्यैकतांयातौभूयास्तांमङ्गलायन॥१॥ भावादौभावानांविचारः॥ योभावःस्वस्वामिशु
भैर्युक्तोदृष्टोवातस्यवृद्धिःपापैर्शनिर्मिश्रैर्मिश्रम्॥१॥ नीचारिस्थोग्रहोभावनाशकः॥२॥ स्वमृच्छतुङ्ग
स्थोभाववृद्धिकरः॥३॥ यद्भाववान्त्रिकेपापास्तद्भावनाशः॥४॥ यद्भावेशास्त्रिकेत्रिकेशोवायद्भावेनर
द्भावनाशः॥५॥ यद्भावी[illegible]कस्मार्थकोशास्थानानिशुभापतियुतानितद्भाववृद्धिःपापयुतानिचेन्ना 405
निर्मिश्रयुतानिमिश्रम्॥६॥ यद्भावेशोमिर्नीचास्तगःशुभैर्युतेक्षितश्चेन्नतद्भावनाशः॥७॥ यद्यद्भावी
यस्त्रेशस्सूर्यशनित्रिलिकेशत्रिलिकांशेशानांमध्येयोऽधिकबलीतत्पाकेमूर्तिविन्नादिनाशः॥८॥ अथ
थाङ्गविचारः॥ स्वांशेङ्गेशशुभयुतेवाशुभदृष्टेदेहसौख्यम्॥९॥ मृद्वङ्गेशेङ्गेदेहसौ०॥१०॥ सपापेङ्ग
शेत्रिकेदेहसौख्यंन॥११॥ लग्नेपापालग्नेशेचहीनवीर्येदेहसौख्यंन॥१२॥ शनिचन्द्रौमेषेदेहका
र्श्यम्॥१३॥ चन्द्रेशेलाभकेन्द्रगेवक्रेदेहकार्श्यम्॥१४॥ लग्नेशाधिष्ठितभेशास्त्रिकेदेहकार्श्यम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥१५॥ शुष्काङ्गः शुष्कग्रहे देहकार्श्यम्॥ १६॥ शुष्कयुतेङ्गेशेका॰॥ १७॥ शुष्कग्रहर्क्षेङ्गेशेका॰॥
१० १८॥ लग्नेशांशेशेशे शुष्केका॰॥ १९॥ शुष्काङ्गगैः पापैः का॰॥ २०॥ राशीशेसाङ्गनाथे देहपुष्टिः॥
॥२१॥ तोयर्क्षेङ्गेशे शुभान्विते वा जलखगदृष्टे देहपुष्टिः॥ २२॥ शुभर्क्षेङ्गे जलर्क्षेङ्गांशेशे देहपु
ष्टिः॥ २३॥ लग्ने शुभर्क्षे पापदृग्वर्जिते दे॰॥ २४॥ लग्ने तद्युते वा तद्दृष्टे दे॰॥ २५॥ जलर्क्षेङ्गे
शुभैर्युते वा दृष्टे दे॰॥ २६॥ मिथुनांशे दे॰॥ २७॥ लग्नगे सबले सत्वचे दे॰॥ २८॥ लग्नादिराशि
यः शिरः प्रभृतिकालाङ्गः पृथक्कल्प्याः॥ २९॥ यत्राङ्गे दीर्घराशिर्दीर्घभपश्चतद्दीर्घमपस्लोकुर्वामि
श्रेमिश्रं ग्रहानाक्रान्ता राशिश्चेच्छशिवत्॥ ३०॥ बुधासङ्गमे भौमे दीर्घदेहः॥ ३१॥ लग्नपे दी १०
र्घभे दीर्घदेहः॥ ३२॥ मन्दात्तुर्ये चन्द्रे राहुपापभागे बाल्यान्तरराहुपक्षभागे वामनः॥ ३३॥ लग्ने
शेल्पनरभे शुभे दृग्धीने वामनः॥ ३४॥ दृष्टीदयगे चन्द्रे तुर्ये शनिदृष्टे चाङ्गेशे वा॰॥ ३५॥ सिं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेर्कोच्छोखेमृगे चन्द्रेवा० ॥ ३६ ॥ आघन्ते श्रोचन्द्रमन्दहृष्टे सौम्याहृष्टेवा० ॥ ३७ ॥ लग्नेशेल्पर्क्षेल
ग्नदर्शिनिवा० ॥ ३८ ॥ केन्द्रस्थाः क्रूराविकलाङ्गः ॥ ३९ ॥ केन्द्रगौ पुष्पवन्तौ विकलाङ्गः ॥ ४० ॥ लग्ने
शुक्रे मन्दहृष्टे श्रोणिभागे वैकल्पम् ॥ ४१ ॥ तुर्ये शुक्रे मन्दारक्षान्यतमयुते जीविके चरणाक
न्यन्यतमे वैकल्पम् ॥ ४२ ॥ चन्द्रे खे भौमे स्ते मन्दे वशिगे विकलाङ्गः ॥ ४३ ॥ सुताङ्के भौमे क्रूरैर्दृ
ष्टे हीनाङ्गः ॥ ४४ ॥ मन्दर्थे खे चन्द्रे क्षस्ते विकलाङ्गः ॥ ४५ ॥ नीचगाः शुक्रेन्दुमन्दाः क्रमेर्के विक
० ॥ ४६ ॥ नीचे भौमे रक्तपित्तकोप ॥ ४७ ॥ मन्दर्क्षे शुक्रे देहे दौर्गन्ध्यम् ॥ ४८ ॥ षष्ठेशे ज्ञर्क्षे वा न
क्रे देहे दौर्गन्ध्यम् ॥ ४९ ॥ ज्ञर्क्षे शुक्रे ज्ञयुते केन्द्रे देहे दो० ॥ ५० ॥ मेषगे चन्द्रे ङ्के देहे दो० ॥ ५१ ॥ ल
ग्नेशेन्त्ये पापयुतदृष्टे पङ्ग्या चलति ॥ ५२ ॥ चन्द्रज्ञौ भौमदृष्टौ विलज्ज ॥ ५३ ॥ शीतोन्त्ये सा
रेल्लिके विलज्जः ॥ ५४ ॥ ज्ञाच्छाप ङ्के भौमे स्ते विल० ॥ ५५ ॥ जीवे ङ्के भौमदृष्टे विल० ॥ ५६ ॥ चन्द्रा

406

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रौद्रे नेत्र हष्टे सलज्जः ॥५७॥ ज्ञारयोगे कपटी ॥५८॥ पापान्विते ज्ञे बलाढ्ये ऽङ्कपः ॥५९॥ सौम्येक्षजे
११ शुभदृग्धीनिकपः ॥६०॥ सुखेशो वा भाग्यपशोषष्ठेकः ॥६१॥ मेषेज्ञेकः ॥६२॥ पापयुते वा पापदृष्टे
सुखेकः ॥६३॥ पापान्तरे तुर्येकः ॥६४॥ कर्मपे वा रन्ध्रपे सुखेकः ॥६५॥ शन्यारतमो ऽन्यतमे पाता
ले हन्कपटी ॥६६॥ राहुमन्दारयोगे हन्कः ॥६७॥ सुखे स्वर्क्षोच्चगे शुभे निष्कपटी ॥६८॥ सुखे
शे बलाढ्ये निष्कपटी ॥६९॥ तुर्ये शुभर्क्षे मित्रान्वित दृष्टे निष्कः ॥७०॥ हृदयेशे गोपुरांशे नि
ष्कः ॥७१॥ पाताले मृदंशादि युते निष्कः ॥७२॥ लग्नेशे शुभगे शुभयुते क्षिते निष्कः ॥७३॥ लग्ने
शे बलाढ्ये निष्कः ॥७४॥ लग्ने पापा गवतांशे निष्कः ॥७५॥ लग्नेशे राहु शुक्र दृष्टे निष्कः ॥७६ ११
॥ इन्द्वर्कौ तुर्ये क्षमासामांतं कपटी ऊर्ध्वं निष्कः ॥७७॥ तुर्ये तमसि पापयुते दृष्टे वा हिः शुक्रो न्त्यः क
पटी ॥७८॥ तुर्ये बहु पापयुते दृष्टे पूर्ववत् ॥७९॥ राज्ञौ बल्यो ऽङ्के खेवा ऽऽशयः ॥८०॥ भौमे स्ते बलवा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थूरश्च ॥ ८१ ॥ निर्बलारेगाङ्केदृष्टे कामातुरः ॥ ८२ ॥ राव्यौशनौदृशामेकामी ॥ ८३ ॥ स्वर्क्षगे भौमदृष्टे
ऽङ्के कामी ॥ ८४ ॥ अंशाधिक्रमे पापयुतः शुभे कामातुरः ॥ ८५ ॥ दिवाबल्पारे खेऽङ्के क्रोधी ॥ ८६ ॥ लग्नेशे
वा निर्बलारे शनिदृष्टे क्रोधी ॥ ८७ ॥ लग्ने भौमे क्रोधी ॥ ८८ ॥ द्यूने बलवति भौमे क्रो ॥ ८९ ॥ त्रिको
णेल्पवीर्ये राशिपे क्रो ॥ ९० ॥ अन्यांशे मेऽङ्केशे क्रो ॥ ९१ ॥ धनेशे गुलिकान्विते क्रो ॥ ९२ ॥ केतुयु
ते सौम्ये कलहप्रियः ॥ ९३ ॥ कर्कालिझषर्क्षे भौमे दृष्टे क्षमावान् ॥ ९४ ॥ तुर्येशेऽङ्के वा लग्नेशे तुर्ये
श्च ॥ ९५ ॥ सबले तुर्येशः ॥ ९६ ॥ शुभे तुर्येशः ॥ ९७ ॥ शनिग्रहे ज्ञा गौहास्यासक्तः ॥ ९८ ॥ शेऽङ्के वा 407
सेऽजीविहा ॥ ९९ ॥ ज्ञांशेऽङ्केहा ॥ १०० ॥ सौम्ये भौमे ज्ञचन्द्रदृष्टे द्रोही ॥ १०१ ॥ लग्नेशे ज्ञे षष्ठे द्रो
ही ॥ १०२ ॥ राह्वार्कजौ धर्मे शत्रुक्षे द्रोही ॥ १०३ ॥ लग्नेशे निर्बले द्रो ॥ १०४ ॥ अंशेशे केन्द्रे चोरः ॥
१०५ ॥ अंशेशे गुलिके चोरः ॥ १०६ ॥ तृतीयेऽन्यशे चोरः ॥ १०७ ॥ सुखेशे षष्ठे चोरः ॥ १०८ ॥ धनेशे तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेचौरः॥ १०९॥ रिपुगेसबलेशौरोचौरः॥ ११०॥ शौरोलग्नेचौरः॥ १११॥ मृगेगेजीवेङ्गहिफेनव्यस
१२ नी॥ ११२॥ व्ययेशेनीचेव्यसनी॥ ११३॥ अङ्गपेनीचेवारिशेत्वेव्यसनी॥ ११४॥ व्ययेपापेव्य०
॥११५॥ लग्नपेनिर्बलेव्य०॥ ११६॥ लग्नपेमारेव्य०॥ ११७॥ अङ्गेपापदृष्ट्याधिकेव्य०॥ ११८॥
सबलेङ्गेशेनिर्व्यसनी॥ ११९॥ लग्नेशेलग्नेवाव्ययेशुभसम्बन्धेनिर्व्यसनि॥ १२०॥ धर्मेशुभेनि
र्व्य०॥ १२१॥ लग्नपेकेन्द्रेनिर्व्य०॥ १२२॥ अंशात्स्वेजीवार्कमायदृष्टेगोपालः॥ १२३॥ अंशात्
मेजीवार्कावविश्वासी॥ १२४॥ उच्चगेवानीचगेशुक्रेसिंहपूर्वार्द्धेत्रिकेकामी॥ १२५॥ स्वांशेशुक्रे
कामी॥ १२६॥ पापदृष्टेशुक्रेकामी॥ १२७॥ युग्मेस्वर्क्षेवाशुक्रेका०॥ १२८॥ स्वाङ्गसुखेषुधनेशेका १२
०॥ १२९॥ शनिर्धनुषिमृषेलग्नेल्पकामः॥ १३०॥ शुक्रेमीनेकामुकः॥ १३१॥ भौमाच्चतुर्थेजीवे
वारिशेकामाधिक्यम्॥ १३२॥ विषमोदयगेशुक्रेल्पवीर्यः॥ १३३॥ तुर्येचन्द्रशनीत्वल्पवीर्यः॥ १३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शुक्रे लग्ने ग्रहदृष्टेऽल्पवीर्यः॥ १३५॥ शुक्रर्क्षे चन्द्रेऽल्पवीर्यः॥ १३६॥ मन्दाच्छौ खे रन्ध्रे वा शुभदृष्टिराहि
त्यघराठः॥ १३७॥ षष्ठान्त्ये जलर्क्षे मन्दे शुभदृग्धीनिषं॥ १३८॥ चन्द्रार्कौ वा मन्दज्ञौ वा भौमार्कौ यु
ग्मौजर्क्षगावन्योन्यं पश्यतः षराठः॥ १३९॥ ग्मौजर्क्षाङ्गे समर्क्षग भौमे क्षितौ षं॥ १४०॥ चन्द्रज्ञौ
युग्मौजर्क्षगौ भौमे क्षितौ षं॥ १४१॥ युग्माग्गे सितेन्द्वज्ञा निषं॥ १४२॥ मन्दाच्छौ खे षं॥ १४३॥
शुक्रात् षष्ठेऽष्टमे मन्दे षराठौ वा नाट्यज्ञा॥ १४४॥ अंशेके तौ मन्दज्ञदृष्टे षं॥ १४५॥ मन्दाच्छौ
शुभदृग्धीनौ रन्ध्रगौ षं॥ १४६॥ षष्ठान्त्ये नीचगे मन्दे षं॥ १४७॥ राहौ शुक्रेऽर्कजे वा स्वगे कर्कमे
षे चन्द्रे वीर्यच्युतिः॥ १४८॥ लग्ने चन्द्रे गुर्वर्कजौ सुते वीर्यं॥ १४९॥ कन्योदये मन्दज्ञदृष्टे मन्द
र्क्षे शुक्रे वी॥ १५०॥ इज्येऽङ्गे कुजे स्ते उन्मादी॥ १५१॥ लग्ने ऽस्तगौ मन्दार्थिके कुजे उन्मादः॥ १५२
॥ मन्देऽङ्गे व्ययेऽर्के कोणे चन्द्रे वा भौमे उं॥ १५३॥ मठे नीचषष्ठे सास्थे ग्रे पापदृष्टे गरलज उन्मा

४०८

१३

॥१५४॥ भौमे स्त्रैजीविद्वेउन्मादी॥ १५५॥ भौतोम्बर्केजावन्मेउ॥ १५६॥ मन्दार्थेशौस पापोवात
जउन्माद॥ १५७॥ धनेशार्कजौसूर्ययुतोराजकोपजउन्माद॥ १५८॥ यमार्थेशौभौमयुतोपित्तजउ-
न्माद॥ १५९॥ चन्द्रार्कौकोणाङ्गगौकेन्द्रेजीवियमारक्षणावारेउ॥ १६०॥ इन्दर्कजौलग्नगशतष्टौ
विह्वल॥ १६१॥ धनेकेतौशीघ्रंवार्धक्याचिह्नोदय॥ १६२॥ राहुर्केजार्केज्यालग्नगापकृतिभ्रष्ट॥
१६३॥ चन्द्राच्चौलग्नेनातिकृष्णोनपुंवा॥ १६४॥ सबले भौमे ला भे हद्धोपितरुगायसे॥ १६५॥ खे-
सुखेशेरसायनव्यसनी॥ १६६॥ सुखेशेविवलेरसा॥ १६७॥ सपापेथेशौवहुभुक्॥ १६८॥ सपापे
थेकूरषष्ठ्यशोव॥ १६९॥ सशुभेधनेशौसुखभुक्॥ १७०॥ धनेशुभे पापदृग्धीनेसु॥ १७१॥ १३
धनेशुभदृष्याधिकेसु॥ १७२॥ धनेशौवलवतिसु॥ १७३॥ वैशोधिकांशेर्थेशौवातरुदृष्टे सु॥
१७४॥ धनेशौमन्देनीचगतेलिकयुतेसततंश्राद्धभुक्॥ १७५॥ धनेशौशुभेवास्वोच्चेशुभदृष्टेल्पा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शी॥१७६॥ सबलेर्थेशो सशुभे शीघ्रभुक्॥ १७७॥ धनेशो चरभे शीघ्रभुक्॥१७८॥ धनेशशुभर्क्षे
शुभदृष्टे शी०॥१७९॥ कोशो पापर्क्षे पापयुतदृष्टे चिरभुक्॥१८०॥ धनेशो स्थिरर्क्षे चि०॥१८१॥
कालिकारयोगे कदन्नभुक्॥१८२॥ लग्नेजीवे भोजनशूर॥१८३॥ भ्रातृपबलिनि केन्द्रकोणगा
गे सौम्यदृष्टे वैशेषिकांशे धीरः॥१८४॥ विक्रमेशो शुभर्क्षांशे शुभदृष्टयुते धीरः॥१८५॥ विक्रमा
केशयोगे धीरः॥१८६॥ सौम्येशो नु योगे धीरः॥१८७॥ सुतेङ्गेशे पिशुनः॥१८८॥ पापेङ्गेशे पि०॥
१८९॥ पापदृष्टयधिके ङ्गे पि०॥१९०॥ पापदृष्टे जीवे सतमसि चाण्डालता॥१९१॥ नीचभांशे ५०९
जीवे चाण्डालता॥१९२॥ ग्रस्ते चन्द्रे ङ्गे पापाः कोणे पिशाचजनिः॥१९३॥ केन्द्रे मन्दे ज्ञयुते शि
ल्पी॥१९४॥ सबले ज्ञे केन्द्रे शि०॥१९५॥ ईज्यज्ञयोगे शि०॥१९६॥ ज्ञे ज्यान्विके उपदेशप्रियः
॥१९७॥ षष्ठेशे जीवे शुक्रे वा मधुरादिप्रियः॥१९८॥ सशुभे ज्ञे मधुरप्रियः॥१९९॥ सपापे ज्ञे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्येःरुचि॥ २००॥ लग्नेर्कजर्क्षांशे केन्द्रगचन्द्रदृष्टे नीचकर्मा॥ २०१॥ द्यूनेर्के लग्ने मन्दे पापेक्षो
थेभौमेथेष्ठवर्गोपिनीचपथगः॥ २०२॥ मन्दार्कौवेकर्क्षगौन्यांशेनवांशेत्रिंशांशेवानीचयोषा
नुषक्तान्म्लेच्छो भवति॥ २०३॥ षष्ठांशे लग्नगोज्ञातिपीडा॥ २०४॥ लग्नेशेषष्ठेषष्ठेशदृष्टेज्ञा०
॥ २०५॥ शुक्रेज्यौ लग्नेषष्ठे शत्रुतोज्ञान्यारनमोदृष्टेज्ञा०॥ २०६॥ लग्नेशाद्वालग्नात्त्रिकगेःपा
पेर्ज्ञातिच्युतिः॥ २०७॥ ज्ञेन्द्वर्कजानीचारिभागगाज्ञातिच्युतिः॥ २०८॥ इन्द्वर्कजौ मिथर्क्षे ज्ञातिपी
ष्य॥ २०९॥ लाभेशेङ्केकोन्तुको॥ २१०॥ लाभेशेशुभेवासवलेको०॥ २११॥ लाभेशुभेको०॥ २१२
॥ ईज्यमन्दयोगेस्थूलसः॥ २१३॥ लग्नेशेमन्दान्वितेस्थूल०॥ २१४॥ लग्नेशेनिर्बलेस्थूल०॥ २१५
॥ लग्नेपापदृष्ट्याधिक्येस्थू०॥ २१६॥ चन्द्रांशाक्रमेजीविकाधिकतो॥ २१७॥ चन्द्रांशाद्रिगोपापोक्ष
०॥ २१८॥ धनुषिवृषेकुम्भेगोक्रूरेदृष्टेखल्वाटः॥ २१९॥ सपापेपापक्षेत्रेङ्गेरव०॥ २२०॥ कर्केचन्द्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भौमदृष्टेसिंहचापाल्पयङ्नालग्नेरव॰॥ २२१॥ नेत्रेशुभेनेत्रेशेचशुभान्वितेङ्गेशयुतेशोभननेत्र
॥ २२२॥ इन्दुर्कौलग्नेमिथदृष्टेबुद्बुदलोचन॥ २२३॥ धनेवाव्ययेपापेमिलिनाक्षः॥ २२४॥ सङ्कु
रोर्कोन्त्येवान्विकोणेविकलनयन॥ २२५॥ धनेवाव्ययेशुक्रेपापयुतेकाणोवामन्दालोचन॥
२२६॥ पुष्पवन्नावसदृष्टोवक्रगर्भेगोवालिकेवक्रनेत्र॥ २२७॥ चन्द्रारावेकभागेऽक्ष्रोगाच्छि
द्रम्॥ २२८॥ षष्ठेशवक्रगर्भेऽक्षिरोगी॥ २२९॥ तारर्क्षेलग्नपेक्षारदृष्टेऽक्षिरोगी॥ २३०॥ रन्ध्रा
ङ्गेशोषष्ठेसव्यनेत्ररोग॥ २३१॥ षष्ठेष्टमेशुक्रेदक्षिणनेत्ररोग॥ २३२॥ धनेशशुभेक्षितेलग्ने
शेपापयुतेसरोगनेत्र॥ २३३॥ मन्दारगुलिकयुतेनेत्रेशेनेत्ररोग॥ २३४॥ नेत्रेपापाययमदृष्टे
नेत्ररोगहतंभवेत॥ २३५॥ नेत्रेशांशेशेपापर्क्षेरोगहतनेत्र॥ २३६॥ लग्नाष्टमेशुक्रेक्रूरदृष्टे
ऽश्रुपान्नेत्रपीडा॥ २३७॥ लग्नभौमेशयनेनयनेगद॥ २३८॥ स्वक्षशुक्रयोगेनेत्ररोगी॥ २३९॥

५१०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्रात्त्रिके नेत्रेशे नेत्ररोगी॥ २४०॥ त्रिकोणे सूर्ये पापदृष्टे निस्तेजो नेत्रः॥ २४१॥ लग्ने
१५ शे सार्के शुक्रे त्रिके जन्मान्धः॥ २४२॥ सूर्ये राहुग्रस्तेऽङ्गे मन्दारौ त्रिकोणे जन्मान्धः॥ २४३॥
नेत्राङ्गेशौ भान्वच्छयुतौ त्रिके जन्मान्धः॥ २४४॥ त्रिके चन्द्रारयोगे पातादन्धः॥ २४५॥
सेऽज्येन्दौ त्रिके सेकादन्धः॥ २४६॥ चन्द्राच्छौ त्रिके कामान्धः॥ २४७॥ ज्ञेन्दू त्रिके शास्त्रान्ध
ः॥ २४८॥ इन्द्वर्कौ सात्येवा केन्द्रेऽन्धः॥ २४९॥ पापर्क्षे भौमे केन्द्रेऽन्धः॥ २५०॥ यमर्क्षे सेऽसू
र्येऽन्धः॥ २५१॥ सौम्यात्रिके क्रूरदृष्टेऽन्धः॥ २५२॥ कुजे कुम्भेऽन्धः॥ २५३॥ शुक्राङ्गे
शयुतौ स्वान्त्येशौ त्रिके स्थावन्धः॥ २५४॥ शुक्रपापाभ्यां युक्तश्चेन्दुर्धनेऽन्धः॥ २५५॥ सुता १५
स्तगौ पापौ स्वान्धः॥ २५६॥ चन्द्रे त्रिके पापदृष्टेऽन्धः॥ २५७॥ चन्द्रार्कौ व्यये शुभदृग्योगे नोऽन्ध
॥ २५८॥ सिंहे कुजेऽङ्गे वा शुक्रेऽन्धः॥ २५९॥ यमेन्द्वर्काः क्रमादन्त्यार्थाष्टमगा नेत्रहीनः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ २६० ॥ यथातथाषष्ठाष्टान्त्यधनस्थाश्चन्द्रार्कौऽयमावलिग्रहदोषजा नेत्रहीनता ॥ २६१
॥ लग्नाच्छुक्राधस्थितेराहुः सूर्यदृष्टेऽश्वेन्ने त्वनाश ॥ २६२ ॥ मन्देतुर्ये पापैर्दृष्टे नष्टदृष्टि ॥
२६३ ॥ सेन्दुः शुक्रास्त्रिकस्थो निशान्धः ॥ २६४ ॥ सुक्रेन्दुयुते नेत्रेशाङ्गे निशान्धोनन्तु स्वो
च्चयशुभैर्युते ॥ २६५ ॥ लग्नार्थेशौ त्रिके क्षिनाशः ॥ २६६ ॥ चन्द्रार्कौ सिंहे ङ्गेशान्यारदृष्टे ने
त्रनाशः ॥ २६७ ॥ भौमेन्त्ये वामनेत्रघातः ॥ २६८ ॥ मन्देर्थे दक्षनेत्रघातः ॥ २६९ ॥ लग्ने धनारि ५११
कर्मेशाः शुक्रयुता नृपकोपान्नेत्रोत्पाटनम् ॥ २७० ॥ स्वच्चाक्षिपो नीचांशगो पापयुतो
नृपकोपान्ने ॥ २७१ ॥ राजारिनाथांशेशौ त्रिके लग्ने शयुतौ नृप ॥ २७२ ॥ शुक्राक्षिपोष
ष्ठगो शुभैर्नदृष्टो नेत्रप्रमादः ॥ २७३ ॥ लग्ने भौमे वा चन्द्रे शुक्रेज्यदृष्टे काणा ॥ २७४ ॥ व्यया
रिगौ चन्द्रार्कौ दम्पती काणौ ॥ २७५ ॥ सिंहे चन्द्रे स्ते भौमदृष्टे काणा ॥ २७६ ॥ कर्केऽर्के सप्न

Sanskrit University, Balmeeki Campus, Kathmandu

मेषे भौमदृष्टे काणः ॥ २७७ ॥ चन्द्राच्छुक्रे वन्ध्ये वा सूर्ये वा भस्थे काणः ॥ २७८ ॥ मन्दात्तुर्ये सौम्यषष्ठेशेऽङ्गि
१६ केवधिरः ॥ २७९ ॥ सरिपुपूर्णो नु शुक्रो वा ॥ २८० ॥ राहौ ज्ञे षष्ठे सुतेज्यशुक्रे वधिरः ॥ २८१ ॥ मित्रे न्येज्ञयु
नेवामकर्णोऽश्रुतिन्यूनता ॥ २८२ ॥ ज्ञषष्ठे भौमक्रूरदृष्टे वधिरः ॥ २८३ ॥ पापारूढायत्रिकोणे सौम्यैर्नास्ति
नावाधिर्यकरा ॥ २८४ ॥ षष्ठेशे त्रिके मन्ददृष्टे वधिरः ॥ २८५ ॥ हंसार्किचन्द्रा स्वियसुतास्त धर्मगाः सौ
म्यादृष्टा दन्ताकर्णोच्छेदः ॥ २८६ ॥ चन्द्रादस्ते मन्दे शुक्रार्को लग्ने कर्णोच्छेदः ॥ २८७ ॥ नीचे भृगौ पारि
युते कर्णोच्छेदः ॥ २८८ ॥ शुक्रे षष्ठे कुजेऽङ्कनासाच्छेदः ॥ २८९ ॥ इन्द्वच्छौ मेषगो लग्नषष्ठे ज्ञे मुखदौर्गन्ध्य
म् ॥ २९० ॥ कर्कौ ज्ञगे शुक्रे मूकः ॥ २९१ ॥ लग्नेऽङ्के दोषषष्ठे ज्ञे मूकः ॥ २९२ ॥ कर्कालिझषे ज्ञस्याधस्थच १६
न्द्रदृष्टे मूकः ॥ २९३ ॥ ज्ञारिराशौ लग्नगो मूकः ॥ २९४ ॥ जीवारिराशौ वक्रे मूकः ॥ २९५ ॥ धनेशो ज्ञेन्यो त्रिके मू
कः ॥ २९६ ॥ कर्कालिझषे ज्ञचन्द्रदृष्टे सुखे सूर्ये षष्ठभे पापदृष्टे गद्गदस्वरः ॥ २९७ ॥ शुक्रेन्द्वाराद्वक्रे

ङ्गःस्वा॥ २९८॥ चन्द्रार्कौ मीनस्थौ ग्रहसितः सुखः॥ २९९॥ धनेशे स्वोच्चगे केन्द्रे ग्रहे॥ ३००॥ कोशेशे
सौम्ययुते केन्द्रे सुमुखः॥ ३०१॥ धने पापे धनेशे पापयुते नीचारिगे दुर्मुखः॥ ३०२॥ धने पापे दीर्घमु
खः॥ ३०३॥ जामित्रे मन्दे चन्द्रे खे वाग्मी॥ ३०४॥ मन्दाच्चो विन्ने मन्दभे केर्के वाग्मी॥ ३०५॥ दिवा सिं
हे ज्ञे वाग्मी॥ ३०६॥ रात्रौ कर्के ज्ञे वाग्मी॥ ३०७॥ धनेशे सौम्ययुते केन्द्रकोणे वा गुरुभे क्षितेऽप्यहयोगे
वा॥ ३०८॥ धनेशे पारावतांशे केन्द्रे वा॥ ३०९॥ सौम्येशे जीवे वा॥ ३१०॥ वागीशांशपे उच्चगे गोपुरे
वा वा॥ ३११॥ सगुरुभे जीवे वर्गोत्तमे वा॥ ३१२॥ धनेशे पारावतांशे जीवयुते वा॥ ३१३॥ षष्ठेशे
ज्ञे जिह्वादोषः॥ ३१४॥ मन्देशाद् धनेके तावस्फुटोक्तिः॥ ३१५॥ मन्दर्क्षे [illegible] मन्ददृष्टे गद्गदवाक्॥ ३
१६॥ धर्मेशे गुरुक्रे [illegible] लोक्तिः॥ ३१७॥ धनेशो विवले क्रूरांशे लः॥ ३१८॥ पापे धने वा पापदृष्टे क्रूरांशे
पापयुते ल॥ ३१९॥ मन्देन्दुयोगे परुषवाक्॥ ३२०॥ गीज धनेशे क्रूरैर्दृष्टे वा युते दन्तविकारः॥ ३२१॥ स ५१२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्नेपापाःसौम्यैरदृष्टाःदन्तविकृतिः॥ ३२२॥ चन्द्रार्कयोर्वापापाद्युक्तेदन्तनाभिघातः॥ ३२३॥ स
७ प्तमेशाक्रनेराहौस्थूलदन्तः॥ ३२४॥ धनारिभ्रौयुतौसपापौदन्तरोगी॥ ३२५॥ सुतेङ्गेराहौदन्तरोद
न्तरोगीवा॥ ३२६॥ शकुजौयुतौदिवाव्ययेगेशुक्रेचहस्तनाशः॥ ३२७॥ शन्यारौराहुयुक्तेवारिगो
हस्तनाशः॥ ३२८॥ दुष्पर्क्षेमन्देशुक्रयुतेहस्तः॥ ३२९॥ मन्देन्दुर्कोःषष्ठाष्टमगाहस्तपीडा॥ ३३०
॥ गुर्वङ्गेशेवक्रमेल्पांशेपव्रजः॥ ३३१॥ स्वोस्थिरेज्ञसौम्यशुक्राःकठिनचिह्नः॥ ३३२॥ सुखेक्रूरे
क्रूरान्वितसुखेशेविरुद्धचिह्नः॥ ३३३॥ स्वगेशुक्रेवाबालादराद्वृद्धिः॥ ३३४॥ भौमक्षेत्रगेशु
क्रेवाबालादराद्वृद्धिः॥ ३३५॥ इन्दुचक्रौभौमर्क्षगौमन्देन्यदृष्टौकलत्रजाराद्वृद्धिः॥ ३३६॥ स ५
प्तलिङ्गेशेजमात्रदृष्टेस्थूलाङ्गाः॥ ३३७॥ पूर्णेन्दावाषष्ठेजङ्घाभाति॥ ३३८॥ शनीन्दावाव्यये
जङ्घाभाति॥ ३३९॥ झषालिजकर्कमृगाःपरमगौइन्दुर्केजोमपापौनवमपश्चमगौवापङ्गु॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ३४० ॥ षष्ठे सूर्यारमन्दाः पङ्गुः ॥ ३४१ ॥ मन्दराशिगौ व्ययेपापदृष्टौ पं० ॥ ३४२ ॥ रन्ध्राङ्केशौ सपापौ तु
र्यपं० ॥ ३४३ ॥ कर्के चन्द्रार्कजौ शुभादृष्टौ पं० ॥ ३४४ ॥ मन्दाच्चतुर्युतौ शुभादृष्टौ पं० ॥ ३४५ ॥ दारेशौ
शौरे सपापे पं० ॥ ३४६ ॥ इति प्रथमविवेकः ॥ १ ॥ अथ धनविवेकः ॥ धनेङ्केशौ स्वलाभपे धनेशांशेशे
शुभे नामतो धनी ॥ १ ॥ चन्द्राच्चतुर्भैरुपचयगैः सन्तो धनिः ॥ २ ॥ स्वार्थपौ युतौ केन्द्रकोणगौ स० ॥ ३ ॥ स्व
शांशेशायेशौ स० ॥ ४ ॥ सिंहासने धनेशो धनी ॥ ५ ॥ धनेशात् धनाङ्कपेशौ केन्द्रगौ धनी ॥ ६ ॥ चतुर्थे स्वर्क्षे ५३
गेषु धनी ॥ ७ ॥ चल्पर्थेशः स्वायाङ्कगो ध० ॥ ८ ॥ चन्द्रात् योगे ध० ॥ ९ ॥ केन्द्रकोणार्थेशे क्रूरषष्ठ्यंशे स्वल्प
धनम् ॥ १० ॥ लाभेशांशेशे क्रूरषष्ठ्यंशे शत्रु कुजीवान्यतरयुतदृष्टे स्वल्पधनी ॥ ११ ॥ सौम्यैरुपचयगे
र्कुधन ॥ १२ ॥ लग्नेशांशेशांशेशे बलाढ्ये वैशेषिकांशे शुभदृष्टे व० ॥ १३ ॥ स्वेशांशेशे वैशेषिकांशे
सार्थेशे लाभेशदृष्टयुते व० ॥ १४ ॥ केन्द्रचतुष्टये शुभान्विते महाधनी ॥ १५ ॥ लग्नार्थायेशौ वैशेषिकां

University, Balmeeki Campus, Kathmandu

१८ शेमव॥ १६॥ कर्केज्ञेमन्देलाभेमव॥ १७॥ स्वर्क्षेसुतेलाभेमन्देमव॥ १८॥ लाभेजीवेस्वर्क्षेर्केपञ्चमेमव
॥ १९॥ स्वर्क्षेगौरोत्पन्नेचन्द्रेमव॥ २०॥ सिंहेर्केङ्गेगुर्वारयुतेमव॥ २१॥ कर्केङ्गेचन्द्रगुर्वारयुतेमव॥ २२॥
सौम्येङ्गेस्वर्क्षेमन्दार्कज्ञयुतेमव॥ २३॥ जीवेङ्गेस्वर्क्षेचन्द्रारयुतेमव॥ २४॥ स्वर्क्षेज्ञेङ्गेमन्दार्कगुरुयुतेदृ
ष्टेमव॥ २५॥ स्वर्क्षेशुक्रेङ्गेचन्द्रार्कयुतेदृष्टेमव॥ २६॥ कन्यायांयमाराराहुच्छामव॥ २७॥ लग्नपांशो
शेधनपांशेशेचसौम्ययुक्तदृष्टेसहस्रनिष्कशः॥ २८॥ लग्नपेर्थेलाभेशेकर्मगेगुरुदृष्टेसव॥ २९॥
स्वङ्गेशांशेशेगोपुरेकर्मेशादृष्टेसव॥ ३०॥ कर्मेशास्पनवांशासप्तांशेशेबलाढ्यौजीवाचदृष्टौद्विसह
स्रनिष्कशः॥ ३१॥ धनायेशौसौम्यषष्ठ्यंशेबलान्वितौद्विसव॥ ३२॥ लग्नेशास्पत्यंशेशायुक्तासप्तमां १८
शेशौवैशेषिकांशेस्वयुतेनिष्कशः॥ ३३॥ शुक्रेस्वान्त्येजीवेर्थेवैशेषिकांशेङ्गेशेस्वयुतेनाधिकनि
ष्कव॥ ३४॥ गुर्वङ्गेशौधनेवैशेषिकांशेकेन्द्रकोणेवाऽयुतनाधिकनिव॥ ३५॥ कर्मेशास्पत्यंशेशास्पस

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रांशेशस्येशवतांशेलक्ष्माधीशः॥ ३६॥ सच्छुभे केन्द्रचतुष्टये धनपे पारावतेसिंहासने वा लक्ष्मव्ययेश
॥ ३७॥ लग्नायेशौ वैशेषिकांशगौ सौम्यषष्ठ्यंशगो चत्रिलक्ष्माधिपः॥ ३८॥ धनायधर्मेशावलिनः
केन्द्रगास्त्रिलक्ष्माधिपः॥ ३९॥ लग्नांशेशभाग्येशौ परमोच्चांशगौ लाभेशो वैशेषिकांशगः कोटि
शः॥ ४०॥ साङ्कार्थेशौ केन्द्रगौ लग्नेशस्यांशेशस्य स्वरागाद् दृष्टौ वाल्पबहुधनलाभः॥ ४१॥ लग्ना
र्थायगैः शुभैर्वलाढ्यैर्धनेशस्यांशेशे न दृष्टैर्वा॥ ४२॥ लाभेशेङ्ग लग्नेशेर्थे धनेशे लाभे निध्याप्तिः
॥ ४३॥ लग्नेशे शुभेर्थे नि०॥ ४४॥ सर्वग्रहाधिकवले लग्नपे केन्द्रजीवयुते वैशेषिकांशेर्थेशे स्वो
पार्जितधनः॥ ४५॥ अङ्गेशांशेशशावली धनपामित्रं सत्केन्द्रकोणगः स्वो०॥ ४६॥ लग्नायपञ्चकार्थे
शः केन्द्रकोणे शुभादृष्टः कालवलान्वितः स्वो०॥ ४७॥ वलान्वितौ साथगौ धनाङ्गपौ पङ्ग्रहदृष्टयु
क्तौ वैशेषिकांशगसान्स्थेशयुतदृष्टौ भ्रातृधनाप्तिः॥ ४८॥ तुर्येशयुतदृष्टे धनेशे जननीधनलाभः॥ ४९

५१५

१९ ॥ कोशेशे रन्ध्रे निधनाप्तिः॥ ५०॥ धनेशे सुखेशयुतदृष्टे वैशेषिकांशे बन्धुतः कृषेर्वा धनलाभः॥ ५१
॥ सुतेशे तत्कारककाभ्यां युतदृष्टे वार्थेशे बलिनि सुततो धनाप्तिः॥ ५२॥ वैशेषिकांशे ऽङ्गेशे बलाढ्ये सु
पुत्रार्जितधनाप्तिः॥ ५३॥ षष्ठेशे तत्कारकयुतदृष्टे ऽर्थेशे बलिनि शत्रुतो धनाप्तिः॥ ५४॥ जायेशे तत्कार
कयुतदृष्टे ऽर्थेशे बलिनि भार्यातो धनाप्तिः॥ ५५॥ खेशे तत्कारकयुतदृष्टे ऽर्थेशे बलिनि पितृतो धनं॥ ५
६॥ कोशेशे बलवति यस्य कारके तौ यमावेशने वा युतदृष्टे तद्द्वारा धनं॥ ५७॥ तुर्येकेपि तद्धनं॥ ५८॥
लाभेशे दशायां धनाप्तिः॥ ५९॥ लाभागतराशिदशायां धनं॥ ६०॥ लाभेशे केन्द्रकोणे लाभे पापे ध
नलाभः॥ ६१॥ लाभपे धनेक्षणे पलाभे … ॥ ६२॥ धनाधिपे केन्द्रगे धनं॥ ६३॥ लाभे पापावलोकिते धंशे ध १९
नं॥ ६४॥ लाभेशे केन्द्रकोणे शुभसम्बन्धे धनं॥ ६५॥ शुभान्तरे लाभेशे धनं॥ ६६॥ लाभपस्यांशेशे शुभ
सम्बन्धे धनं॥ ६७॥ ज्ञात्कावर्थे धनं॥ ६८॥ रन्ध्रे सौम्ये धनं॥ ६९॥ मेषे चन्द्रे धटे मन्दे न कुम्भे शुक्रे चापे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कैपेन्द्रकंधनंनलभते॥ ७०॥ अंशाद्विकेशोहोपराजन्नासकेदुव्यनाश॥ ७१॥ व्ययेशेज्ञातिविवादकनह
निः॥ ७२॥ सक्रूरेव्ययेशेमिथ्याकोशाम्भत्कात्॥ ७३॥ लग्नेशेल्पबलेसूर्ययुतेर्थेशेन्यनीचेवापापदृष्टेरा
जदराद्धनक्षय॥ ७४॥ लाभेशेन्यन्यशेर्थेत्रिकेर्थेशेवानीचेगराज॥ ७५॥ षष्ठेर्थेशेसपापेनीचेगे
राजकारकयुतेवारा॥ ७६॥ धनेशेन्व्ययेशेर्थेसपापेक्रूरशेरिगराज॥ ७७॥ लाभेरवेशेऽङ्गेशयुतेऽःख
ष्ठ्यंशेराज॥ ७८॥ धनायपौकुजदृष्टौपापांशेगेहीनबलौसपापौचौराग्निभूपकृतोधननाश॥ ७९॥ स
पापेरवेशेरिगेक्रूरषष्ठ्यंशेधनायपयुतेलोकापवादमूलकधनक्षय॥ ८०॥ धनेशांशेशांशेशसपापेत्रिके
लग्नेशादृष्टेचौराग्निभूपकृतोधननाश॥ ८१॥ धनेशांशेशेशेत्रिकेसपापेक्रूरषष्ठ्यंशेनिर्धन॥ ८२॥ स
पापाधनधनेशायेशानिर्धन॥ ८३॥ व्ययेशांशेशेधनेशयुतदृष्टेनि॥ ८४॥ नीचेर्केकेन्द्रेसपापेनि॥ ८५
॥ कोशेशांशेशांशेशेकालदराशेनि॥ ८६॥ लाभेलाभेपेवापापसम्बन्धेनि॥ ८७॥ व्ययेव्ययेशेवापा

415

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पसम्बन्धेपापमूलकधनक्षय॥ ८९॥ अन्त्येनवमेशेवाशुभसम्बन्धेधर्ममूलकधननाशः॥ ९०॥ व्ययेशेबल
२० हीनेगुलिकादियुतेवाषष्ठेशसम्बन्धेशत्रुतोधननाशः॥ ९१॥ क्रूरांशेन्त्येशेल्पबलेजायेशसम्बन्धेजा
याकृतोधननाशः॥ ९२॥ अन्त्येशेऽल्पबलेभौमसम्बन्धेभ्रातृकृतोधन॰॥ ९३॥ व्ययपेल्पबलेपुत्रेशस
म्बन्धेपुत्रकृतोध॰॥ ९४॥ व्ययेशेस्वेशसम्बन्धेपितृकृतोध॰॥ ९५॥ सुखेशसम्बन्धेन्त्येशेमातृकृ
तोध॰॥ ९६॥ धनेशेरिगेशत्रुकृतोधन॰॥ ९७॥ धनेशेचन्द्रदृष्टेधनहानिः॥ ९८॥ क्षीणेन्दावर्केज्ञदृष्टे
सञ्चितधननाशः॥ ९९॥ राह्वर्कजावर्थेशुक्रेन्दुयुतेराशीशायुतेकुमार्गव्ययः॥ १००॥ कोणेशकुजेर्थे
नाशोऽग्निचौरादितः॥ १०१॥ त्रिकोणेशजीवेभाजनेधननाशः॥ १०२॥ लाभार्थान्त्येराहुःशयनेनिर्ध २०
नोभ्रमतेमहीम्॥ १०३॥ कोणेशसम्बन्धीयोर्थगोग्रहस्त्रिकेशयुतोधननाशकः॥ १०४॥ लग्नेशो
रन्ध्रेरन्ध्रेशोङ्गेमारकेशयुतेनिर्धनः॥ १०५॥ षष्ठेशोङ्गेलग्नेशोषष्ठेमारकेशयुतेनिध॰॥ १०६॥ चन्द्रार्को

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वङ्गमारकेशयुतदृष्टे निः ॥१०७॥ धनकारकात् धीनेवेदृशेरपापेदरिद्री ॥१०८॥ स्वकारकात्त्रिषष्ठे
शुभेदः ॥१०९॥ रवेस्तुभाधनेपापादः ॥११०॥ धर्मेस्पन्मेन्मेशेर्थेरतीयगेषुपापेषु महादरिद्री ॥ १११
॥ केन्द्रगाध्वन्नेजपमन्दागलिकाराहुतान्याष्टमगोमहाः ॥११२॥ स्फकमस्थोपुष्पवन्नावस्थोन्यांशगोस
दारिद्री ॥११३॥ पुष्पवन्नौधेटशेषानि चर्क्षगाराजपुत्रापिदरिद्री ॥११४॥ जेन्द्वारयमानीचगाम्लेगेषु
क्रूराजः ॥११५॥ नीचर्केकोणारम्भेभौमेराजः ॥११६॥ स्पृङ्गशोगरुजकाविद्युतः केन्द्रगः सर्वसम्पदान्वि
तः ॥११७॥ स्वोच्चस्वमित्रवाशुभभेशुभैर्दृष्टेङ्गेशसम्पन्निमान् ॥११८॥ धनेशोज्योधनेकेन्द्रसम्पन्निमान्
॥११९॥ देवलोकांशेर्केसवलेङ्गेशेसम्पः ॥१२०॥ लग्नेशेवलवतिशुभवर्गगेकेन्द्रपयुतेसम्पः ॥ १
२१॥ लग्नेर्केशुभैर्दृष्टेरवेङ्गेशेसम्पः ॥१२२॥ केन्द्रार्थकोणालग्नेशेज्यपयोगसम्पः ॥१२३॥ लाभधी
स्थेषुसौम्येषुसर्वभद्रम् ॥१२४॥ धर्मेशेङ्गेशुर्योङ्केशेस्वभावावलीकिनोसम्पः ॥१२५॥ ससौम्यर्थे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शर्थैकेन्द्रेवाक्कुटुम्बी ॥ १२६ ॥ धनेधनेशेवाप्युभसम्बन्धेक्र ॥ १२७ ॥ धनेशेगोपुरांशेधनेशांशपेप्युभेसिंहास-

२१ नांशेपञ्चायाञ्जनपालकः ॥ १२८ ॥ धनेशेप्युभैर्युतेपारावतांशेविंशाज्जिनपाः ॥ १२९ ॥ सिंहासनांशेजीवेगो

पुरांशेयुक्तेधनेशेश्शेरावतांशेनेकजनपाः ॥ १३० ॥ धनेशेसिंहासनेवापारावतांशेजीवयुतेदृष्टेत्रिंशज्जनपा

ः ॥ १३१ ॥ सपापेष्टमेशेपापदृष्टेपापान्तेपापर्क्षेपारम्भेवातथाभूतपरिभवान्वितोन्यथाप्रहीनः ॥ १३२ ॥ ध

र्थेकेमीनेचन्द्रेमेषेमन्देकर्केभौमेसम्पन्नः ॥ १३३ ॥ भाग्येशेव्ययेकेन्द्रेपापेधनादिहीनः ॥ १३४ ॥ लग्नात्सप्ते

सर्वेपरिवारक्षयः ॥ १३५ ॥ इतिद्वितीयोधनविवेकः ॥ २ ॥ अथसहजविवेकः ॥ लग्नलग्नेशाम्यांतृतीयस्थाय-

गैर्जन्मादेस्पर्वकुभ्रातरःकैतातृबकुभगिन्यः ॥ १ ॥ सोमस्थेशस्य्रैसौम्यदृष्टेभ्रातृमान् ॥ २ ॥ सौम्यपेसत्शुभेके- २१

न्द्रेभ्रातृसुखम् ॥ ३ ॥ सौम्येशुभैर्युतेवादृष्टेसौम्यपेबलिनिभ्रातृलाभः ॥ ४ ॥ भ्रातृपेकारकेवाबलिनिशु

भसम्बन्धेभ्राः ॥ ५ ॥ गोपुरेसौम्येशेकारकेसिंहासनेशुभर्क्षेभ्राः ॥ ६ ॥ पारावतेभ्रातृपेकेन्द्रेशुभयुतदृष्टे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रा० ॥ ७ ॥ सोन्त्यपेसौम्यभांशे भ्रा० ॥ ८ ॥ सोन्त्येसोन्त्यपेवलाढ्ये भ्रा० ॥ ९ ॥ मृदंशादियुतेसोन्त्यपेशुभयुत
दृष्टे भ्रा० ॥ १० ॥ वैशेषिकांशेसोन्त्यपेशुभयुतदृष्टे भ्रा० ॥ ११ ॥ सोन्त्यांगेशौमित्रे भ्रातृस्नेहः शत्रुर्वैवैरम् ॥ १२
॥ युग्मांशेसोन्त्यकारकेशौर्येग्रहदृष्टे भ्रातृलाभैवपरीत्ये भगिनीलाभो मिश्रेउभयलाभः ॥ १३ ॥ सोन्त्या
द्युपेशवशाद्भ्रात्रादिसंख्या ॥ १४ ॥ सोन्त्यगग्रहस्यांशकाद्भ्रा० ॥ १५ ॥ सोन्त्येशकारकयुतभांशवशात्तत
त्संख्या ॥ १६ ॥ सोन्त्येशयुतभांशवशात्तत्संख्या ॥ १७ ॥ स्त्रीखेटैर्धर्मगैर्भगिन्योनृखेटैर्भ्रातरः ॥ १८ ॥ राज्योध
नेकन्यायांराहौ भ्रातृत्रयम् ॥ १९ ॥ विक्रमेशोरौ त्रिकस्थो भ्रातृहीनः ॥ २० ॥ षष्ठेसोन्त्यपारौपापभेगोपाप
युतोवाभ्रातरउत्पद्यनश्यन्ति ॥ २१ ॥ भ्रातृकारकेनीचगांशेपापदृष्टेदुःखयुंशे भ्रातृहानिः ॥ २२ ॥ सोन्त्ये
पापयुतदृष्टे भ्रा० ॥ २३ ॥ भ्रातृशेपापान्तरे भ्रा० ॥ २४ ॥ पापान्तरेसोन्त्येनीचखेटान्वितेवाशुभादृष्टे भ्रा० ॥
२५ ॥ सोन्त्यपांशेशेपष्ठेनीचास्तारिगे भ्रा० ॥ २६ ॥ भ्रातृकारकेपापान्तरे भ्रा० ॥ २७ ॥ भ्रातृपेसोन्त्येक्रूरषष्ठ ४१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धंशे पापदृष्टे भ्रा०॥ २८॥ सहजेशांशे भ्वांशे शे षष्ठे भ्रा०॥ २९॥ सोऽन्त्येशांशे म्वांशे शेने नीचास्तारिभे भ्रा
२२ ०॥ ३०॥ सोऽन्त्यपेवाकारके त्रिकपापक्षितयुते स्वोच्चेवा भ्रा०॥ ३१॥ सोऽन्त्यगेः पापैर्वाल्पे भ्रा०॥ ३२॥ सोऽन्त्यपे
तत्कारकेवापापैर्युतेवा भ्रा०॥ ३३॥ सोऽन्त्ये मन्दभौमदृष्टे ऽनुजहीन॥ ३४॥ सिंहे केतौ भ्रा०॥ ३५॥ धनगापा
पाः सहजे राहौ भ्रा०॥ ३६॥ सहजेऽनुजवर्गे भौमदृष्टे भ्रातारोगी॥ ३७॥ भौमात्सोऽन्त्येपापे भ्रातृसुखं न॥ ३८
॥ लग्नात्पञ्चमगौ पापौ भ्रातृज्ञोत्पत्तिः॥ ३९॥ खांशेशे वियुक्ते दृष्टे राजप्रेष्यः॥ ४०॥ खेशात्खेज्ञदृष्टे युते राज
प्रेष्यः॥ ४१॥ सूर्यारमन्दैः शुभदृष्टिहीनैः कर्मगैर्भृतकः॥ ४२॥ मन्दांशेशे नीचभे शुक्रव्यये चन्द्रार्कौ ख
०॥ ४३॥ दशमगैः पापैः सौम्यादृष्टैर्भृ०॥ ४४॥ षष्ठेशे मानेश्वरे खेशे मन्दयुते केन्द्रे दासान्वितः॥ ४५॥ कर्मे २२
शांशेशे मन्दे षष्ठपसम्बन्धे वक्रे दासान्वितः॥ ४६॥ नृपर्क्षे शुभकर्मपदृष्टेव०॥ ४७॥ राज्यपे शुभदृष्टाधि
केपदासान्वितः॥ ४८॥ सहजे शुभदृष्टाधिके वा पापयुते वा ऽहङ्कारे जपे बलाढ्ये विक्रमी॥ ४९॥ सहजपे के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्द्रकोणेगोविद॰॥ ५०॥ सौम्यांशेऽत्रयोगेविद॰॥ ५१॥ गुर्वंशेमन्दप्रसिद्धकर्मोपजीवी॥ ५२॥ षष्ठेशेसौम्यैकास्त॰
पापाराग्नादिविक्रेता॥ ५३॥ मेषेचन्द्रेभौमदृष्टेभिक्षुकः॥ ५४॥ चन्द्रस्त्वमदृग्धनिदासोथवाभिक्षुकः॥ ५५
॥ सर्वग्रहैर्नीचमूलांशगैः कर्मान्यगैर्भिक्षुकः॥ ५६॥ अन्त्यगौराकेन्द्रेशेनालग्नेवज्रेभिक्षुकः॥ ५७॥ चन्द्राद्ग
नेपुत्रेजीवेष्टमेऽस्तुभेवापापेनिन्द्यकर्मोपजीवी॥ ५८॥ एकस्मिन्ग्रहेमित्रभागेपराजीवी॥ ५९॥ राज्येऽंशे
त्रिकोणार्थेमन्दपापैस्मृत्युगैर्नीचकर्माजीवी॥ ६०॥ लग्नाद्वाचन्द्राद्वार्काद्वाद्वशमगैः पितृजननीशत्रुमि
त्रभ्रातृस्त्रीभृत्येभ्योर्थाप्तिः॥ ६१॥ लग्नेन्द्वर्केभ्यः खेशांशपांशेशवशाद्वृत्तिंवदेत्॥ ६२॥ सूर्यांशेभेषजपसु
गन्धिसुवर्णाणाद्युक्रामागापरोपनदेत्येनमंत्रोपहारसवादक्रीडादमार्गैर्वाप्तिः॥ ६३॥ चन्द्रांशेशङ्खकु
क्षौमवालादिवाराज्यनक्षापिमृद्वाग्विनोदमार्गैः राज्याङ्गनाश्रयराप्तिः॥ ६४॥ भौमांशेमसःशि
लाहितालहिङ्गुलकाञ्जनादिभिः खड्गचक्रकुन्तचापतोमराद्यैः साहसैरग्निक्रिययास्वबलक्रि॰

418

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यारम्भैर्धनाप्तिः॥ ६५॥ ज्ञांशे श्रुतिविन्यासेन गणितेन यन्त्रयोगेन काव्येन चित्रलेखकपत्रच्छेदवाणामा
२३ स्तरवनागम्यशुक्तिप्रभृतिभिर्धनाप्तिः॥ ६६॥ जीवांशे देवब्राह्मणपण्डितेभ्यः सुवर्णालयाञ्जनगजाद्या
करेभ्यः क्रियावादेन यज्ञदानतीर्थोपवासगुरुसेवनादिभ्यो धनाप्तिः॥ ६७॥ शुक्रांशे वज्रमरकतपद्मरा
गेन्द्रनीलप्रभृतिभिः रौप्यगोलोहैर्गोभिः श्रेष्ठमहिषीभिः सुवर्णगजाश्वव्यापारे धनाप्तिः॥ ६८॥ शन्यं
शे स्वल्पगमनादिकेन वध्यघातिकया स्वशरीरताडनाद्येन भारवाहनास्वकुलाऽनुचितकर्मभिः धनाप्तिः
॥ ६९॥ लग्नाद्दशमेशः स्वभाववशाद्यस्मिन्नवांशे वर्तते तदीशोक्ताऽऽवृत्तिः प्रत्यहम्॥ ७०॥ द्रव्यदा मित्रारि २३
स्वभास्पतश्च लग्नयत्नगतास्ता हि मित्रारिस्थो योगकारा धनाप्तिः॥ ७१॥ धनदोर्कस्तु केबलिनि स्वविक्रमा
द्रव्यम्॥ ७२॥ लग्नार्थायगैः सौम्यैर्बलिभिर्बहुप्रकारैर्धनाप्तिः॥ ७३॥ इति तृतीयविवेकः॥ ३॥ ॥ अ
थ चतुर्थविवेकः॥ वृश्चिकांशे मातृकुक्षिरोगः॥ १॥ रवौ केन्द्रस्थे मनोविकलत्वे मातृसुखं न॥ २॥ षष्ठाष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेचन्द्रेस्तेभौमेसपापेमा०॥३॥शुक्रेवाचन्द्रेपापान्तरेपापयुतदृष्टेवामा०॥४॥सुखेसुखेशेवापापान्त
रेपापयुतदृष्टेवामा०॥५॥चंद्राद्दस्तेसपापेशुक्रेमा०॥६॥सुखेमन्देपापदृष्टेशीघ्रंमातृनाशः॥७॥सुखे
मन्देशुभदृष्टेचिरेणमातृनाशः॥८॥मन्देपापयुतेपापर्क्षेमा०॥९॥पुत्रेचन्द्रेमातृसुखंन॥१०॥चन्द्रौरारवे
धर्मेवामा०॥११॥सपापचन्द्रेऽस्तेमा०॥१२॥शुरावङ्केधनेमन्देराहौघ्नेमा०॥१३॥जीवेङ्केऽर्थेमन्देसोऽस्थे
राहौमातानजीवति॥१४॥सोऽस्थेस्तेर्केलग्नेभौमेमा०॥१५॥सोऽस्थेपापत्रिकेसचन्द्रेपरस्त्रीस्तन्यपानम्॥ 419
१६॥पापान्तरेचन्द्रेवाचन्द्रात्कर्यनगस्थाःपापामा०॥१७॥लग्नात्सुधर्मस्थात्रिकोणाकेन्द्रगाःपितामात्रा
सहैवम्रियते॥१८॥रात्रौचन्द्रात्त्रिकोणेमन्देमातृवधः॥१९॥सुखपेशुभेकार्केशुभयुतेबलाढ्येवासुखे
मातुर्दीर्घायुः॥२०॥चन्द्रेबलाढ्येवाशुक्रेशुभयुतदृष्टेमा०॥२१॥शुक्रेवाचन्द्रेशुभांशेकेन्द्रेमा०॥२२॥
सुखपांशेशांशपेकेन्द्रेबलाढ्येमा०॥२३॥सुखेशेऽङ्केबलाढ्येमातापतिव्रता॥२४॥सुखपेवैशेषिकांशेशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भद्दष्टे मा० ॥ २५ ॥ तुर्येशे शुभार्कदृष्टे मा० ॥ २६ ॥ षष्ठेशे कुजेनयुते चन्द्रे सुखे पापदृष्टे मा नाजारिणि
२४ ॥ २७ ॥ सुखपेशाद्युते सपापे मा० ॥ २८ ॥ लग्नसुखेशावन्योन्यमित्रे शुभैर्वीक्षितयुते मातृस्नेहः
॥ २९ ॥ तुर्येशे केन्द्रे शुभदृष्टे वा शुभदृग्युते मा० ॥ ३० ॥ तुर्यपापे द्विमाता सौम्ये एका ॥ ३१ ॥ तु
र्यांशे चतुष्पदाः सुखदाः ॥ ३२ ॥ सुखे शुभदृष्टेऽधिके च० ॥ ३३ ॥ वर्गोत्तमेऽङ्गेशे वा स्वोच्चांशके वा
स्वमित्रांशे वा शुभयुतदृष्टे आजीवं सुखी ॥ ३४ ॥ लग्नाद्वा तुर्यगाः शुभाः प्राग्वयसि सुखम्
॥ ३५ ॥ जीवे केन्द्रेऽङ्गेशे पारावते वाल्पसुखी ॥ ३६ ॥ धर्मे शुभेऽङ्गे पापे धर्मे शुभे देवलोके वा० ॥ ३७ ॥
लग्ने शुक्रे पूर्वार्द्धे सुखी ॥ ३८ ॥ शुभेऽङ्गेशे शुभैर्वीक्षिते वा गोपुरे तत्पादादूर्ध्वं सुखं ॥ ३९ ॥ लग्नेशे चापे २४
वा लग्ने शांशपे वा तथास्थिते लाभेशे विंशति वर्षेभ्यः परं सु० ॥ ४० ॥ लग्ने शांशेशे केन्द्रे तथा लाभे
शांशेशे वा त्रिंशद्वर्षेभ्यः परं सु० ॥ ४१ ॥ पञ्चमादष्टमगाः शुभ मध्येवयसि सु० ॥ ४२ ॥ केन्द्रस्था शु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रुजन्मतनुपायौवनेसुख० ॥ ४३ ॥ शुभखगैर्लग्नान्त्यलाभगैः केन्द्रेसिंहासनेजीवेश्याघमध्यवयसोःसुख०
॥ ४४ ॥ लग्नार्थसोन्त्यशुभदृष्टियुतेशुभांशेजीवेपारवतेश्वा० ॥ ४५ ॥ पापाधनेकेन्द्रशुभेलग्नेशेउ
न्नमांशेबाल्येदुःखिततःसुखि ॥ ४६ ॥ धर्मादारिःफगाःशुभाश्चन्त्यवयसिसुख० ॥ ४७ ॥ देवलोकांशेशुक्रे
गोपुरेलग्नेशुभदृष्टेमध्यान्त्यवयसोःसुख ॥ ४८ ॥ शुभेजेशुभदृष्टेपापयोगरहितेसुख० ॥ ४९ ॥ पञ्चसुस्वर्क्षगे
पुमहासुख० ॥ ५० ॥ पातालेशेजीवदृष्टेसुख० ॥ ५१ ॥ शुभेसुखेसुख० ॥ ५२ ॥ सुखेशेशुभान्तरेसुख० ॥ ५३ ॥ जीवेबलि 420
नितुर्यपयुतेसुख० ॥ ५४ ॥ केन्द्रकोणगेसशुभेसुखेशेसुख० ॥ ५५ ॥ पातालेशेमृदंशेसुख० ॥ ५६ ॥ लग्नेशाज्जीवेबलि
निसुख० ॥ ५७ ॥ गोपुरांशेशेस्वपेजीवेचसुख० ॥ ५८ ॥ शुभांशेतुर्येशेधनोपचयगेसुख० ॥ ५९ ॥ शुभान्तरेचन्द्रेसुख० ॥
६० ॥ मेषांशेवृषिकामार्जारेदुःखदम् ॥ ६१ ॥ सिंहांशेश्वादयोदुःखदाः ॥ ६२ ॥ कन्यांशेशःग्निकणादुः० ॥
६३ ॥ ज्ञाराहुर्कोःसुतस्थास्तुर्येभौमेरन्ध्रेमन्देऽरवौ ॥ ६४ ॥ लग्नगाःपापादुः० ॥ ६५ ॥ पापेतुर्येजीवेल्पबलि

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निस्वधनोपिस्युः१॥ ६६॥ सपापेसुखपेःघलेसधनोस्युः१॥ ६७॥ पापांशेस्तुपेनीचगेस्वधनपुत्रोपिस्युः१॥ ६८
२५ ॥ सभौमार्कांस्तुपेक्रूरांशेस्तुभट्टस्थीनेनित्यंस्युः१॥ ६९॥ भौमार्कौनीचारिभागगौसुखपापदृष्टौक्रूरांशे
प्रमादाद्गृहार्थनाशास्तुःस्वीच॥ ७०॥ रन्ध्रेशेलाभेबाल्येस्युः१॥ ७१॥ लग्नात्केन्द्रस्थेराहौषष्ठेभौमेकुःस्थी॥
७२॥ पापान्तरेचन्द्रेस्युः१॥ ७३॥ लग्नेशेन्त्येस्वपापेचन्द्रारयोगेस्युः१॥ ७४॥ तुर्येशाच्चन्द्राच्चौप्रासादवान्॥
७५॥ तुर्येशात्तुच्चग्रहेप्रा१॥ ७६॥ स्वंशात्तुर्यराहौकेजोप्रा१॥ ७७॥ केन्द्रगेतुर्येशादिष्टकागृहस्म॥ ७८॥ सुखे
शात्जीविकाद्यगृहस्म॥ ७९॥ सुखेशात्केतुराशागृहस्म॥ ८०॥ लग्नेशास्तुगेसुखेशेङ्गगृहलाभः॥ ८१॥ गृहेशो
बलाढ्येकेन्द्रेस्तुभट्टेगृ१॥ ८२॥ सुखेशेवैशेषिकांशेपरमोच्चगेगृ१॥ ८३॥ तुर्यांशांशेशपेकेन्द्रेगृ१॥ ८४॥ २५
धर्मपेकेन्द्रगेहेशेस्वोच्चमित्रगेतुर्येतुङ्गेग्रहेविचित्रगृ१॥ ८५॥ लग्नस्थेसौम्येतुर्येशेबलिनिगृहेशेशेबल
पूर्णोहर्म्यप्राकारादियुक्तगृहस्म॥ ८६॥ तुर्यपेसिंहासनेगोपुरेस्वांशेवाहर्म्य१॥ ८७॥ गृहेशेपारावतेगोपुरेच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्वेयरुहस्थे दे विकं वेन्नम ॥ ८८ ॥ खतुर्येशो चन्द्रभस्युतौ विचित्रं वे० ॥ ८९ ॥ तुर्याङ्गपौ तुर्ये ऽस्कास्माकु हाप्ति ॥ ९० ॥
यावन्तः पापाः खांस्वस्वात्पनाथैः सहितास्त्रिकस्थास्तावन्तो गृहा वह्निनास्थन्ते ॥ ९१ ॥ राहुकौ पुंशे कुगमानदृष्टे
गृहदाहः ॥ ९२ ॥ केन्द्रकोणे र्के गेहेशो धिल्पप्रयुक्तपापभयम् ॥ ९३ ॥ तुर्येशो षष्ठे पापदृष्टे गेहनाशः ॥ ९४ ॥ गेहेशांशे
शषष्ठगे ॥ ९५ ॥ तुर्येशो रन्ध्रे स्वयमेव गेहं पातयति ॥ ९६ ॥ तुर्याङ्गार्थेशाः यावत्पापयुतास्तावतां गेहानां नाशो न
तु शुभदृष्टे ॥ ९७ ॥ तुर्यतत्पौ चरसंस्कारके वा तथा वहुगृहवासः ॥ ९८ ॥ गृहतत्पौ स्थिरे तथाकारके वा स्थिरवासः ॥
९९ ॥ शुभषष्ट्यंशे तुर्ये स्थि० ॥ १०० ॥ लग्नाम्बुपैशा यावन्तः केन्द्रकोणगा तावन्तो गृहाः शोभना ॥ १०१ ॥ लाभा
र्थेशौ तुर्ये तुर्यपे वैशेषिकांशे शुभदृग्योगे वहुर्थं गृहं लभ्यते ॥ १०२ ॥ खेखस्वेशे कर्मेशे शुभगे वलिनि भौमेव
कृक्षेत्रवान् ॥ १०३ ॥ वलाढ्यौ स्वाम्बुपौ परस्परसुहृदौ वा० ॥ १०४ ॥ तुर्यतत्पौ शुभयुतौ वा० ॥ १०५ ॥ तुर्ये ससुते
गोपुराद्यंशे वा० ॥ १०६ ॥ भ्रातृपे रात्नकारकेरा वायुते तुर्येशो भ्रातरः शेत्राप्तिः ॥ १०७ ॥ वलिन्यङ्गेशे शुभगे

५२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बलिन्यम्बुपेङ्गेस्तुभद्दग्योगेस्वपराक्रमाप्तिः ॥ १०८ ॥ स्त्रीकारकेम्बुगेशेन्नपेघूनेतयोर्मैत्र्यांकलत्रतः
२८ क्षेत्राप्ति ॥ १०९ ॥ षष्ठेशेतुर्यैतन्येषष्ठेषष्ठेशतःक्षेत्रपेधिकवलेशत्रुतःक्षे ॥ ११० ॥ गेहेशेस्वाशेबलिन्यु
पचयगेस्तुभद्दष्टेबहुक्षेत्राप्ति ॥ १११ ॥ गेहेशेनीचारातिमूढगेपापान्तरेपापदृष्टेक्षेत्रादिनाशः ॥ ११२ ॥ पा
पान्तरेक्रूजेपापदृष्टेक्रूरांशेक्षे ॥ ११३ ॥ तुर्येशेक्रूरषष्ठ्यंशेतुर्येपापक्षे ॥ ११४ ॥ तुर्येशेविक्रेक्षे ॥ ११५ ॥ गे
हेशेर्थेसपापेनीचारिभेक्षे ॥ ११६ ॥ गेहेशेतुङ्गेर्थेशेपापेनीचारिभेभूमिविक्रेता ॥ ११७ ॥ कर्मेशेम्बुगेस
पापेक्षेत्रनाशः ॥ ११८ ॥ क्रूरषष्ठ्यंशयमाघंशेखपेसुखेक्षे ॥ ११९ ॥ खेसस्सूर्येम्बुपेराजकोपात्क्षे ॥ १२० ॥
विन्नशांशेशांशेम्बरेगासहितसपापेम्बुपरा ॥ १२१ ॥ सुलाङ्गेशमित्रत्वप्रशंसामित्रम् ॥ १२२ ॥ घूनाङ्गेश २८
मित्रत्वेस्त्रीमैत्री ॥ १२३ ॥ सुखाङ्गेशमित्रत्वेबहुजनमैत्री ॥ १२४ ॥ तयोर्मित्रक्षेत्रगयोःसुहृत्वाप्यः
॥ १२५ ॥ सुखेषुभद्दष्ट्याधिक्येबहुजनमित्रता ॥ १२६ ॥ सुखेसौम्येसौम्यदृष्टेसुखकारकेबलिनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धुपूज्य॥ १२७॥ गेहजीविगेहपेशुभयुतेव०॥ १२८॥ तुर्येस्वोच्चेस्वमित्रभेवारवेटगृहदृष्टेव॥ १२९
॥ त्रिभिरस्वभैर्गेःव०॥ १३०॥ केन्द्रकोणेसुखेशेवंशेषिकांशेपापदृग्योगहीनेबन्धूपकारकृत॥
१३१ तुर्येसौम्येव०॥ १३२॥ धनेशेलाभेत्रिकोणेगेहशुभदृष्टेव०॥ १३३॥ गेहेशेकेन्द्रशुभांशेव
०॥ १३४॥ सपापेतुर्येपेक्रूरषष्ठ्यंशेगल्पवीर्येबन्धुभिस्त्यज्यते॥ १३५॥ यस्तुनाथेवक्रपापयुतेतथै
वकारकेबन्धुमध्येकलिनः॥ १३६॥ पापर्क्षेतुर्येनीचास्तस्वगर्वेनशुभदृग्योगहीनेबन्धुद्वेषो॥ १
३७॥ चतुर्थग्रहेषुसुहृज्जनगेहबन्धुपाप्यः॥ १३८॥ स्वन्येशेशुभसम्बन्धेशुभवर्गेस्वोच्चेवापर्यङ्कशा
यी॥ १३९॥ व्ययेशेपापसम्बन्धेशयनसुखाभावः॥ १४०॥ व्ययेशेपापेपिशुभवर्गेशयनसुख
म्॥ १४१॥ लग्नेशेत्रिकेशयनसुखाभाव॥ १४२॥ नीचेङ्केशेशयनसुखाभाव॥ १४३॥ देहेपम
न्दमान्दयुतेशयनसुखाभावः॥ १४४॥ इतिचतुर्थविवेकः॥ ॥अथपञ्चमविवेकः॥ सुतर्क्षेशु

४२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२

मेषस्थे भदृष्टे सुतेऽधिमानः ॥१॥ सुतेशे तुङ्गे वा सुभान्तरेवं ॥२॥ तौ केन्द्रकोणे वा ॥३॥ शुभभे सुतेशे सु
तेजीविव ॥४॥ ज्ञे सुते वा सुतेशे बलिनि केन्द्रे वा ॥५॥ पुत्रेशे केन्द्रे शुभान्विते धारणादिपटुः ॥६॥
सुतेशे कारके मृदंशादिस्थे शुभदृष्टे मेधा ॥७॥ सुतपे गोपुरादौ धा ॥८॥ सुतकारके गोपुरादौ प
रेङ्गितज्ञो मेधावी ॥९॥ लग्नकोणे चन्द्रार्कौ च स्वबलौ धी ॥१०॥ केन्द्रे जीवे च ॥११॥ ज्ञे न्दारगाजप
रिबलिग्रहदृष्टो श्रिग्रोक्त दानशील ॥१२॥ सौम्ये स्वर्क्षे बले पापदृष्टे चलचित्त ॥१३॥ ससोम्यर्थपे ज्ञे सा
त्विकः ॥१४॥ व्ययेशे सुवाक् ॥१५॥ लग्ने चन्द्रे मन्दारदृष्टे हीनधी ॥१६॥ सुतेशे क्रूरषष्ठ्यं
शेहीं ॥१७॥ मन्दारगा कोष्वन्द्रं पश्यन्ति मौर्ख्यकार ॥१८॥ त्रिके चन्द्रे शुक्रदृष्टे विस्मयशील ॥
१९॥ सपापे सुतपे विस्मयशील ॥२०॥ धीकारके सपापे वा क्रूरषष्ठ्यंशे वि ॥२१॥ केन्द्रगा मन्दे
जय्येशोपिनीचतांगच्छति॥ १९३॥ परमनीचगेर्केब्य॰॥ १९४॥ नीचगेशुक्रेसिंहांशेवास्वांशेब्य॥
१९५॥ राज्यहानीचारात्पसूतगाब्य॥ १९६॥ उत्पातदिनेजन्मनिब्य॥ १९७॥ दशमेनीचस्वगेब्य॥ १९८
॥ चतुर्थस्वगेषुशत्रुभगेषुवानीचांशगेषुब्य॰॥ १९९॥ ग्रहमात्राद्दृष्टेश्चन्द्रोवालग्नंब्य॰॥ २००॥ सिंहांशे
र्केपापयुतेदृष्टिराहन्देसौम्यादृष्टेब्य॥ २०१॥ परमनीचांशेजीवेवाशुक्रेब्य॰॥ २०२॥ पापानीचगाःसर्वे
कराष्टकगाःसौम्यास्त्रिकगाब्य॰॥ २०३॥ सौम्याअस्तगाकेन्द्रहीनालग्नेराहौचन्द्रदृष्टेपापाःषट्स्थाय
गाब्य॥ २०४॥ इतिदशमविवेकः॥ अथैकादशविवेकः॥ भालेशुभान्वायतोलाभोन्यथान्याय
तोमिश्रातभयथा॥ १॥ लाभेशुभदृष्ट्याधिकेबहुलाभः॥ २॥ लाभपेकेन्द्रकोणेव॰॥ ३॥ लाभपेशु
भसम्बन्धेव॰॥ ४॥ चन्द्राद्द्यूनेशुक्रेथानवान्॥ ५॥ चन्द्रात्रिसितेसौम्यायेया॰॥ ६॥ सुखेशेलाभेगु
रुदृष्टेबहुया॰॥ ७॥ गुरुदृष्टसुखेशेनसुखदृष्टेया॰॥ ८॥ जीवाच्चैसुखेशयुतौकेन्द्रकोणायगो

५५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५१ यानव्ययस्थनाथ॥ ९॥ इज्याचक्षौधर्मपयुतौभाग्यपवान्तुर्ययाः॥ १०॥ धनपयुतेन्त्यपेशेतुङ्गे भाग्यपदृष्टेया०
॥ ११॥ धर्मायस्वेशास्तुर्येवाहनसुखम्॥ १२॥ स्वेउच्चगस्वेधर्माङ्गेशादृष्टेवा०॥ १३॥ सिंहासनेस्तु०
कर्मेशोलग्नेशादृष्टोवा०॥ १४॥ सुखेशेसबलेशुभदृष्टयुतेवा०॥ १५॥ सुखेशेङ्गेसशुक्रेवा०॥ १६
॥ सुखेशेङ्गेजीवयुतेवा०॥ १७॥ चन्द्रेजपशुक्रास्तुर्यपयुतान्त्रङ्गेवा॥ १८॥ धर्मपयुतेस्तु पेसबलेजी
वदृष्टयुतेवा०॥ १९॥ भाग्यपेशालाभेशेशासुखेशेधर्मेवा॥ २०॥ सुखपेकेन्द्रेतदंशेङ्गेवा॥ २१॥ स्वे
लग्नेशेस्वेशेङ्गेवा०॥ २२॥ धनेशेङ्गकर्मेशेर्थेतुङ्गगेकास्मिंश्चिद्गृहेवा०॥ २३॥ सुखेशेऽप्यवतेग
जवा०॥ २४॥ सुखेशेकेन्द्रेवेशेषिकेवालाभेपगोपुरेगः॥ २५॥ इतिवाहनादियोगविवेकः॥ ॥अथनाशो
विवेकः॥ षष्ठेष्टमेचन्द्रयुतेनमन्देसर्वहानि॥ १॥ व्ययेपापदृष्याधिकेधनहानिःपठपदे॥ २॥ मीनांशो ५१
त्यागी॥ ३॥ शुभेङ्गेधर्मपपापांशेवापापषष्ठ्यंशेदानशील॥ ५॥ धर्मेस्तुभदृष्टयुतेदा०॥ ६॥ धर्मपपा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रावतादौगुरुदृष्टेलग्नपेभृगुदृष्टेदा० ॥ ७ ॥ लग्नेधर्मपदृष्टेलग्नेपेकेन्द्रेमहादा० ॥ ८ ॥ दानेशेसिंह
सनेखाङ्गपदृष्टेम० ॥ ९ ॥ दापेभृगौखपेकेन्द्रेव्ययेशेगुरुदृष्टेम० ॥ १० ॥ स्वोच्चगेज्ञेधर्मपदृष्टेलाभेकेन्द्रे
म० ॥ ११ ॥ सबलेङ्गपेलाभेधर्मेकर्मपदृष्टेदानप्राप्तिः ॥ १२ ॥ सुतपेङ्गे धर्मपेकर्मगेलग्नपदृष्टेदानप्रा० ॥
१३ ॥ धर्मपखपदृष्टेकेन्द्रकोणेदानप्रा० ॥ १४ ॥ धर्मेशेसशुभेशुभांशेधर्मेदृष्टेवृद्धिः ॥ १५ ॥ धर्मपेवर्ग्गो
पिकेध० ॥ १६ ॥ धर्मपेशुभषष्ठ्यंशेध० ॥ १७ ॥ शुक्रेज्यौधनेधनेशेवर्ग्गोपिकेऽन्नदाता ॥ १८ ॥ सकलेधनपेके
न्द्रोपचयेबलिशुभैर्दृष्टेऽन्न० ॥ १९ ॥ व्ययेशुभेसद्व्ययोऽशुभेऽसद्व्ययोमिश्रेमिश्रः ॥ २० ॥ व्ययेशधिरा
ङ्गशुक्रयोगेराजामूलोव्यय ॥ २१ ॥ जीवेन्यकार्य्याजेनव्यय ॥ २२ ॥ शीतेन्दुसूर्य्यौव्ययेराजाङ्गव्यंहरेत
॥ २३ ॥ व्ययेशुभेधनसञ्चयसंस्था ॥ २४ ॥ स्वन्ये मन्दारौ भ्रातृद्वारा व्ययः ॥ २५ ॥ धनेपापेव्ययेङ्गेशेला
भपयुतदृष्टेऋणग्रस्तः ॥ २६ ॥ सपापेधनेशेमूर्तौधनंस्वेऋण० ॥ २७ ॥ नीचेर्थेशेक्रूरषष्ठ्यंशेतथालाभे

५५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेक्ष०॥२८॥सपापलग्नपास्त्रिकेशयुतदृष्टःक्ष०॥२९॥पुत्रपेज्ञेस्तुभादृष्टेक्ष०॥३०॥लाभेशांशेशे
॥५२॥ शुभयुतेत्रिकेक्रूरषष्ठ्यंशेशेक्ष०॥३१॥लग्नपेमृत्वारिचान्त्रिकेमारकेशयुतेभाग्यपेस्तुभैरदृष्टेनरेः
शोपिक्ष०॥३२॥धनायेशयोस्त्र्यंशेशास्यांशेशौवैशेषिकांशेकेन्द्रकोणेक्षयादाता॥३३॥लग्नेशां
शेशोमृद्वंशादौजीवदृष्टःक्षयादाता॥३४॥व्ययत्रिकोणार्थगेषुपापेषुबन्धनम्॥३५॥स्वान्त्ययोः
सुतान्त्ययोःषष्ठान्त्ययोःसोत्थाययोश्चतुर्थदशमयोर्वाग्रहसाम्येब०॥३६॥वृषाजहर्योदयेपापा
व्यन्त्याङ्कसुतांगारज्जुब०॥३७॥द्वाश्चिकोदयेव्यन्त्याङ्कसुतगाःपापाःभूयहेबन्धनम्॥३८॥युग्म
तुलाजकन्योदयेव्यन्त्याङ्कपुत्रगाःपापानिगडब०॥३९॥झषकर्कमृगोदयेव्यन्त्याङ्कसुतगाःपापा ॥५२॥
दुर्गप्रवेशोनिगडरहितः॥४०॥लग्नारिशौसमन्दौकेन्द्रकोणेब०॥४१॥योगकर्तृषुयोधिकबलस्त्रः
दीयदशान्तर्दशायांपरिपाकः॥४२॥ ॥इतिबन्धयोगविवेकः॥अथनिर्धनयोगविवेकः॥व्यंशेशेभौमेधातु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वादीकौन्निकोवह्निजीवीच ॥ १ ॥ सुतपञ्चिकेपार्ग्धीनोविद्याहीनश्च ॥ २ ॥ सुतेशोङ्गेप्यङ्गात्रिकेवा
विद्याप्रवन्धहीन ॥ ३ ॥ द्यूनेङ्गेशो भार्यानजीवतियाविरक्तः ॥ ४ ॥ लग्नेशोङ्के भाग्यवान्वैष्णवः पदु
श्च ॥ ५ ॥ लग्नेशः षष्ठे षष्ठेङ्गे व्याधिहीनः शूरो वलवांश्च ॥ ६ ॥ सप्तमेङ्गेशे सप्तमेशो लग्नेशे नातसेवी
शालकसेवीच ॥ ७ ॥ सुतपेङ्गेङ्गेशे सुतेमनस्वीविद्वान्मानीच ॥ ८ ॥ रन्ध्रे लग्नेशे लग्ने रन्ध्रेशे द्यूतकारीशूर
श्चौर्यादिरतश्च ॥ ९ ॥ धर्मेशोङ्गेङ्गे धर्मेपिदेशी धर्मशीलोराजमान्यश्च ॥ १० ॥ लग्नेशे लाभे लाभेपेङ्गे सुकर्मादीर्घा ५४८
युर्भूपतिः कोविदश्च ॥ ११ ॥ लग्नेशे स्वे स्वपेशे लग्ने सर्वशत्रुजिद्विहीनः कृपणश्च ॥ १२ ॥ धनेशोङ्गेङ्गेशे धनेधनी
मानीतरादानीच ॥ १३ ॥ लग्नेशे सोत्थे षष्ठे विक्रमीमानीदयावांश्च ॥ १४ ॥ रवान्तुगेङ्गेशे कामीसुखीच
॥ १५ ॥ स्वगृहेऽर्थेशो मानी धनहीनश्च ॥ १६ ॥ सजीवे सोत्थपेधीरः शास्त्रविशारदश्च ॥ १७ ॥ सारेसोत्थपेज
डः प्रचण्डः कोपीच ॥ १८ ॥ सगुलिके सोत्थपे ह्युजडो धीरश्च ॥ १९ ॥ स्वर्भ्रशे पूर्णोऽनुसाको भोगी विद्याजीवीच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥५३॥ ॥ २० ॥ धर्मेशे जीवे धर्मज्ञानी वेदविद्वांश्च ॥ २१ ॥ भाग्यपे केन्द्रकोणस्थे शुभयुतदृष्टे धनविद्याभाग्ययुतः ॥ २२
॥ नीचेर्के षष्ठे ऽष्टमे क्रूरदृष्टे नृपकोपात्पितृमरणं वित्तनाशश्च ॥ २३ ॥ सबले भाग्यपे भाग्यवान्दीर्घमानी गु-
रुधर्मशीलो धनी च ॥ २४ ॥ खेशेऽङ्केऽङ्केशे सबले शुक्रेज्ययुतदृष्टे जपध्यानसमाधिमान् ॥ २५ ॥ खेशस्यांशे-
शांशेशे सबले खेशोऽङ्केज० ॥ २६ ॥ धर्मेशो कर्मे शुभदृष्टयुते धर्मनिरतः सत्यवादी गुरुभक्तश्चान्यथा तु पापदृ-
ष्टयुते ॥ २७ ॥ लग्ने पापे शुभादृष्टयुते संन्यासी स्त्रीनाशो वा ॥ २८ ॥ व्ययेशेऽङ्के याचावान्धार्मिको धनि ॥ २९
॥ स्वर्क्षेऽन्यशे धनी कृपणो बहुपशुमांश्च ॥ ३० ॥ कर्माङ्गेशावन्योन्यभगौ स्यातां प्रतापी च ॥ ३१ ॥ दारेश-
जे बहुस्त्रीरतः कलहश्च ॥ ३२ ॥ धर्मेशादे सौर्के पतिव्रताधिकलाङ्गी स्त्री ॥ ३३ ॥ समन्देज्ये परवस्त्रनदृश्यो ॥५३॥
गुरुवचनातिक्रामी च ॥ ३४ ॥ शुक्रेज्ययोगे सद्विद्याधनदारगणयुक्तः ॥ ३५ ॥ ज्ञार्कयोगे वाग्मी विद्वा-
न्भूपगणापः ॥ ३६ ॥ ज्ञेज्ययोगे गीतप्रियो नृत्यविन्मल्लः ॥ ३७ ॥ मन्दारयोर्नेतुः स्वप्नेतु भार्याणिन्दितश्च

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ३८ ॥ यमाच्छुयोगेल्पदृष्टिर्लिपिपुस्तकश्चित्रवेत्ता ॥ ३९ ॥ शुक्रार्कयोगे गोपालकमल्लदक्षपरांगना
गामी ॥ ४० ॥ भौमारेज्ययोगे पुराध्यक्षोन्नृपः प्राज्ञो विप्रो द्विज ॥ ४१ ॥ पापालग्नान्त्यास्तगास्सुतस्त्रीनाश
का ॥ ४२ ॥ मंदार्केकुटुम्बीबहुस्त्रीरत ॥ ४३ ॥ धर्मेशे न्यूनेन्येशौर्ये सोत्यथपापैकुभोजी कुष्कर्मान्यगामी ॥
४४ ॥ नीचभांशोजीविजीवांशोर्कैः निःस्वः स्त्रीसुतदारहीन ॥ ४५ ॥ राह्वर्कान्यतरयुते षष्ठेशेन्ये परग्रह
वासी नीचप्रान्निश्च ॥ ४६ ॥ लग्नेन्ये अर्के चन्द्र षष्ठे भौमेस्ते मातापितृघाती ॥ ४७ ॥ मेषे चन्द्रमन्ददृष्टे नि
र्धनो लोभी ॥ ४८ ॥ कर्मास्तुपो त्रिके दुर्बलो सबले इष्टपे जन्मा वसरे पितृमातृवामरणाम् ॥ ४९ ॥ सुखेशां ५५९
शपे केन्द्रे मित्रदृष्टे वा भौमदृष्टायुते भ्रातृधनं क्षेत्रं च प्राप्नोति ॥ ५० ॥ धर्मास्तुपो कर्मगो सर्वार्थवाहन
युतो भाग्यवान् ॥ ५१ ॥ खेजीपेहङ्क्तिर्तो मानीच ॥ ५२ ॥ धनेशे पापदृष्टे कपटादिना विषभोजनम् ॥
५३ ॥ शुभर्क्षे भ्रातृकारके शौर्यधैर्यान्वित ॥ ५४ ॥ सोत्थेशांशेश्वरांशेशोस्वर्गादिवर्गमानी उच्चपड्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लहप्रियः ।। ५५ ।। लग्नेर्थेजीविमधुराप्रियमधुरवाक्सत्यवादि ।। ५६ ।। लग्नेशेङ्कक्रजार्कदृष्टेक्रोधीव्यसनी
कटुप्रियः ।। ५७ ।। कोशगेज्ञार्केसितावातेस्थिरधनी ।। ५८ ।। सौम्येराहुमन्देकनखीदन्तकेशधातिवायुरोगी
।। ५९ ।। सौम्येर्कैर्वाभौमेस्थितिभङ्गो विषभयंवह्निजं चितृभ ।। ६० ।। खलास्त्रितिगासत्राणाचित्तंग्रहंभगन्दरा
दिरोगीच ।। ६१ ।। खेचन्द्रसुताङ्गेजीविदानीतपस्वीजितेन्द्रियश्च ।। ६२ ।। शेन्द्वर्कजाःकेन्द्रव्ययधर्मगाऐश्वर्य
ज्ञानहीनः ।। ६३ ।। सर्वग्रहनीचारिभागगाउच्चस्थाग्रपिसत्कर्महीनोभिक्षार्थी ।। ६४ ।। लग्नेशेरन्ध्रेक्रूरयुत
दृष्टेग्निमान्द्यंदद्रुकरांगुपीडाश्चिवी ।। ६५ ।। भौमेङ्गेनेत्रपार्शोभुजङ्गदन्तक्षतपावकास्त्रभयम् ।। ६६ ।। चन्द्र
कौषष्ठेऽष्टमेवामन्दास्त्रदरोगी ।। ६७ ।। केन्द्रिसौम्यभ्रातृहीनोधनीच ।। ६८ ।। क्रमात्षष्ठादित्रयगा
भौमार्कमन्दाभार्यानजीवतिभ्रातृहीनश्च ।। ६९ ।। राहिन्दुसपापोरिःफेउन्मादिकलहशीलः ।। ७० ।। सुख
शेराहोधातुक्षयीरोवा ।। ७१ ।। सुखेशेशुक्रेराजसेवीकामीच ।। ७२ ।। भ्रातृपेसशुक्रेकामीकलही ।। ७३ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोऽथेशेऽङ्गेशे सोऽन्त्येऽल्पवीर्यः कलत्रसुखदः ॥ ७४ ॥ खलयुतदृष्टे कुजे सोमृग्व्रणकृत्क्लीवः ॥ ७५ ॥ शुभांशे ईनो
ज्ञवर्गे केन्द्रे विस्मयालुर्भ्रमयुक्तः ॥ ७६ ॥ लाभाङ्केऽर्थेशे उधर्मी धनी गुरागी ॥ ७७ ॥ लग्नेशेऽन्त्येऽरवे पापे भौमयु
तचन्द्रे परेशे शीभिक्षाशी दुःखी ॥ ७८ ॥ जीवार्येशे षष्ठान्त्यगो क्लेशभाग्ज्ञयहीनः ॥ ७९ ॥ चन्द्रात्सौम्याः
षष्ठादित्रयगाश्चमूपसचिवभूपा बलतारतम्यात् ॥ ८० ॥ चन्द्राद्व्ययान्त्योभयेऽनफाधनसुनफा दुरु
रुधरान्यथा केमद्रुम ॥ ८१ ॥ सुनफायां राजा तत्समो वा धीधनख्यातिमांश्च ॥ ८२ ॥ अनफायां प्रभुः शी
लवान्ख्यातो निरोगी ॥ ८३ ॥ दुरुधरायां धनवाहनाढ्योत्पन्नभोगसुखभुक् ॥ ८४ ॥ केमद्रुमे मलिनदुःखि 450
तनीचनिःस्वोऽनपत्योऽपि ॥ ८५ ॥ चन्द्रार्कयोगे यन्त्राश्मकर्ता ॥ ८६ ॥ ज्ञार्कयोगे गो क्रियापटुर्धी कीर्तिसौख्या
न्वितः ॥ ८७ ॥ जीवार्कयोगे क्रूरोन्यकार्यनिरतः ॥ ८८ ॥ शुक्रार्कयोगे ज्ञाप्तवैर्लब्धस्वः ॥ ८९ ॥ मन्दार्कयोगे धा
तुनैपुणापमः ॥ ९० ॥ मन्दारयोगे लब्धकश्चलाचित्तः ॥ ९१ ॥ चन्द्रज्ञयोगे प्रियवागर्थपटुः सौभाग्यकीर्त्यन्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥५६॥ ऽबलेस्ते शुभदृष्टे भर्त्रा त्यज्यते ॥२२॥ वक्रार्कावन्योन्यांशगावन्यसक्ता ॥२३॥ चन्द्रारार्कास्तन्नमे वाण्डुष्प
वत्यौपत्याज्ञयान्यसक्ता ॥२४॥ लग्ने सितेन्दू मन्दारभगौ पापदृष्टौ जनन्या सहान्यान्परता ॥२५॥ कुलक्षांशे
स्ते मन्ददृष्टे सरोगभागा ॥२६॥ मद्गुरंशेस्ते सज्जगा पतिप्रिया ॥२७॥ सूर्यक्षांशे घृणे पतिर्मन्दरतिः ॥
२८॥ चन्द्रक्षांशेस्ते मृदुः कामी पतिः ॥२९॥ मन्देवक्रक्षांशे प्रियः क्रोधी पतिः ॥३०॥ ज्ञक्षांशेस्ते पतिर्वि
द्वान् ॥३१॥ जीवभांशेस्ते गुणी जितेन्द्रियः पति ॥३२॥ शुक्रभांशेस्ते कान्तो भाग्यवान् ॥३३॥ मन्दभांशे
स्ते मूर्खो वृद्धश्च पतिः ॥३४॥ लग्ने शुक्रेन्दू मात्सर्यवती सुखिनी ॥३५॥ ज्ञेन्दू लग्ने कलाज्ञा गुणसुखा ॥५६॥
ढ्या ॥३६॥ ज्ञार्कावङ्गे दर्शनीया भर्तृप्रिया कलाज्ञा ॥३७॥ शुभा लग्नगा अनेकसुखगुणाढ्या ॥
३८॥ पापेऽष्टमेऽस्तमे शांशेशदशायां विधवा ॥३९॥ गोकन्यालिसिंहेष्विन्दावल्पपुत्रा ॥४०॥ मन्देमध्य
बलेन ग्रहेषु सबलेषु शेषेषु निर्बलेषु पुंल्लग्नजा पुंवत्सृष्टा ॥४१॥ ज्ञारेज्यार्का बलिनः स्त्रीलग्नजा ख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताप्रसविता ॥ ४२ ॥ कुजेस्ते धर्मगप्रव्रज्या ॥ ४३ ॥ पापभे पापदृष्टे स्तेनपत्या ॥ ४४ ॥ एकस्मिन्नुभयोस्ति
षु सौम्येषु सप्तमे पतिप्रिया प्रवरा राज्ञा ॥ ४५ ॥ द्यूने राहौ कुलदोषदा दुःखार्ता ॥ ४६ ॥ लग्नचन्द्राभ्यनत्
:पापाः सप्तमेष्टमे वा विधवा ॥ ४७ ॥ भौमस्ते राहौ सप्तमेष्टमे व्यये विधवा ॥ ४८ ॥ लग्नेन्दु पापान्तरगौ सौ
म्यादृष्टौ कुलक्षयघ्नी ॥ ४९ ॥ कर्केस्ते भौमार्कौ परासक्ता जारिणी ॥ ५० ॥ लग्नतुर्याष्टमान्त्यमदास्तगमेस्
पापोरे पतित्यागात् परासक्ता ॥ ५१ ॥ द्यूनेङ्के पापे विवाहोत्तरं सप्तमाब्दे रण्डा ॥ ५२ ॥ षष्ठेऽष्टमे चन्द्रेऽष्ट
माब्दे माब्दे रण्डा ॥ ५३ ॥ सप्तमेस्वेशे स्वे सप्तमेशे पापदृष्टे नवोढा रण्डा ॥ ५४ ॥ षष्ठाष्टमेशौ षष्ठे वा व्य
ये पापयुते न ॥ ५५ ॥ अष्टमे जीवे वा शुक्रे नष्टगर्भा वा मृतापत्या ॥ ५६ ॥ कुजेष्टमे कुलटा ॥ ५७ ॥ मन्देष्टमे 452
पतिरोगी ॥ ५८ ॥ सूर्येष्टमे सन्तापयुक्ता ॥ ५९ ॥ रन्ध्रे राहौ कुलधर्मघ्नी ॥ ६० ॥ मन्दांशे षाढितीयायां जा
ता विषाख्या ॥ ६१ ॥ सूर्यवारे रामाद्वादश्यां जाता विष ॥ ६२ ॥ कुजविशाखा सप्तम्यां जाता वि ॥ ६३ ॥ पाप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥५५॥

तः॥२२॥चन्द्रेज्ययोगेशस्तुजेताकुलमुख्यश्चपलोधनी॥२३॥चन्द्राच्छयोगेवस्त्रादिक्रियापटुः॥२४॥
एकस्मिन्नपुण्येऽङ्गे समश्चित्रप्रस्तुरधनः स्मिद्रः॥२५॥चन्द्रमन्दयोगेपरुषवाक्पटीच॥२६॥सवलेश्वेशो
केन्द्रकोणेयज्ञकूपायतनकर्तादेवतातिथिपूजकः॥२७॥शुभावक्रगाराज्यार्थदाःपापाव्यसनहानिदाः
॥२८॥सर्वेस्मोम्यास्त्रायारिगावाल्येसुखीतेन्नेवपापावयसोन्त्ये॥२९॥इतिमिश्रविवेकः॥ ॥अथजा
तकतत्त्वेस्त्रीयंतत्त्वम्॥२॥अथस्त्रीजातकतत्त्वम्॥यत्पुंजातकोक्तंतत्सर्वस्त्रीणामपि॥१॥स्त्रीणामस्
सम्भवंपतिषु॥२॥लग्नचन्द्रतःशरीरंतत्सप्तमाष्टमतःसौभाग्यवैधव्ये॥३॥लग्नेन्द्वोःसमभेस्त्रीस्त्रीः
स्वभावाशुभदृष्टेसच्छीलभूषणागुणा॥४॥विषमर्क्षगतयोःपुरुषाकृतिशीलयुक्तापापयुतदृष्टे ॥५५॥
पापिनीगुणरूपहीना॥५॥तयोर्योवलीतत्त्रिंशांशफलम्॥६॥भौमभेभौमस्यत्रिंशांशेकन्यैवदुः
ष्टाज्ञस्यमायाविनीगुरोःसाध्वीकवेःकुलटानामन्दस्यदासी॥७॥शुक्रभेशुक्रस्यत्रिंशांशेगुणारव्याता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञस्यकलाज्ञागुरोर्गुणाढ्यामर्षीमन्दस्यपुनर्भूः कुजस्यकुष्टा ॥ ८ ॥ तुभेकुजस्यत्रिंशांशेकापटिनीज्ञस्यप
शीनीर्जीवस्यसतीशुक्रस्यकामुकीमन्दस्यक्लैब्यवती ॥ ९ ॥ कर्कवक्रस्यत्रिंशांशेवेश्याज्ञस्यशिल्पज्ञा
जीवस्यगुणाढ्याशुक्रस्यकुलटामन्दस्यपतिघ्नी ॥ १० ॥ सिंहेकुजस्यत्रिंशांशेनराचाराज्ञस्यपुंश्चे
ष्टितागुरोराज्ञीशुक्रस्यपुत्रगामिनीमन्दस्यकुलच्युता ॥ ११ ॥ जीवर्क्षेकुजस्यत्रिंशांशेवहुगुणाज्ञस्य
विज्ञाजीवस्यगुणान्वितविज्ञाशुक्रस्यसतीमन्दस्यजारिणी ॥ १२ ॥ मन्दभेवक्रस्यत्रिंशांशेदासीज्ञस्य
दुष्टागुरोःसाध्वीशुक्रस्यवन्ध्याशनेर्जारिणी ॥ १३ ॥ मन्दाच्छावन्योन्यांशगावन्योन्यदृष्टौवाशुक्रभेङ्ग
धन्यांस्यपुरुषाग्निनाभिस्त्रीभिःस्वकामंशमयति ॥ १४ ॥ सप्तमेग्रहाभावेऽवलेसौम्यादृष्टेकुभर्तृका ॥
१५ ॥ ज्ञार्कजावस्तेभर्ताक्लीवः ॥ १६ ॥ चरेङ्गेभर्ताप्रवासी ॥ १७ ॥ मन्देसूर्येसप्तमेत्यजते ॥ १८ ॥ सप्तमेभौ
मेपापदृष्टेबालविधवा ॥ १९ ॥ मंदेमन्देपापैर्दृष्टेऽग्रविवाहः ॥ २० ॥ मिश्राःसप्तमेपुनर्भूः ॥ २१ ॥ पापे

४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥५८॥ ःबलेस्त्रीशुभदृष्टेभर्त्तात्यज्यते ॥२२॥ वक्रार्क्यावन्योन्यांशगावन्यसक्ता ॥२३॥ चन्द्रारार्कास्तन्त्रेमेवाऽपुष्प
वन्नौपत्याज्ञयान्यसक्ता ॥२४॥ लग्नेसितेन्दू मन्दारभगौ पापदृष्टौ जनन्यासहान्यान्यपरता ॥२५॥ कुलदृंशीं
स्ते मन्ददृष्टे सरोगभोगा ॥२६॥ सद्गुहांशोस्ते सङ्गापतिप्रिया ॥२७॥ सूर्यश्चांशे घृणेपतिर्मन्दरतिः ॥
२८॥ चन्द्रश्चांशेस्ते मृदुःकामीपतिः ॥२९॥ मन्देवक्रश्चांशे प्रियःक्रोधीपतिः ॥३०॥ ज्ञश्चांशेस्तेपतिर्विद्
वान् ॥३१॥ जीवभांशेस्ते गुणीजितेन्द्रियःपति ॥३२॥ शुक्रभांशेस्ते कान्तोभाग्यवान् ॥३३॥ मन्दभांशे
स्ते मूर्खो वृद्धश्चपतिः ॥३४॥ लग्ने शुक्रेन्दू मात्सर्यवती सुखिनी ॥३५॥ ज्ञेन्दू लग्ने कलाज्ञा गुणा सुख्या ॥५८॥
ढ्या ॥३६॥ ज्ञार्क्यावङ्गे दर्शनीया भर्तृप्रिया कलाज्ञा ॥३७॥ शुभा लग्नोगा स्वनेकसुखगुणाढ्या ॥
३८॥ पापेष्टमेस्तमेशांशेशदशायां विधवा ॥३९॥ गोकन्यालिसिंहेष्विन्द्वावल्पपुत्रा ॥४०॥ मन्देमध्य
बलेन्यग्रहेषु सबलेषु शेषेषु निर्बलेषु पुंल्लग्नजा पुंवत्कृष्टा ॥४१॥ ज्ञारेज्याच्छावलिनः स्त्रीलग्नजा स्त्र्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताप्रसूविता ॥ ४२ ॥ क्रूरेस्ते धर्मगे प्रव्रज्या ॥ ४३ ॥ पापभे पापदृष्टेस्ते न पत्या ॥ ४४ ॥ एकस्मिन्नुद्वयोस्ति
ष्ठसौम्यैस्तु सप्तमे पतिप्रिया प्रवरा राज्ञा ॥ ४५ ॥ द्यूने राहौ कुलदोषदा दुःखार्ता ॥ ४६ ॥ लग्नचन्द्रान्यतरत
ः पापाः सप्तमेष्टमे वा विधवा ॥ ४७ ॥ भौमर्क्षे राहौ सप्तमेष्टमे व्यये विधवा ॥ ४८ ॥ लग्नेन्दू पापान्तरगौ सौ
म्यादृष्टौ कुलद्वयघ्नी ॥ ४९ ॥ कर्कस्थे भौमार्कौ परासक्ता जारिणी ॥ ५० ॥ लग्नतुर्याष्टमान्त्यमदान्यतमस्
पापैः पतित्यागात् परासक्ता ॥ ५१ ॥ द्यूनेन्दुः पापे विवाहोत्तरं सप्तमाब्दे रराडा ॥ ५२ ॥ षष्ठेष्टमे चन्द्रेष्ट
माब्दे माब्दराडा ॥ ५३ ॥ सप्तमे स्थ्रेशे रश्वे सप्तमे शिपापदृष्टे नवोढा रराडा ॥ ५४ ॥ षष्ठाष्टमेशौ षष्ठे वा व्य
येपापयुतेन ॥ ५५ ॥ अष्टमे जीवे वा शुक्रे नष्टगर्भा वा मृतापत्या ॥ ५६ ॥ कुजेष्टमे कुलदा ॥ ५७ ॥ मन्देष्टमे 452
पतिरोगी ॥ ५८ ॥ सूर्येष्टमे सन्तापयुक्ता ॥ ५९ ॥ रन्ध्रे राहौ कुलधर्मघ्नी ॥ ६० ॥ मन्दाश्लेषाद्वितीयायां जा
ताविषाख्या ॥ ६१ ॥ सूर्यवारहस्ताद्वादश्यां जाताविष ॥ ६२ ॥ कुजविशाखासप्तम्यां जाताविष ॥ ६३ ॥ पापे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्गेऽसच्छुभे पापा वा विरोगो जाना विं ॥६४॥ षष्ठेऽर्के मन्देऽङ्गे भौमे मेद्रु विं ॥६५॥ सातुर्भे गाम्नतापत्या धनो नाशो का
र्ता ॥६६॥ घूने पापाशुभे स्त्री विधवा स्यान ॥६७॥ शेष्टमे काकवन्ध्या ॥६८॥ मन्दार्कावष्टमे व ॥६९॥ क्रमं विवाह
काले पृच्छायां च विन्यसेत् ॥७१॥ इति स्त्रीजातकं चतुर्थं तन्त्रम् ॥ ॥अथ दशान्तारम्भः॥ ग्रहो भावराशि
रूपो गर्जी विकादिफलं स्वदशान्तर्दशायां ददाति ॥१॥ अतिबलस्य परमोच्चगस्य वा दशा संपूर्णा सिद्धा ध
नारोग्य विवर्धिनी ॥२॥ विबलस्य वा नीचगस्य रिक्ता धनहानिदा ॥३॥ किञ्चिद्बलोपेतस्योच्चगस्य पूर्णा ध
नदा ॥४॥ परमनीचगस्य वा नीचांशगस्य वारिषुं शगस्या निष्टा धनारोग्य नाशिनी ॥५॥ नीचाभिमुखस्य
स्यावरोहिणी कष्टदा सैव मित्रोच्चराश्यात्मांशगस्य म[illegible]मा ॥६॥ उच्चाभिमुखस्यारोहिणी शुभदा सैव
नीचारिभांशगस्याधमाल्पशुभदा ॥७॥ तुङ्गात्मामित्रभगस्य[illegible]नीचांशगत्वे पूर्वार्द्धे शुभा परार्द्धे मिश्रा
॥८॥ मित्रोच्चात्मस्वत्रिकोणावर्गोत्तमस्ववर्गगस्य शुभा ॥९॥ अस्तारिनीचभांशगस्य कष्टा ॥१०॥ अवरोहि

॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोपेधमाचेनकष्टा ॥ ११ ॥ श्रीशेहिरीणामध्याचेनसम्पूर्णा ॥ १२ ॥ सदृष्टयुतस्याधिकारश्रमैः केन्द्रकोणाग
स्यशुभान्यथाकष्टा ॥ १३ ॥ लग्नदशाचरभेङ्गे द्रेष्काणाक्रमाच्छ्रेष्टा मध्याधमाद्विस्वभावे व्यत्ययेनास्थि
रेनेष्टष्टसमा ॥ १४ ॥ वक्रगस्यपाकेस्थानमानसौख्याद्यपचयः ॥ १५ ॥ त्रिकेतरगस्यपाकेऽभिष्टसिद्धिः
॥ १६ ॥ भाङ्गेशारिपुपाकेवुद्धिभ्रंशोराजभयंच ॥ १७ ॥ राहुयुतस्यदशारिष्टदा ॥ १८ ॥ रन्ध्रगाङ्गेशस्यपाके
तिपीडा ॥ १९ ॥ पापदशायांपापान्तरेशत्रुतोर्थहानिर्महाभयम् ॥ २० ॥ इष्टाधिकस्यश्रेष्टाकष्टाधिकस्य
नेष्टासमस्यसमा ॥ २१ ॥ लग्नेशदशावलधनदा ॥ २२ ॥ धनेशदशाकष्टार्थदा ॥ २३ ॥ सोन्थपपाकेप्रायेण
नेष्टफलम् ॥ २४ ॥ सुखेशपाकेगृहादिसुखम् ॥ २५ ॥ सुतेशदशाविद्यार्थदा ॥ २६ ॥ षष्ठेशदशारिपुभ
वदा ॥ २७ ॥ जायेशदशाशोकदा ॥ २८ ॥ मृत्युपदशायांमृत्युः ॥ २९ ॥ धर्मेशदशायांधर्मक्रिया ॥ ३० ॥ खेश
दशानृपाश्रयार्थदा ॥ ३१ ॥ लाभेशदशालाभदा ॥ ३२ ॥ व्ययेशदशार्थहानिकष्टदा ॥ ३३ ॥ दिग्वलोपेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

स्य पाके महाप्रतिष्ठा स्वदिग्भागे ॥ ३४ ॥ अन्योन्यषष्ठाष्टमगयोरन्तरे महाभयम् ॥ ३५ ॥ पाकेशाधिकग
॥५८॥ स्य भुक्तौ स्थानच्युतिर्हानिश्च ॥ ३६ ॥ पापपाके शुभान्तरे स्यादौ कष्टं ततः सुखम् ॥ ३७ ॥ शुभपाके शुभा
न्तरे सुखम् ॥ ३८ ॥ शुभपाके पापान्तरे स्यादौ सुखं ततो भयम् ॥ ३९ ॥ दशान्तर्दशाप्रवेशे सलग्नाः खेटाः स्फु-
टाः कार्याः ॥ ४० ॥ तत्र पाकेशो वा शुभे लग्नोपचयगे दशा श्रेष्ठा ॥ ४१ ॥ अङ्के पाकपमित्रवर्गे वा शुभवर्गे-
दशा शुभा ॥ ४२ ॥ प्रवेशे स्वर्क्षगे चन्द्रे मानार्थसुखं सिंहे न्वसुखं भौमभे कलहः ज्ञभे विद्यार्थाप्तिर्जीव
भेऽपि मानार्थसुखं शुक्रभे कदारमानयशोऽर्थाप्तिर्मन्दभे सेवा ॥ ४३ ॥ त्रिकेतरस्थे सबले चन्द्रे दशा-
श्रेष्ठा ॥ ४४ ॥ स्वस्वदशेशाच्च मित्रस्वभस्थः सन्दशेशाधिष्ठितराशित उपचयत्रिकोणास्तगश्चेच्चन्द्र ॥५८॥
: शुभफलदोऽन्यथानिष्टः ॥ ४५ ॥ चन्द्राधिष्ठितराशिर्जन्मनि यज्ज्ञावगमस्तज्ज्ञो वा स्थं शुभमशुभं वा ज्ञेयम्
॥ ४६ ॥ रिपुभुक्पापस्य पापदशान्तरे विपत् ॥ ४७ ॥ विपत्कर्तृदशारम्भे सर्वाधिकबलः कोऽपि स्वर्गगः शु

भमित्रदृष्टश्चेन्नविपत् ॥ ४५ ॥ जन्माङ्गचन्द्रान्यतरान्नश्चारवशीनीपचंयगोग्रहश्चेन्मित्रोच्चमूलत्रिको
५८ णाश्रितोऽष्टवर्गजंशुभंपूर्णामशुभंस्वल्पंदिशतिन्नन्यथानेष्टंपूर्णांशुभंस्वल्पंतन्नापिनारान्तस्मात्क
थनीयम् ॥ ॥ अनुभूतिप्रदंनामज्योतिषंशास्त्रमुत्तमम् ॥ निगमान्निर्गतंलोकवन्द्यंविजयतेतराम्
॥ १ ॥ जैमिन्याद्युक्तितःसारंनवमीतामिवोद्धृतम् ॥ महादेवेनविदुषास्वादयन्तुसुबुद्धयः ॥ २ ॥ ॥ इ
तिमहादेवकृतजातकतत्त्वेदशातत्त्वंपञ्चमम् ॥ ५ ॥ समाप्तश्चायंग्रन्थः ॥ ॥ शुभम् ॥ ॥ ५८ ५५४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३ नं १६८८९

क्रियोड्डीशतन्त्र

मूल्य १३।-

455

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनक १९२३

॥ क्रि॰ड्डी ॥ ओँनमोगणेशाय ॥ ॥ आनन्दशिखरारूढं पार्वत्यासहशंकरम् ॥ पप्रछ गिरिजाकान्ता
॥ १ ॥ पुनर्नत्वावृषध्वजं ॥ ॥ श्रीदेव्युवाच ॥ भगवन्देवदेवेश सर्वज्ञानमयप्रभो ॥ इदानीं
श्रोतुमिच्छामिक्रियोड्डीशं वदशिव ॥ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि उड्डीश
तंत्रमुत्तमं ॥ गोपितव्यं प्रयत्नेन मम स्वप्राणवल्लभे ॥ ॥ शान्त्यादि षट्कर्माणि तेषां ल
क्षणं च ॥ स्वदेवतादिग्कालादि ज्ञात्वा कर्माणि साधयेत् ॥ ही नां भू सलिलशोणी व्योम
वायु हविर्भुजाम् ॥ एतेषां बीजयोगेन ग्रथनादिक्रमेण कर्म साधयेत् ॥ ॥ ठं वं लं हं यं रं ॥ ॥
तत्र देवता रतिर्वाणी रमा ज्येष्ठा मातंगी कुलकामिनी ॥ दुर्गा चैव भद्रकाली कमौरे नाःप्र पूज
येत् ॥ वसन्तादिदिक् कालनियमः ॥ ॥ इति क्रियोड्डीशे महातंत्रराजे देवीश्वरसम्वादे प्र ॥ तंत्रः ॥
थमः पटलः ॥ १ ॥ अथ सर्वरोगमुक्तिकवचं ॥ ॥ श्रीदेव्युवाच ॥ देवदेव महादेव कुण्डा ॥ १ ॥
उरनमस्कृत ॥ इदानीं श्रोतुमिच्छामि रोगमुक्तकथं प्रभो ॥ नास्ति ज्ञाता च जगतां त्वां विनापर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेश्वर ॥ ज्वरादिवारणं शीघ्रं कृपया परयावद ॥ ॥ ईश्वर उवाच ॥ कथयामि न वस्ते हा
नकवचं वारणं महत् ॥ ओं नमो भगवति वज्रशृंखले हनतु भक्षतु खादतु अहोरक्तं पि
वपिव नरस्यास्थि रक्तं पटे दुस्मांसि भस्मलिप्त शरीरे वज्रायुधे वज्रप्राकारनिचिते पू
र्वादिशं बंधतु दक्षिणादिशं बंधतु पश्चिमादिशं बंधतु उत्तरादिशं बंधतु नागार्थधन
गृहपतिं बन्धतु नागपतिं बन्धतु यक्षराक्षसपिशाचान् बन्धतु प्रेतभूतगन्धर्वादयो ये
केचित् उपद्रवास्तेभ्यो रक्षतु ऊर्ध्वं रक्षतु अधो रक्षतु श्वेतिकां बन्धतु ज्वल महाबले स्फे
हि नु मोटि मोटि सटावलि वज्राग्नि वज्रप्राकारे हुं फट् ह्रां ह्रीं श्रीं फट् ह्रं ह्रः फुं फें फः सर्व
ग्रहेभ्यो सर्वव्याधिभ्यः सर्वदुष्टोपद्रवेभ्यः ह्रीं कृशेभ्यो मां रक्षतु ॥ ॥ इतीदं कवचं दे 456
वि सुरासुरसुदुर्लभं ग्रहज्वरादिभूतेषु सर्वकर्मसु योजयेत् ॥ न देयं यस्य कस्यापि कव
चं मन्त्रसर्वस्वमुत्तमं ॥ तद्दत्ते सिद्धिहानिः स्यात् योगिनीनां भवेत् पशुः ॥ दद्यान्महाज्ञाय वीरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कि॰ त्री ॥ यसन्तकुलीनाययोगिने सदाचाररतायेचनिर्जिताशेषरूवहि ॥ ऐकाहिकं द्व्याहिकंच त्र्या
॥ २ ॥ हिकं चातुर्मासिकं ॥ सर्वज्वरविनाशनिकवचं धारयेत् यदि ॥ स्त्रियावामकरे धार्य्यं पुरु
षोदक्षिणेकरे ॥ अवश्यमेवसिद्धिः स्यात्सत्यं सत्यंवरानने ॥ ॥ इतिकिर्याड्डीशम
हातंत्रराजे देवीश्वरसंवादे द्वितीयः पटलः ॥ २ ॥ अथसर्वरोगविनाशायपार्थिवशि
वलिंगपूजनप्रकरणम् ॥ ॥ अतःपरं महेशानि पूजनंपार्थिवंशिवं ॥ विशेषतः सर्व
रोगघ्नमवकल्पपूजनम् ॥ यत्कृत्वा सर्वतः शान्तिर्भवेदेवनसंशयः ॥ ततः प्रयोगं सर्वेषांव
श्यादीनांच कारयेत् ॥ विधानंतत्र वक्ष्यामि शृणुष्व कमलानने ॥ ॥ शिवपूजाविधानं ॥ ॥
मृत्तिलिंगंविनिर्माय शततोलकमानया ॥ तत्वानीयमतम् पुरतः स्थापयित्वा समाह्वेतम् ॥ पूर्वम ॥ तंत्रः ॥
गिंच संस्थाप्य यत्र स्थाने चतुर्विधं ॥ उत्तरे दक्षिणे वापि पूर्वे चपश्चिमे तथा ॥ सर्वकामेषु ॥ २ ॥
होतव्यमन्यथा निष्फलं भवेत् ॥ घटं संस्थाप्य मम पूजां शक्तिसहितं ॥ ततोवह्निस्थापनं ॥ पुरःस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्नं ॥ नरमहिषमार्जारमृगत्रयं अथवाजमृगत्रयं एकमेकं वा तदुपरि मांसपूज्य गंधो
दकैः स्नापयित्वा छित्वा शिरसि धरातले पोथयित्वा तस्योपरि वेदीं कल्पयेत् ॥ तत्रैव भूत
नाथादीं चतुर्दिक्षु समर्च्चयेत् ॥ पूर्वे ओं भूतनाथाय नमः ॥ इति पाद्यादिभिः पूजयित्वा
बलिं दद्यात् ॥ दक्षिणे श्मशानाधिपाय ॥ पश्चिमे कालभैरवाय उत्तरे च ईशानाय ॥
वेदीमध्ये ह्रीं त्रिमन्त्रबीजं विलिख्य तत्रैव भारतीं पूजयेत् ॥ ॥ पुष्पांजलि ॥ देवीरुद्रावदेवे
रुद्ररूप जगत्पते ॥ दयां कुरु महाभाग सिद्धिदो भव मन्त्रपे ॥ इति पुष्पांजलित्रयं द
त्वा आग्नेय्यां ह्रीं - - नमः ॥ नैरृत्यां ह्रीं चण्डिकायै नमः ॥ वायव्ये ह्रीं भद्रकाल्यै नमः ॥
ईशाने ह्रीं श्यामायै नमः ॥ श्मशानवासिनी ये देवा देव्यश्च भैरवाः ॥ दयां कुर्वन्तु मे सर्वे 457
सिद्धिदाश्च भवन्तु मे ॥ अनेन प्रार्थयेन पुष्पांजलित्रयं क्षिपेत् ॥ ततः स्थानं तु संस्थाप
बलो भव भवेदिति ॥ तदनन्तरं स्नानं कृत्वा लिंगं संस्थाप्य संकल्पं परमेश्वरि ॥ स्नानं तर्पं च ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्षी॰टी॰ ॥ क्षीरदधिदुग्धादिकं तथा ॥ अथवा परमेशानि शर्करामधुनाघृतम् ॥ पंचामृतैस्ततः स्नानं
॥ ३ ॥ कारयेत्परमेश्वरि ॥ ईशानाय प्रथमं स्नानं वामदेवाय द्वितीयकं ॥ तृतीये सद्योजाताय
चतुर्थे चापि लोकहृत् ॥ पंचमे देवदेवेशं पूजयेत्पार्थिवं शिवं ॥ मधुनामूलमंत्रेण
शर्करया गायत्रिकं परं ॥ ततो जीवन्यासं कृत्वा न्यासादिकं ततः परं ॥ ॥ध्यानम्॥ ॥
ध्यानं शृणु महादेवि स्नेहेन कथितं मया ॥ हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शि
रो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परं ॥ अंकन्यस्तकरद्वयामृतघटं कैला
शकान्तं शिवं ॥ स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे ॥ एवं ध्यात्वा तु संपूज्य अ
ङ्गन्यासं ततः परं ॥ ॥ अङ्गन्यासं ॥ ॥ ओं तत्सवितुर्वरेण्यं हृदयाय नमः ॥ त्र्यम्बकं ॥ तंत्रः ॥
यजामहे सुगन्धिं पुष्टिवर्द्धनं शिरसे स्वाहा ॥ भर्गो देवस्य धीमहि शिखायै वषट् ॥ उर्वा ॥ २ ॥
रुकमिव बन्धनान् कवचाय हुं ॥ धियो यो नः प्रचोदयात् नेत्रत्रयाय वौषट् ॥ मृत्योर्मो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षीयमामृतात् अस्त्रायफट् ॥ एवंकाम्याल॥ ॥ततः षोडशोपचारैः पूजा॥ जवांप

राजितां कल्हाबिल्वपत्रं च पिप्पलं ॥ अपामार्गकरवीरं एतोकंजुहुयात्तथिवे॥

अष्टाधिकशतेनैव १०८ पूजयेत् ॥ ॥अतःपरं महेशानि मधुरद्रव्यविशेषतः॥

उर्द्धकरलैनैवशुरास्तुधालगग्यंतु ॥नारिकेलोदकेचैव कांश्येमृसविर्यस्य च॥

कांश्येस्थं माषिकं - - - वैश्यस्य - - - शूद्रस्य नाग पात्रेतु मधुयुक्तोनिवे

दयेत् ॥अथवा सार्षपतैलं आज्येन होमयेत् द्विजः॥ जुहुयात् सर्वकर्माणि कथितं ते

महेश्वर॥ ॥मंत्रं॥ ॥मंत्रं परं महादेवि कथितं तव भक्तया॥ ॐतत्सवितुर्व

रेण्यं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनं॥ भर्गो देवस्य धीमहि उर्वारुकमिवब

न्धनात् धियो यो नः प्रचोदयात् मृत्योर्मुक्षीय मामृतात् ॥ अष्टाधिकं जपेत् ध्यात्वा

रश्चरणापूर्वकम् ॥उक्तविधानं सर्वकर्मसु॥ ॥स्नानभेदम्॥ शून्यागारे नदीतीरे

१५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥क्रि·उ॥ पर्वते वा चतुष्पथे ॥ विल्वमूले श्मशाने वा निर्ज्जने च वा पूजयेत् ॥ भवायस्य मूर्ति पूजयेत्
॥ ४ ॥ ॥भगिनी मायस्य शक्तिंच ॥ वन्ध्या वा मृतवत्सा वा दग्धं वा राजशत्रुके ॥ सर्वशान्तिकरं देवि
पूजने त्र्यम्बके शिवे ॥ अतएव कथितं मे सर्व्वसत्यं वरानने ॥ ॥ इति श्रीक्रियोड्डीश
महातन्त्रराजे देवीश्वर सम्वादे तृतीयः पटलः ॥ ३ ॥ अथ सर्वव्याधिमोचनम्
॥ अथातु वक्ष्यामि चार्वङ्गि सर्वव्याधिविमोचनम् ॥ एकादश पूजयेत् सुजान् दशांशं
गुलैर्घृतैः ॥ चत्वारः कुम्भाः संस्थाप्य पंचपल्लव संयुताः ॥ उक्तमंत्रेणारोप्याष्ट दलपद्म
मध्ये लिंगं पूजयेत् ॥ प्रतिवासरं सप्तलिंगं पूजयेत् ॥ त्र्यम्बं जप्त्वा पलाश समिधा होमं
उक्तमंत्रेण तत्क्रमात् ॥ अत्र पीठे यजमानमभिषेकयेत् ॥ दक्षिणां दद्यात् ॥ ॥ तंत्रः ॥
गोभूहेमतिलांजलिं ब्राह्मणेभ्यः किंचित् देयी आचार्याय दद्यात् ॥ ॥ इति क्रि ॥ ४ ॥
योड्डीश महातंत्रराजे देवीश्वर संवादे चतुर्थः पटलः ॥ ४ ॥ अथ क्रियोपदेशः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वशीकरणादिकर्माणि वार तिथि नक्षत्र मण्डल विशेषे कर्त्तव्यं ॥ स्फटिकी माला सर्वसिद्धि
दा ॥ मणि संख्या पंचविंशति भिर्मोक्षं प्रोक्तेन सप्तविंशति ॥ त्रिंशाष्टिर्धन सिद्धिः ॥ पंचाश
त् मंत्रसिद्धये ॥ अष्टोत्तरशतं सर्वसिद्धिः ॥ शिव मंत्र समायुक्त मौषधं सफलं भवेत् ॥
पुत्तलिका उत्पाटन छेदनादि विधि ॥ पूर्वं तंत्रे कथितं ॥ बन्ध्यादि दोषनिवारणं ॥ स्त्रीणां
बाधकमोचनम् ॥ रक्तमात्रादि चतुर्विध बाधक दोषनिवारणं ॥ मंत्र यंत्रं त्रिकोणमथ
षट्कोणं नवकोणं मण्डलाकृति ॥ पत्राण्येतानि संलिख्य धारयेत ॥ मंत्रपूर्वकम्
मंत्र पूजनात् औषधादि भक्षणात् दोषशान्ति ॥ ॥ इति त्रिकोयोड्डीशे महातंत्र राजे
देवीश्वर संवादे पंचमः पटलः ॥ ५ ॥ अथ मृतवत्सादि शान्ति कवचम् ॥ ॥ 959
मृतवत्सा गर्भे मृता पुत्र हीनानां शान्तिः कवच धारणात् ॥ दिव्यरूपाय नरसिंहाय
नमः ॥ स्त्रौं स्रौं क्षौं रामाय नमः ॥ रां रामाय नमः ॥ ॐ ह्रीं श्रीं फ्रां हुं ह्रां फें न कोरप्रदेन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वबालकस्य सर्वभयोपद्रवनाशाय य इमां विद्यां पठति धारयति यदि तस्य नरसिंहो र
क्षति सत्यं हुं फट् स्वाहा ॥ १ ॥ प्रकारान्तं द्वितीयम् ॥ ओँ नमो नरसिंहाय हिरण्यक
शिपोर्वक्षःस्थलविदारणाय त्रिभुवनव्यापकाय भूतप्रेतपिशाचडाकिनीकुलोन्मू
लनाय स्तम्भोद्भवाय समस्तदोषान् हर हर विष विष पच पच मथ मथ हन हन फट् हुं ओँ
फट् ठः ठः एहि [illegible] स्वाहा ॥ २ ॥ ओँ क्ष्रौं नमो भगवते नारसिंहाय ज्वाला
मालिने दीप्तदंष्ट्राय अग्निनेत्राय सर्वरक्षोघ्नाय सर्वभूतविनाशाय सर्वज्वरविना
शाय दह दह पच पच रक्ष हुं फट् स्वाहा ॥ ३ ॥ गोरोचनया भूर्जे विलिख्य स्वर्ण
स्थां गुटिकां स्त्रिया वामकरे पुरुषेण दक्षिणे करे धार्या कदापि न दोषः ॥ ॥ इति ॥ तंत्रः ॥
श्रीक्रियोड्डीशे महातन्त्रराजे देवीश्वरसंवादे षष्ठः पटलः ॥ ६ ॥ अथ देव्युवाच ॥ अ ॥ ५ ॥
नेककवचचरितं मम पूर्वं देव वाञ्छितं ॥ इदानीं श्रोतुमिच्छामि यन्त्रं कथय मे प्रभो ॥ मंत्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्वर उवाच ॥ मायाहीनं वक्ष्यामि तु पार्श्वे शीघ्रं निधापयेत् ॥ तेनैव जायते मंत्रं षट्कोणे
मायया त्मकम् ॥ मायाबीजं ह्रीं गर्भं ॥ स्त्रिया वामहस्ते धारणान् वन्ध्या पुत्रवती भवेत्
बालाया बालकस्यापि कण्ठे धार्या सुखी भवेत् ॥ भूर्जे गोरोचनया विलिख्य स्वर्ण
स्थं धारयेत् ॥ षोडशी चक्रे गोरचनया भूर्जे विलिख्य धारणान् स्त्री णां सौभाग्यद
यकम् ॥ चतुष्कोण चक्रं संलिख्य ह्रीं गर्भं बाहौ धारणान् नारी जीववत्सिका ॥ ॥
अथवा चतुष्कोण पणवादि स्थं पुनः मीनचक्रं संलिख्य धारणात् वन्ध्या जीवव
त्सिका भवति ॥ ॥ अतः परं षट्दलकर्णिका मध्ये माया ॥ ततः परं दलेन मध्ये
ह्रीं माया पुनः पुनः ॥ इतः परं नवदले मायाबीजं लिख्य बाहौ धारणान् मृतवत्सा जीववत्
त्सा ॥ गोरोचना कुंकुमेन संलिख्य रक्तसूत्रेण संवेष्ट्य गुटिकोपं चामृतैः पंचगव्यैः स्ना
पयित्वा पूरणावेष्टनं संमंत्र्य स्थापयेत् गन्धद्रव्यैः प्राणान् प्रतिष्ठाप्य देवतारूपां गुटिकां

460

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि·ड्डी ॥ संपूज्य धारयेत् ॥ ॥ शिवस्नानम् ॥ ॥ घृतेन मधुना वापि स्नापयेद् वश्यकर्म्मणि ॥ इ
॥ ६ ॥ क्ष्वादिना स्नापयेद्देवि शान्तौ मृत्युंजयेऽपि च ॥ आकर्षणे तु मधुना भस्मना क्रूरकर्म्मणि ॥
अस्य परिमाणं ॥ शतनीलकमानेन द्रव्यमेतत्प्रकीर्त्तितं तन्मानं सम्बिसाचूर्णं नैवेद्यं च
महेश्वरि ॥ विल्वपत्रं तथा पुष्पं स्याद्दशोत्तरं शतं ॥ शान्तिकादौ जाणपुष्पैर्व्वर्व्वरा चाभिचा
रके ॥ स्तम्भने मोहने चैव धत्तूरं कनकाह्वयं ॥ विद्वेषोच्चाटने देवि विजयाप्यपराजिता
चतुर्द्दशान समारभ्य यावच्चतुर्द्दशी ॥ एकैकं क्रमशो लिंगं पूजयेद् भक्तिभावतः
अष्टाधिकसहस्रं तु जपं कुर्य्याद्दिने दिने ॥ सप्ताहे सप्तलिंगानि पंचाहे वाथ पञ्चकम् ॥ च
राडाग्रेण विधानेन जपपूजादिकं स्मृतम् ॥ षडक्षरेण मंत्रेण मृत्युघोषेण वापि ये ॥ अ ॥ मंत्रः ॥
वकमंत्रेण देवेशि शान्तिके जपपूजने ॥ तत्तत्कल्पविधानेन पूजाजपं समाचरेत् ॥ ॥ ६ ॥
यत्नेन पूजयेद्देवि लिंगमष्टोत्तरं शतं ॥ अनिरुद्धप्रयोगादौ रुद्रध्यानेन वा पुनः ॥ नीलक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करोत्वनयादेविस्तवचनेतोषयेच्छिवम् ॥ स्तवम् ॥ सर्वज्ञज्ञानविज्ञानप्रदायैकमहात्म
ने ॥ नमस्ते सर्वदेवेश सर्वभूतहितेरत ॥ अनन्तकान्तिसंपन्न अनन्तासनसंस्थितः
अनन्तकान्तिसंभोगः परमेश नमोऽस्तु ते ॥ परापरपरातीत उत्पत्तिस्थितिकारकः ॥
सर्वार्थसाधनोपाय विश्वेश्वर नमोऽस्तु ते ॥ सर्वार्थनिर्मलभोगं सर्वव्याधिविनाश
न ॥ योगियोगी महायोगी योगीश्वर नमोऽस्तु ते ॥ स्तुत्वा लिंगपतिस्तोत्रैश्च ध्यात्वा देवं सदा
शिवं ॥ पूजयित्वा विधानेन स्तवपाठमुदीरयेत् ॥ लिंगस्तवं महापुण्यं यः पठेन्नित्यशो नरः
नोत्पद्यते च संसारे स्थानं प्राप्नोति शाश्वतं ॥ तस्मात् सर्वप्रयत्नेन स्मरणपाठसुसंस्तवं
पापकर्मोकलिर्मुक्तः प्राप्नोति परमं पदम् ॥ ॥ इति क्रियोड्डीशे महातन्त्रराजे देवीश्व
रसंवादे सप्तमः पटलः ॥ ७ ॥ अथ रुद्रकवचम् ॥ भैरव उवाच ॥ वक्ष्यामि देवि कवचं
मंगलं प्राणरक्षणम् ॥ अहोरात्रं महादेव रक्षार्थं देवमण्डितम् ॥ अस्य श्रीमहादेवकव 461

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शि॰ क॰ ॥ अस्य वामदेव ऋषिः पंक्तिछंदो हंसेः बीजं रुद्रदेवता सर्वार्थसाधने विनियोगः ॥ ॥ रुद्रोम
॥ ७ ॥ मयनः पातु पातु स्तम्भनः शंकरः ॥ कपर्दी दक्षिणे पातु वामपार्श्वे तथा हरः ॥ शिवः शिर
सि मां पातु ललाटं नीललोहितः ॥ नेत्रं मे त्र्यम्बकः पातु बाहुयुग्मं महेश्वरः ॥ हृदये च
महादेव ईश्वरश्च तथोदरे ॥ नाभौ कुक्षौ कटिस्थाने पादौ पातु महेश्वरः ॥ सर्वं रक्षतु भूते
शः सर्वगात्राणि मे हरः ॥ पाशं शूलं च दिव्यास्त्रं खड्गं च वज्रमेव च ॥ नमस्करोमि भूतेशः ॥
रक्ष मां जगदीश्वर ॥ पापेभ्यो नरकेभ्यश्च त्राहि मां भक्तिवत्सल ॥ जन्ममृत्यु जराव्याधि काम
क्रोधादपि प्रभो ॥ लोभमोहान्महादेव रक्ष मां त्रिदशेश्वर ॥ त्वं गतिस्त्वं मतिश्चैव त्वं भूमि
स्त्वं परायणः ॥ कायेन मनसा वाचा त्वयि भक्तिर्दृढास्तु मे ॥ ॥ फलश्रुतिः ॥ इत्येतद्रुद्र ॥ तंत्र ॥
कवचं पठनात् पापनाशनम् ॥ महादेवप्रसादेन भैरवेणाच कीर्तितम् ॥ न तस्य पापदेहेषु ॥ ७ ॥
न भयं तस्य विद्यते ॥ प्राप्नोति सुखमारोग्यं पुत्रमायुःप्रवर्द्धनम् ॥ पुत्रार्थी लभते पुत्रान् धनार्थी ध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमाप्नुयात् ॥ विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमेव च ॥ व्याधिना मुच्यते रोगी बद्धो मुच्येत
बन्धनात् ॥ ब्रह्महत्यादि पापं च पठनाद् देव मुच्यते ॥ ॥ इति श्रीयोडीशे महातंत्रराजे दे
वीश्वर संवादे अष्टमः पटलः ॥ ८ ॥ अथासनं ॥ ॥ एकलिंगासनं प्रोक्तं द्वितीयं
कमलासनं ॥ व्याघ्राजिने सर्वसिद्धिर्ज्ञानसिद्धिर्मृगाजिने ॥ वस्त्रासनं रोगहरं वेत्रजं श्रीनि
वर्द्धनम् ॥ कौशेयं पुष्टिदं प्रोक्तं कम्बले सर्वसिद्धिदं ॥ शुक्लं वा यदि वा कृष्णं विशेषाद् रक्त
कम्बले ॥ मेषासनं तु वश्यार्थं मार्जारो व्याघ्रचर्म च ॥ शान्तौ मृगाजिनं ग्र स्ते मोक्षार्थं व्याघ्र
चर्म च ॥ गोचर्म स्तम्भने देवि वाजी चोच्चाटने तथा ॥ विद्वेषं श्वान चर्मेण
मारणं माहिषं चर्मकर्महिष्टं समाचरेत् ॥ सर्वकामार्थदं देवि पद्मवस्त्रासनं तथा ४६२
कुशासनं कम्बलं वा सर्वकर्मसु पूजितं ॥ दुःखदारिद्र्यनाशं तु काष्ठपाषाणराजासनं ॥
अथ होम पटादि स्थापनं ॥ नित्ये नैमित्तिके काम्ये स्थण्डिले वा समाचरेत् ॥ हस्तमात्रे गगन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि॰ त्री ॥ न कुर्यात् वलुकाभिः सुशोभनं ॥ तोयपूर्णान् घटान् पंच स्थापयेत्परमेश्वरि ॥ एकेनव
॥ ८ ॥ स्नुग्मेन स्थापितः सुः सपञ्चवैः ॥ अथ कौच महादेवि एकैकेन चवा सता ॥ कदा
चिदपि चैकेन सर्वान्नाद्ये छिवे ॥ अनाच्छादितान्तोयान् स्थापयित्वा व्रजत्वधः ॥ ॥
ततः स्थां स्थीं क्लीं इति श्रीमिति मंत्रेण घटं स्थिरीकृत्य ॥ क्लीं इति घटप्रोक्षणम् ॥ क्रमिति
घटाभिमंत्रितं ह्रीं इत्यारोपनं ह्रीं जलेन पूरणं ॥ ततः कृतांजलिः पठेत् ॥ ॥ औं गं
गाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ सर्वे समुद्राः सरितः सरांसि जलदा नदाः ॥
ह्रदाः प्रस्रवणाः पुण्याः स्वर्गपातालभूगताः ॥ सर्वतीर्थानि पुण्यानि घटे कुर्वन्तु सन्नि
धिम् ॥ ततः श्रीमिति घस्थवं हूमिति फलं ॥ रमिति सिन्दुरं ॥ यमिति पुष्पं ॥ मूलेन दु ॥ तंत्रः ॥ ॥ ८ ॥
र्वा ॥ औं औं औं इत्यभ्युक्षणम् हुं फट् स्वाहा इति कुशेन ताडनम् ॥ शान्तये स्थापयेत्त
त्कुंभं ॥ ब्राह्मणान् वाचयित्वा कर्म कुर्यात्ते ॥ दिग्बन्धनादि ॥ गणेश ग्रहादिकपालान् प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कारोड पूजनम् ॥ स्थण्डिले पूजयेद्विंगं सर्वविपद्विनाशनं ॥ अम्भे चापि पूजयेत् ॥ नच अ
ग्निमाणीय संस्कृत्य होमं कुर्यात् ॥ डोलां वा करवीरं वा मनोऽभीष्टफलं लभेत् ॥ करवीरैः
श्वेतरक्तैः रक्तचन्दनमिश्रितैः ॥ जोरोग्यकेन कौशेयोर्हैमा रोगं विमोचयेत् ॥ चम्पकैः
श्वेतपद्मैश्च कोकनदं च वन्धुकम् ॥ विल्वपत्रं जरुवकं मुनिपुष्पं च केशरम् ॥ कृत्वा यदि
महादेवि अवश्यं पुत्रवान् भवेत् ॥ रक्तोत्पलं विल्वपत्रं कांचनं रक्तचूर्णकम् ॥ शान्तिम
नष्टकं चापि शान्तसंख्याक्रमेण तु ॥ यदि कृत्वा महेशानि सर्वसिद्धिर्भवेत्तथा ॥ ॥
इति क्रियोड्डीशे महातन्त्रराजे देवीश्वरसंवादे नवमः पटलः ॥ ९ ॥ अथ शान्ता
भिषेकः ॥ शान्ताभिषेको वन्ध्यामृतवत्सारोगिणीनां ॥ शान्तिकरः ॥ धनकीर्त्यायुर्वृद्धि 463
सौभाग्यजननः ॥ सर्वाशापूरणो मन्त्रदोषनिवारणोऽभिचारोऽहदोषग्रहदोषनाशन
ः सर्वसिद्धिप्रदोऽभिषेकः ॥ ॥ अथ नयनरंजनं ॥ धूपं कृत्वा ताम्रपात्रे कज्जलं पातयेत्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रिड़ी ॥ स्थ॥गवांघृतेनचालोड्यचक्षुषीअथरंजयेत्॥पूर्वेचसाहयींद्दृष्टंनाहर्षंचपुपश्यते॥ ॥
॥ ९ ॥ प्रकारान्तरे॥रक्तचन्दनसंयोगान्मधुनासहरौद्रके क्रियदृष्टमंजनंचतिमिरंहन्ति
सुन्दरि॥ अथान्यः॥पुनर्गवाघृतेभवेच्चक्षुस्तेजःकरंभवेत॥ ॥अथज्वरहरणो
॥अपामार्गस्यमूलंचकन्यकासूत्रबन्धने॥ज्वरंहन्यात् स्त्वामविष्णु
भे ॥अथसर्वज्वरनिवारणम्॥रक्तवाघामूलमर्कवारेकदलीसू
त्रैःशाखायांनापयेत सर्वज्वरंनापज्वांहरेत॥ ॥अथउदरीरोगप्रशमनम्॥नागेश्व
रमूलंमधुनासहपानाउदरीरोगंनश्यति॥ ॥अथतृष्णानाश॥रक्तचन्दनंघर्षयित्वा
नीलकंजलसंमिश्रंवामहत्सेनगृहीत्वामन्त्रमस्येनंघातंतदुपरिसंजप्यपिवेत॥सप्ता ॥ तंत्रः ॥
हान्तस्यतृष्णानाशोभविष्यति॥मंत्रस्तु॥शम्बीजद्वयंभद्रेनाशयाद्विनूयंवदेत्॥न ॥ ९ ॥
षोनिपदमुच्चार्यततःस्वाहामन्त्रमीनः॥अनेनमन्त्रादेविनतृष्णानाशोऽभिजायते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ॥ अथ सर्वोपद्रवशान्तिकरं महास्वस्त्ययनं ॥ अथ वक्ष्ये महेशानि महास्वस्त्ययनं
परम् सर्वसिद्धिकरं पुण्यं सर्वपापविनाशनम् ॥ सर्वोपद्रवयहरणं सर्वारिष्टविनाशनं
॥ महाव्याधिप्रशमनमपस्मारविनाशनम् ॥ योगिनीभूतवेतालाः प्रेतकुष्माण्डपन्नगा
॥ तत्रस्थाने न तिष्ठन्ति डाकिन्याद्याविशेषतः ॥ कृत्वा समभ्यर्च्चयेद्देवि यथाविधि प्रयत्नतः स
रम् ॥ षोडशारं लिखेन्मध्ये योनियुग्मं सबिन्दुकं ॥ तन्मध्येऽष्टदलं लिख्य यकारादीं
न्यसेत्क्रमात् ॥ तन्मध्ये षट्कोणं तु लिखेत्कुलमन्त्रं स्मरन् ॥ चन्द्रबिम्बं लिखेन्मध्ये
अलाध्यपार्थिवं शिवं ॥ तस्य मध्ये न्यसेत्कुम्भं गलेस्त्रग्दामभूषितं ॥ तस्य मध्ये न्यसेत्
कृत्वा सर्वलक्षणसंयुतां ॥ पूजयेच्च यथान्यायां पायसान्नं निवेदयेत् ॥ परितोष्य घटे न्य
स्य असितांगादिभैरवां ॥ गन्धपुष्पादिनाभ्यर्च्य तथा लोकेशपालकाः ॥ लोकपालं यजे
द्देवि तदग्रे होममाचरेत् ॥ जुहुयादपामार्गेण रक्षतां भिद्मशीर्णे ॥ दुर्वाग्रे खदिराश्वत्थं प

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि॰उ्डी॰ ॥ नैकतुष्ठानादिकम् ॥ कुण्डे वा स्थण्डिले वापि होमकर्म समाचरेत् ॥ तस्य दक्षिणपार्श्वे तु
॥ १० ॥ लक्ष्मीं ध्यायेन्न यथाविधि ॥ कुण्डमध्ये न्यसेद्देवीं दक्षिणे च श्रियं स्मरेत् ॥ वामपार्श्वे स्म
रे देवीं हृल्लेखां परमेश्वरीं ॥ तस्यैव वामपार्श्वे तु पूजयेद्गणनायकम् ॥ अथ तं मूलमन्त्रं
च जपेन्मन्त्रविनाशनम् ॥ अयुतं कुणाह माया जपेन परिमार्गवित् ॥ महाव्याधिविश
मनं नावज्ञात्वाभिषेकतः ॥ एवं यः कुरुते मर्त्यः पुण्यांगतिमवाप्नुयात् ॥ तस्यावश्यं निवे
शनव्याधिभ्योपि भयं न हि ॥ इति क्रियोड्डीशमहातन्त्रराजे देवीश्वरसंवादे द
शमः पटलः ॥ ॥ अथ कुमार्याभिषेचनम् ॥ ॥ श्रीईश्वर उवाच ॥ अथ वक्ष्यामि
संक्षेपात् कुमार्याभिषेचनं शृणु ॥ ओं कृत्विजनेद्दे शगोमयेनोपलेपिते ॥ आचार्य ॥ तंत्रः ॥
ः प्रयतो भूत्वा सुस्नातो विजितेन्द्रियः ॥ नवकुम्भं समादाय शुद्धकुम्भेन पूरयेत् ॥ १० ॥
नवं शरावमानीय कपिलाघृतपूरितम् ॥ कुम्भोपरि समारोप्य दीपं प्रज्वालयेत्ततः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्तास्य मंत्रजापेन कुमारो वा कुमारिका ॥ अतीतानागतं चैव वर्त्तमानं च यद्भवेत् ॥
शुभाशुभानि सर्वाणि पश्यन्ति नात्र संशयः ॥ लम्बकण्ठां त्वा गणेशानं गतेयामे जपेन्
निशि ॥ शुभाशुभानि कर्माणि कथयन्ति न संशयः ॥ कन्यकार्थी शुचिर्भूत्वा मन्त्रराजं ग
णेशितुः ॥ जप्त्वा दशसहस्राणि डमरुकाष्टमावर्जैः ॥ पुष्पैर्दशांशहवनात् नां कन्यां
लभते ध्रुवं ॥ ॥ अथ काम्यकर्माणि ॥ ॥ वक्ष्यामि काम्यकर्माणि साधकानां
हितायवै ॥ शास्त्रोक्तेनैव मंत्रेण संक्षेपान्न तु विस्तरात् ॥ ॥ अथ दिव्यज्ञानादिला
भः ॥ ॥ स्वहृन्मध्ये गणेशानं अन्देन्दुधवलप्रभम् ॥ शुक्लालंकारसंपन्नं भावयेन्नहर्नि
शं तरं ॥ भारतीन स्य वक्त्राज्जे शास्त्रज्ञावहसुन्दरी ॥ नित्यं प्रकाशते सम्यं दिव्यज्ञानप्र
दायिनी ॥ ॥ अथ वशीकरणं ॥ नाभिवस्थेन गणेशानं सिन्दुरसदृशप्रभं ॥ पा
शांकुशाधरं ध्यात्वा यो जपेन्मंत्रिसत्तमः ॥ अनंगवशसंपन्ना नमन्ते निवरांगनाः ॥ ॥ प

465

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥क्रि॰ङ्गी॥ कारान्तरं ॥ पाशांकुशवराभीतिं हिमकुन्देन्दुसंनिभं ॥ दिग्वस्त्रं चन्द्रवर्णाभं स्फुरन्माणिक्य
॥११॥ मण्डलं ॥ यः स्मरेत्तस्य वश्यगा अवश्यापि वराङ्गना ॥ ॥अथस्तम्भने॥ ॥
विवादे तु गणेशानं ज्वलदग्निसमप्रभं ॥ प्रतिवादिमुखे ध्यायन् प्रजपेन्मनसा मन्त्रं
तन्त्रस्तं स्तम्भयेत्तस्य वादीदीनोपि नान्यथा ॥ ॥अथ सर्वरोगहरणम् ॥ अंतस्तुमा
नं हन्यमेषु शुद्धस्फटिकसंनिभम् ॥ चिन्तयित्वा गणेशानं चिदम्बरसुधारसम् ॥ अभिषिं
चयुरन्धेस्तु सततं धरणीतले ॥ सर्वरोगविनिर्मुक्तश्चिरकालं सजीवति ॥ ॥अ
थविषहरणं ॥ शुक्लवर्णं गणेशानं दशबाहुं महोत्कटम् ॥ शुक्लाम्बरधरं सौम्यं चिन्त(?)
शङ्खामृतनन्दनम् ॥ भावयेत् हृदयाम्भोजे नित्यं निर्मलमानसः मन्त्री गरुडवत् स ॥तंत्रः॥
र्वविषं हरति विषम् ॥ ॥अथ नानाविधकाम्यानि ॥ धनार्थी मधुनानि संव ॥११॥
ष्णापीपायसेहुनेत ॥ घृतेन लक्ष्मीसंप्राप्त्यै हुनेन्नशार्करयानथा ॥ आपूपेश्चापि संपत्त्यै दं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धाचजुहुयात्तथा॥ अनेन चान्नसम्पत्तिर्द्व्यामैसिलितण्डुलैः॥ लवणैरपि त्वना
र घृते वह्निकामसुवे तैसैः॥ सौभाग्यार्थी तथा लाजैः कुसुमैश्चापि मोदनैः॥ ॥
अथ विविधवशीकरणानि॥ वह्निने जुहुयात्तपसे राजानं वशमानयेत्॥ अश्व
त्थोदुम्बरप्लक्षन्यग्रोधजसमिधं हुतात्॥ विप्रक्षत्रियविट्छूद्राः सद्यो वश्याभव
न्ति वै॥ ॥ अथ स्त्रीवशीकरणं॥ स्त्रीणां प्रतिकृतिं कृत्वा पिष्टेन प्रतिवासरम्
॥ साध्यानुकृतिं त्रयं तस्य वशमायाति नान्यथा॥ ॥प्रकारान्तरं॥ जपित्वा तु मंत्रराजं
यथाविधि महेश्वरं॥ दशांशं जुहुयान्मंत्री राजिकालवणेन च॥ तद्भस्म वामह
स्तेन गृहीत्वा नाडयेत स्त्रियं॥ समागच्छति सा नारी मदनानलविह्वला॥ ॥
अथ रिपुस्तम्भनं॥ तद्वच्च प्रयजेद्देवं पीतपुष्पैश्च मंत्रवित्॥ स्तम्भयेत् रिपुसैन्यं
च सामान्यबलवाहनम्॥ प्रतिवादी भवेन्मूको मंत्रस्यास्य प्रभावतः॥ स्तंभयेत्पंचब

466

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥क्रि॰ड्डी॥ यातिनाम्नकार्य्याविचारणा॥ ॥अथशत्रूच्चाटनम्॥ बिभितकसमिधिर्जुनियतंजु
॥१२॥ हुयान्नथा॥ नमयच्चाटयेच्छत्रूनस्वस्थानान्नसंशय॥ मेरुमण्डरजल्यावासापृच्छा
टनेनान्यथा॥ ग्रामसुकृक्षरेवापिइमंत्रान्वानहोमयेन॥ उच्चाटयति वेगेन मातृषेष्ठ
चकाकथा॥ ॥अथमारणं॥ मातृवाच्छिमध्यकीलं सम्यगष्टांगुलीमितम्॥ म
नकेशेनसंवेष्ट्यसहस्राष्टभिमंत्रितम् ज्वलितोद्यवेलायांशत्रुद्वारेखने
द्वि॥ सप्ताहान्मारणेनस्यभवतिनात्रसंशयः॥ ॥अथगणेशयंत्रम्॥ अतःपरंप्र
णुदेवि यंत्रराजंगणाधिपे॥ उत्तमेभूर्जलेप्ने कुंकुमाद्यैः सुपरिलेखने॥ कामक्रोधवि
निर्मुक्तः पूर्वंन्याससंयुतः॥ संपूज्यदेवदेवेशं गणेशं शंकरात्मजं॥ भजेश्चीमेनस्योपरि ॥नं॰त्रः॥
यंत्रराजंसमुद्धरेत॥ कस्तूरीरोचनायंत्रं काश्मीरंचन्दनंरसम्॥ गोसहस्रसंयुक्तेमानं ॥१२
गमदाभिश्रितेः॥ सर्वेशकुसुमैरेभिः ज्ञानमापूर्य्यसंलिखेत॥ लेखन्याहेमधन्यावा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जानिकाष्ठेन ड्वेया ॥ षट्त्रिंशत्कोणमष्टारं द्वादशारं ततः परम् ॥ रुवगोरोचनागाध्यावको
ल्पेपि लिखेद्वहिः ॥ महाभूमण्डले जप्यां तगजाष्टकविभूषितम् ॥ तदाह्ये चारुशोभन्त्र
मण्डलं च ततः शुभं ॥ कर्णिकायां लिखेन्मंत्री ह्स्रौं एतावदेष्टितो ॥ अंगानि चाष्टकोणेषु
लक्ष्मीमंत्रं दलेलिखेत् ॥ द्वादशारे लिखेच्छक्तिं विनायकं सकन्दरं ॥ स्वरपत्रं कला
पत्रे ततश्चाष्टदलाम्बुजे ॥ कादिमातृकरं चापि सर्वपूर्वादितो लिखेत् ॥ पुनः पा
र्श्वकोणेषु वादिशान्तं समालिखेत् ॥ एतन्मंत्रं समाख्यातं न देयं यस्य कस्यचि 467
त् ॥ अणिमाद्यष्टमंत्रैरा चाष्टवाहं प्रपूजयेत् ॥ ॥ अं अणिमायै नमः स्वाहा ॥ लं
लघिमायै ॥ वं व्याप्त्यै ॥ पं प्राकाम्यायै ॥ मं महिमायै ॥ ईं ईशित्वायै ॥ वं वशित्वायै ॥ कं का
मावशायित्वायै नमः स्वाहा ॥ ॥ एवं संपूज्य विधिवन्मंत्री मनया यजेत् ॥ भोजयित्वा
विधानेन नानाविधफलादिभिः ॥ परमान्नपिष्टकैरसैर्दधिदुग्धघृतादिभिः ॥ द्वियगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धूपैर्नैवेद्यैर्दिव्यगन्धानुलेपनैः॥ ऋषिकं पूजयामास नानाविधफलादिभिः॥ ओं मं ऋषिकाय
गणाधिपवाहनाय धर्मराजाय नमः स्वाहा॥ अनेनैव मंत्रेण ऋषिकं पूजयेन्नरः॥ एकदन्ता
य विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात्॥ ॥इति श्रीक्रियोड्डीशे महातं
त्रराजे शिवगौरीसंवादे एकादशः पटलः॥ ११ ॥अथ वशीकरणम्॥ पलाशस्य रो
चनं रजनेन वा साध्यस्य प्रतिमां कृत्वा साध्यहस्तं गर्भं कृत्वा हरितालहरिद्राचूर्णकं पला
द्भिन च निक्षिप्य रक्तासनेन च उपविश्य चतुर्दिक्षु पताकानि विन्यस्य निलपूर्णघटं मध्ये
कृत्वा संस्थाप्य प्राणप्रतिष्ठां कृत्वा पूर्वास्य प्रवालमालया दशसहस्रजपेन प्रयो
गात् सिद्धिर्भवेत्॥ ॥अथ मंत्रम्॥ प्रणवं पूर्वमुच्चार्य मायाबीजं द्वितीयकम्॥ कान्त्व
वस्थाकिनीयुक्तं वामकर्णेन्दुभूषितं नमः॥ ततो मन्मथपदं कुर्यात् चामुण्डे तदनन्तरम्
साधकनामं ततो न्यस्य वशमानय तत्परं॥ वह्निजायावधिर्मंत्रं जपेद्दशसहस्रकम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथान्यत् ॥ चामुण्डे मोहय मोहय अमुकं वशमानय स्वाहा ॥ प्रातः स्नात्वा हविष्याशी जि
तेन्द्रियः शुचिर्भूत्वा प्रातः काल मारभ्य मध्यन्दिनावधि जपसमाप्ते र्दशांशादिक्रमेण
होमादीश्च कारयेत् ॥ जातिपुष्पैर्होमेन वशयेन्नात्र संशयः ॥ कामतुल्यश्च नारी णां रिपू
णां शमनोपमः ॥ यावज्जीवनपर्यन्तं स्मरणं च प्रजायते ॥ ॥ अन्यच्च ॥ श्वेतापराजिता
मूलं पेषयेत् रोचनायुतम् ॥ एतेन मंत्रितं कृत्वा तिलकं कारयेत्ततः
वशयेन्नात्र संदेहः ॥ अथ राजवशीकरणं ॥ रक्तपुष्पेण चामुण्डा पूजा
॥ ध्यानम् ॥ दंष्ट्राकोटिविशंकटा सुवदना सान्द्रान्धकारे स्थिता ॥ खट्वाङ्गासिनिकृन्त दक्षि
णाकरा वामेन पाशांकुशा ॥ श्यामा पिंगलमूर्द्धजा भयकरी शार्दूलचर्मावृता चामुण्डा श
ववाहिनी जपविधौ ध्येया सदा साधकैः ॥ नमः किंशुककुसुमैर्वेकृत्वा फलप्राप्तिः ॥ आद्यन्ते
महतीपूजा पंचदिनप्रयोगेन राजानं वशमानयेत् ॥ ॥ अथ वशीकरणम् ॥ प्रकारान्तरं ॥ 468

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ क्रि॰ड्डी ॥ मृगशीर्षेन्तु संख्यातसुरकाक्षवीरकम् ॥ नुवाकुलं कीलकं नतनमनवपाभिमंत्रितम् ॥ यस्य नाम्नाखवे
॥ १४ ॥ नम्भोलव इमे भवतिध्रुवम् ॥ ॥ ओँ ह्रुं स्वाहा ॥ नन नस्याने यथा संख्यामनुकं नवयनेज
पेन ॥ ॥ इति श्री क्रियोड्डीशे महातंत्रराजे शिवगौरीसंवादे द्वादशः पटलः ॥ १२ ॥
अथ विद्वेषणम् ॥ गृहीत्वा शाल्मलीकाष्ठं निखनेत्तु विदारतः ॥ कलहो जायते नित्यं
– – – – – ॥ ओँ नमो नारायणाय अमुकामुकेन सह विद्वेषं कुरु कुरु स्वाहा
॥ ॥ अथान्यत ॥ परस्परं रिपोर्वैरं मित्रेण सह निश्चितम् ॥ महिषाश्ववरीचार्म्या
गोमूत्रेण समालिखेत् ॥ यद्योर्नाम तयोः श्री ब्रुं विद्वेषं च परस्परम् ॥ ॥ अन्यच्च ॥
रक्तेन महिषाश्वेन श्मशानवस्त्रके लिखेत् ॥ यद्योर्नाम तयोः श्री ब्रुं विद्वेषं च परस्प ॥ तंत्रः ॥
रम् ॥ षट्कोणचक्रमध्ये तु रिपोर्नाम समन्वितम् ॥ मंत्रं ततः प्रवक्ष्यामि महाभैर ॥ १४ ॥
वसंज्ञकम् ॥ ॥ अथ महाभैरवमंत्रः ॥ ओँ नमो भगवति श्मशानकालिके अमुकं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वेषय विद्वेषय हन हन पच पच मथ मथ हूँ फट् स्वाहा ॥ अनेन मंत्रराजेन होमयेत
यत्नतः सुधीः ॥ वह्निकुण्डे निम्बपत्रैः कटुतैलान्वितेन च ॥ प्रज्वाल्य खादिरं वह्निं श्मशान
जं ततः पुनः ॥ ध्यात्वा स्वसंयुक्तं तिल जवाक्षतान्वितं नम ॥ ॥ भावयेत् कालिकां दे
वीं मत्तलीला गमनप्रभाम् ॥ श्यामनीलां महाचण्डां रुण्डरुधिरप्रिय नाशिनीम् ॥ त्रिलोचनीं म
हारावां सर्वाभरणभूषितां नाम् ॥ कपालकर्तृका हस्तां चन्द्रसूर्योपरिस्थितां नाम् ॥ घस्मा
लग्नां चैव ततः प्रेतभैरवकृत नाम् ॥ वसतीं पितृकानने सर्वसिद्धिप्रदायिनीम् ॥ हो
मयेद्विविधैः पुष्पैर्बलिद्रव्यैर्महारवैः ॥ भस्मना तेन मनुना विद्वेषो जायते ध्रुवं मे
मंत्रस्तु ॥ ओं ह्रीं विद्वेषणि अमुकामुकयोः परस्परं विद्वेषणं कुरु कुरु स्वाहा ॥ ॥
अथ उच्चाटनम् ॥ सौरारयोर्दिने ग्राह्यं नराक्ष्थि चतुरङ्गुलं ॥ निशावशाने संलिख्य प्रवान
भवने क्षिपेत् ॥ सप्ताहाभ्यन्तरे शत्रोरुच्चाटनं भवेत् ॥ ॐ अमुकस्य उच्चाटनं कुरु कुरु

469

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥श्रीः॥ स्वाहा॥ ॐ अमुकं हन हन स्वाहा॥ ॥अथस्तम्भनं॥ अमुकस्य मनः स्तम्भय स्तम्भय

॥ १५॥ ॐ फट्॥ ॥अथशान्तिः॥ शान्तिसर्वाभिचारस्य पंचगव्येन जायते॥ सर्वत्र काम्यः प्र

योगे नियमोऽयुतसंख्यकः॥ होमः कर्त्तव्यः॥ १०००० ॥ ॥अथमारणम्॥ महाकृ

त्याप्रयोगं॥ अतः परं महेशानि मारणाघ्नप्तशृणु पार्वति॥ येन विज्ञानमात्रेण क्षुद्रसाध्यं भव

ेन्नये॥ हड्जायाम महायोगिन्यतो गौरी पदं वदेत॥ भवनभयं करीति पदं वस्मात्रिमे

चरेत्मनुम्॥ अथवा॥ प्रथमं नदन्यमथान्तो ब्रह्मणः पदम्॥ षट्दीर्घयुक्तवीजेन भंग

मंत्रेण योजना हृदयं च नतोऽङ्गेन धर्मात्रिणाशिरः क्रमात्॥ शिखाकवचनेत्राण्येवम

वन्यासक्रमः स्मृतः॥ अंगिरा ऋषिर्देवि गायत्री छन्द ईरितम्॥ सिंहवक्त्रा त्वभूता ॥मंत्रः॥

नां भयं करि रायनः पदम्॥ महाकृत्या देवता च इत्युक्त्वा न्यासमाचरेत॥ ॥ध्यानम्॥ ॥१५॥

सिंहाननां कृष्णाम्बरां लिम्बमानपयोधराम्॥ दंष्ट्राकरालवदनां त्रिनेत्रां सर्पभूषणलाम्॥ ले

कृष्णकांचि संवीतां बिंधुमात्रिसमप्रभां १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेहानमजिह्वांविद्युतपुंजसुभीषणाम् ॥ त्रिशूलखड्गमुशलखट्वांगकरपंकजाम् ॥ ले
लेहानमजिह्वांविद्युतपुंजसुभीषणाम् ॥ ध्यात्वा कन्यांविधानेनपूजयेन्मंत्रवित्तमः ॥
ध्यात्वा कन्यामर्च्चयेनरक्तैःपुष्पैश्चवस्त्रैः ॥ कृष्णांमीरणांकन्येषुमालांकालसर्वैःसनाम्
कन्यांचमहानांजमायेश्वद्वादिनींतथा ॥ भीषणांश्रीमतींचैवघणनिनांचततःपरम् ॥ वि
धामर्च्चयेद्देवपद्येषुनामशः।सुलोचनाम् ॥ पूर्वेतुशांकरीनामधूम्रवर्णांवराम्बिनाम्
द्विभुजांसौम्यवदनांपाशांकुशधरांशिवाम् ॥ दक्षिणेभीषिकानामलम्बजिह्वांसुधामुखी
म् ॥ कृष्णावर्णांरक्तमुखींरक्तमाल्यानुलेपनाम् ॥ चतुर्भुजांसिंहनादांमहाघोरांकपालिनीम् ॥
खड्गहस्तांविरोमालांसर्वाभरणभूषिताम् ॥ पश्चिमेवारुणीनामस्वर्णवर्णांहसन्मुखीं ॥ मु
ण्डमालिकांशुभ्रांदंष्ट्राभयदांसदा ॥ उत्तरेभीमिकानामचतुर्भुजांभयंकरीम् ॥ पूज
यित्वाजपन्मंत्रंनिम्यमष्टोत्तरंशतम् ॥ भवाप्यविनियोगस्तुकर्त्तव्योमंत्रिणासदा ॥ काले

470

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि॰ तं॰ ॥ विद्ध्वा प्रतिमां मध्ये छिद्रेण कारयेत् ॥ शास्मांगलवं शत्रोर्नखलोमसमन्वितम् हृदयेनाभवेद्यं
॥ १९ ॥ चफट्कारं च सर्वमेकं ॥ अन्यभाग्यानप्रतिमाप्यमरिचैर्लेपयेत्ततः ॥ मनश्रा लेखा च रणाल
केशाभ्यां पादयोः पृथक् ॥ वस्त्राकारं करमये मोरगो चाप्यधोमुखम् ॥ तस्याधोमेरपलाकुलं
त्रिकोणं तत्र कुण्डकम् ॥ तत्र स्तारं विधायाग्निं परिस्तीर्य शरैस्ततः ॥ विभीतकं परीधाय
कल्पयेत्पश्यमारणं ॥ जुहुयाच्चितैलाक्तैः काकोलूकमपक्षकैः ॥ दारयेनं शोषयेनेमा
रयत्वभिधायच ॥ अश्नोतरशनेनैव मनुना विधिना ततः होमानेविधिवत्कृत्वा यासे
अमेश्च सन्निधौ ॥ योमेकश्चिनद्विषयेति हृदस्थो वास्तिकेऽपि च ॥ पिचकृत्येऽपकेनस्प ॥ तंत्रः ॥
कुमितु [illegible] निवेदयेत् ॥ सरश्याग्निं विधानेन नवरात्रं समाचरेत् ॥ कुनेनयावन्नावदस्य ॥ १९ ॥
भवेद्वैरिपोमतिः ॥ अर्कक्षीरे च मरिचं पिष्ट्वा सिद्धार्थमेव च ॥ जलेमं लोड्य मंत्रेण
रिपुं ध्यात्वा निरुद्धहृत् ॥ कुम्भान्वयोनीयान्नपादेनाक्रम्य नन्दिभम् ॥ वज्रं भ्रलमिमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धान्यानस्योपरि तु निक्षिपेत् ॥ नवरात्र परे शत्रुर्म्रियते नात्र संशयः ॥ ॥ अथ वटुक
भैरवप्रयोगः ॥ अतः परं महेशानि शृणुष्व कर्मसिद्धिदम् ॥ वटुकं विमलाज्ञाख्यं पूजये
न् षट्कर्मसु ॥ आचम्य स्वस्तिवाचन सूक्तं पठित्वा ॥ भैरवं च शिरः पश्चिमे गुरुं
करुणामयम् ॥ ॥ संकल्पः ॥ अद्येत्यादि अमुकगोत्रा अमुकनाम्न्याहं रिपोपशमनपूर्वक
रोग्याद्युद्धिकामो गणेशादि पूजापूर्वक वटुकपार्थिवशिवपूजनमहं करिष्ये ॥
शान्तिकादौ ॥ एतिं च पूजयेत् सादौ भद्रपालं ततः पुनः ॥ रुद्रं च पूजयेद्देवि ध्यानं शृणु
महामते ॥ ॥ प्राणायाम ॥ ध्यानं ॥ शूलहस्तं महारौद्रं सर्वविघ्ननिसूदनं ॥ पू
र्णचन्द्रसमाभासं रुद्रं वृषभवाहनम् ॥ एवं ध्यात्वा महाकालीं पूजयेत् रुद्रदेवतम् ॥
नारायणं रुद्रायनमः ॥ इति ॥ भक्तियोगतः ॥ शतमोलकपरिमितलिंगमानीय काश्य
पादौ लिंगं संस्थाप्य सामान्यार्घ्यं ततः कृत्वा भूतशुद्धिं महेश्वरि ॥ प्राणायाममंगन्यासंप

५४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कि·डी ॥ ठन्यासं समाचरेत् ॥ ॥ ततः करन्यासः ॥ ततो देहन्यासः ॥ यथा मूर्ध्नि ओं भैरवाय नमः
॥ १ ॥ ॥ एवं ललाटे भीमदर्शनाय ॥ नेत्रयोः ॥ भूताश्रयाय ॥ मुखे तीक्ष्णदर्शनाय ॥ कर्णयोः क्षेत्र
पाय ॥ हृदि क्षेत्रपालाय ॥ नाभिदेशे च क्षेत्राख्याय ॥ कट्यां सर्वाघनाशनाय ॥ ऊर्वोः त्रि
नेत्राय ॥ जंघयोः रक्तपाणिकाय ॥ पादयोः ॥ देवदेवेशाय ॥ सर्वांगे वटुकाय ॥ ॥
करांगन्यासम् ॥ ओं ह्रीं वां अंगुष्ठाभ्यां नमः इत्यादि ॥ ओं ह्रीं वां हृदयाय नमः इत्यादिः त
तो मूलेन व्यापकं कृत्वा ध्यायेत् ॥ ओं वन्दे बालं स्फटिकादिः संपूज्य ॥ द्वात्रिंशदक्षर
मेव जपेदेकादशसहस्रकम् ॥ अभिषेकं तर्पणं च यथाविधानपूर्वकम् एषा
शान्तिमहाशान्तिः कथिता नवभक्त्या ॥ ॥ अथ वशीकरणम् ॥ ॥ पूर्ववत् सं ॥ नं·ः ॥
कल्प्य ॥ राजसध्यानेन ध्यात्वा ॥ ओं उद्यद्भास्करादि ॥ ॥ अथ स्तम्भनं ॥ अत्र ॥ ७ ॥
पं महादेवि पूजनं कुरु कर्मणि ॥ पूर्ववत् संकल्प्य ॥ विद्वेषणोच्चाटनादि च कुरु कर्मणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्यानं ॥ यथा ध्याये नीलाद्रिकान्तमादि ॥ ध्यात्वा पूज्य शिवसंख्य सहस्र संख्याकमनु
मुक्तं ॥ ओं वे अमुकं वशमानय स्वाहा ॥ इति मंत्र जपकर्माहं करिष्ये ॥ ॥ यंत्र पू
जाक्रमः ॥ पुनः ध्यात्वा यंत्रे पुष्पं निधाय आवाहनादिकं कुर्यात् ॥ यथा ॥ तत्र क्रमः ॥
मूलादि सद्योजातं मंत्रे णावाहनं ॥ यथा मूलं ॥ ओं सद्योजातं प्रपद्यामि सद्योजाता
य वै नमः ॥ भवे भवे नादि भवे भजस्व मां भवोद्भवाय वै नमः ॥ पिनाकधृक् इहा
गच्छ इहागच्छ पुनर्मूलमुच्चार्य ॥ ओं वामदेवाय नमः ॥ ज्येष्ठाय रुद्राय का 472
लाय कलविकरणाय बलविकरणाय बलप्रमथनाय ॥ सर्वभूतदमनाय नमो
नमः ॥ उन्मनाय नमः ॥ इह तिष्ठ इह तिष्ठ ॥ मूलं इह सन्निधेहि ॥ ॥ अघोरे
सन्निरोधं नम ॥ पुनर्मूलं ॥ ओं अघोरेभ्योऽथ घोरेभ्यो घोर घोरतरेभ्यः सर्व
सर्व सर्वेभ्यो नमोस्तु ॥ रुद्ररूपेभ्य इह सन्निरुद्ध्यस्व ॥ तत्पुरुषेणायो निरुध्यस्व दर्श

॥ श्री ३ ॥ नमः ॥ पुनर्मूलं ॥ ओं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ इति योनि
॥ १८ ॥ मुद्रां प्रदर्शयेत् ॥ ईशानेनावगुण्ठनमिति पुनर्मूलं ओं ईशानः सर्वविद्यानामीश्वरः सर्वभू
तानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवः ॥ ओं शिवं वन्दयामि न
मः ॥ ततः प्राणप्रतिष्ठा ॥ ओं ह्रीं क्रों हंसः बटुकाख्यनः व पशुपतेः ध्रुल पाशाः प्राणा
इह प्राणाः ॥ जीव इह स्थितः ॥ सर्वेन्द्रियाणि ॥ हस्त्रनक्षत्रः श्रोत्रघ्राणप्राणाः इहाग
त्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ इं इत्यवगुण्ठ्य ॥ वमिति धेनुमुद्रयामृतीकृत्य छोटिका
भिर्दिग्बन्धनं कृत्वा षडङ्गानि संपूज्य देवं पूजयेत् ॥ मूलमुच्चार्य पतत्पाद्यं ॥ ओं महादे
वाय सोममूर्तये बटुकाख्याय पशुपतये शिवाय नमः ॥ एवं क्रमेणार्घ्याचमनीयादि ॥ नं ॥
कं दद्यात् ॥ स्नाने तु विशेषः ॥ यथा अद्येत्यादि अमुकस्याशेषाशुभनिवृत्तिपूर्वकमायु ॥ १८ ॥
हरिद्रोपशमनारोग्याद्यर्थं द्विकाम्यनयासमतनोलकपालिनिवृद्ध्येन बटुकाख्यकप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्पेनैर्लिंगं स्नापयित्वा ॥ तुल्यं एष गन्ध ओं महादेवाय सोममूर्त्तये नमः ॥ पुष्पेतु अघोरेणा
ह्दि उन्नवन् ॥ कामनया वटुकात्मकपशुपतये शिवाय अघोरेन्तर ज्ञानज्ञेणा पुष्पमहं सं
प्रददे ॥ मूलत्रयार्घ्य ओं महादेवाय सोममूर्त्तये नमः इतिमंत्रेणा एकं एकं कृत्वा दद्या
न् ॥ एवं बिल्वपत्रे मधुपर्कं धूपदीपेतु गन्धवत् ॥ नैवेद्ये अघोरेणादि स्नानीयवत् का
मनया एतत् सोपकरणं घृतनीलकपरिमितान्नपत्रतण्डुलनैवेद्यं वटुकात्मकपशुप
तये शिवाय तुभ्यमहं संप्रददे ॥ ओं महादेवाय सोममूर्त्तये नमः ॥ घृतनीलकपरिमित 473
संविशाचूर्णं पानीयं ताम्बूलं च पूर्ववत् संकल्प्य दद्यात् इति ॥ ॥ वशीकरणे
चैमूलमूत्रार्घ्यं ॥ ओं भवाय जलमूर्त्तये वटुकात्मने शिवाय नमः एकं कमेण पूजयेत्
एवमाचमनीयं दद्यात् ॥ स्नानेतु ॥ अघोरेणादि ॥ अद्य कस्यामुक वशीकरणार्थं
घृतनीलकपरिमितघृतेन मधुना वा वटुकात्मकपशुपतिशिवलिंगं स्नापयामि ॥ मूल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥क्रिं ह्रीं॥ मुच्चार्य्य हस्तगन्धं ओँ भवाय जलमूर्त्तये नमः॥ गन्धं॥ अद्येत्यादि अमुकस्यामुक वशीकर
॥१९॥ णार्थं अशोकरक्तकरवीरपुष्पं बटुकात्मने पाशुपतास्त्र वायाहं संप्रददे॥ मूलमुच्चार्य्य
हस्तद्रोणपुष्पं ओँ भवाय जलमूर्त्तये नमः॥ नैवेद्यं॥ अद्येत्यादि॥ अमुकस्यामुक वशी
करणार्थं घृततोलकपरिमितसोमपक्वान्नं नैवेद्यं॥ ओँ बटुकात्मक पाशुपतास्त्र वाया
हं सम्प्रददे॥ मूलमुच्चार्य्य हस्तसोमपक्वान्नघृततोलकनैवेद्यं समर्पितानुरोच॥ ओँ
भवाय जलमूर्त्तये नमः॥ ततः पानार्थोदकं आचमनीयं ताम्बूलं च दद्यात्॥ ततोऽष्टा
वरणां पूजयेत्॥ ततोऽष्टमूर्त्तीन् पूजयेत् ततो मूलेन पुष्पाञ्जलित्रयं दत्त्वा संकल्पादि
वसहस्रसंख्याकेन मंत्रं जपेत् शान्तिकादौ क्रूरकर्मेऽपि॥ ततस्तस्रो दिनाजपं समाप्य ॥ तंत्रः॥
स्तोत्रादिकं पठेत्॥ ततो बलिदानं॥ यथा मूलमुच्चार्य्य बटुकभैरवाय हस्तबलिर्नमः॥ भैरव ॥१९॥
परिवारगणेभ्यः सह मम शत्रून् सरुधिरं पिब पिब इमं बलिं गृह्ण गृह्ण स्वाहा॥ ओँ॥ शत्रुप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भस्मनाधिरं पिष्टान्नं च दिने दिने ॥ भक्षयत्स्वगणैः सार्द्धं सारमेयसमन्वितम् ॥ गन्धोविहित
द्रव्यैः ॥ अष्टोत्तरशतं सहस्रं वा होमयेत् ॥ ॥ वशीकरणेन घृताक्तराजिकामिर
चेन सह स्व होमः ॥ शान्त्यर्थं पूर्वादिकं डुरकर्माणि विल्वपत्रम् ॥ उच्चाटनेन ओं ह्रां
ओं ह्रूं शिवाय स्वाहा ॥ इति विशेषः ॥ इति श्रीलंबटुकात्मक पशुपतये शिवाय युतभाम
हं सं प्रदद्धे ध्येनलघ्पे लवणापिनि ॥ ॥ इति श्रीक्रियोड्डीशे महातन्त्रराजे उमा
महेशसंवादे त्रयोदशः पटलः ॥ १३ ॥ अथ षट्कर्माणि कवचम् ॥ शत्रुमर्द
नं ॥ ॥ श्रीदेव्युवाच ॥ श्रुतं बटुकमाहात्म्यं पूर्वं विस्मयकारकम् ॥ इदानीं श्रो ५७५
तुमिच्छामि कवचं षट्कर्मणां ॥ ॥ श्रीश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि यस्मात्त्वं
परिपृच्छसि ॥ श्रवणान् पठनाद्वापि शत्रुनाशाय तत्क्षणात् ॥ श्रीदेव्युवाच ॥ त्रैलोक्य
मोहनाख्यं कवचं मे प्रकाशय ॥ त्रैलोक्य शत्रुसंघं तु नाशितं यः क्षमो भवेत् ॥ एवमुक्तो म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि॰त्री ॥ हादेवः क्रोधभूत्वा जगत्पतिः ॥ देवीं प्रबोधयामास ॥ ॥ श्रीमहादेव उवाच ॥ नारी भूत्वा
॥ २० ॥ कथं शुभे ॥ पराजितो महादेवि नमस्तेजायते सति ॥ श्रीदेव्युवाच ॥ जिघांसनं जिघांसीया
न तेन खलु हा भवेत् ॥ येयथा मां प्रपश्यन्ते कृ निरालिप्ततनी ॥ यदि ते करुणा देव दयाहि
कथ्यतां मयि ॥ शत्रूणां प्राणनाशार्थं उच्चाटन वशीकृतौ ॥ तेषां हि कृत नाशार्थं सर्वदाप्र
रतानरः ॥ ॥ श्रीईश्वर उवाच ॥ शृणु देवि महाभागे कालाग्निप्रणव शुभे ॥ यस्यधा
रणमात्रेण शत्रूणां नाशनं भवेत् ॥ धृत्वा तु पादमूलेन स्वस्थाना सहसाकरोत ॥ शर
णागतमामंत्रं नाशितं नैव शक्यते ॥ शृणु देवि महाभागे मां वधानावधारय ॥ शत्रूणां
प्राणनाशार्थं जपितः कालरूपः ॥ दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ॥ कोटि सू ॥ तंत्रः ॥
र्यप्रभा काली मम शत्रून् विनाशय ॥ नाशयित्वा स्मरणं देवि अन्यशत्रुं विनाशय ॥ क्रीं क्रीं क्रीं उग्र ॥ २० ॥
प्रभे विकटदंष्ट्रे परपक्षं मोहय मोहय पच पच मथ मथ दह दह हन हन मारय मारय येमां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिलिनुसुघनायोगिनीचक्रैस्तान्वारयवारयछिन्दिछिन्दिभिन्दिभिन्दि करालिनि ग्लूं
ग्लूं ओं क्रींक्रींक्रींक्रीं स्फुरस्फुर घरघर घनघन ज्वलज्वल धकधक धमधम मारय
मारयसर्वजगद्वशमानय एँ नमः स्वाहा ॥ ॥ इतितेकवचं देवि भद्रकल्याः प्रको
दितम ॥ भूर्जेविलिखितं चैतत स्वर्णस्थं धारयेतयदि ॥ शिखायां दक्षिणे वा हौ कं
ठेवाधारयेतयदि ॥ त्रैलोक्यं मोहयेत क्रोधात त्रैलोक्यं चूर्णयेत क्षणात ॥ पुत्रवान
धनवान धीमान नानाविद्यानिधिर्भवेत ब्रह्मास्त्रादिनि शस्त्राणि ततगात्रस्पर्शना
ततः ॥ नाशमायान्ति शत्रवो रजनेन प्रधारितम ॥ मासमात्रेण शत्रूणां महाविपद्दका
रणम ॥ यंयं शत्रुं स्मरन्मर्त्य कवचं पठनिश्चयम ॥ तंतंनाशयते सद्य स्तोष्यं नेन द्दशाम्प
हं ॥ धारणेभजते शत्रुः कण्ठशोषं सदा भवेत ॥ छन्नकर्मो जायते तावत यावत्स्यकृपा न
चेत ॥ ॥ इतिश्रीकिम्मोड्डिशेमहातंत्रराजे देवीश्वरसंवादे शत्रुमर्द्दनं नाम कवचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ क्रिं॰ श्री ॥ समाप्तं ॥ ॥ अथ रिपुनाशकवचं ॥ ॥ श्रीईश्वर उवाच ॥ त्रिकालं गोपितं देवि
॥ २१ ॥ कलिकाले प्रकाशितम् ॥ नवकल्पखंडरूपं नवस्नेहा नप्रकाशने ॥ कालीदिगंबरीदेविज
गन्मोहनकारिणी ॥ तंत्र राज्यमहादेवि त्रैलोक्यमोहनं त्विदं ॥ ॥ अस्य महाकालभै
रव ऋषिरनुष्टुप्छंदः श्मशानकालिका देवता सर्वमोहने विनियोगः ॥ ऐं क्लीं क्रौं क्रंः
स्वाहा विवादे पातु मां सदा ॥ क्लीं दक्षिणाकालिका देवतायै समानध्येजयप्रदा ॥ क्लीं
क्लीं श्यामांगिन्यै शत्रुं मारय मारय ॥ ह्रीं क्रीं क्रीं क्रीं त्रैलोक्यं वशमानय ॥ ह्रीं श्रीं क्लीं मां
रक्ष रक्ष विवादे राजगोचरे ॥ डाकिनं शत्र्वक्षरी प्रबलसर्वत्र रक्षमां सदा ॥ कवचे वर्जि
तं यत्र तत्र मां पातु कालिका ॥ सर्वत्र रक्षमा देवि श्यामास्तु मम स्वरूपिणी ॥ इ ते थांपर ॥ तंत्रः ॥
मं मोहं भवतं भाग्ये प्रकाशितं ॥ सदा यस्तु पठेद्वापि त्रैलोक्यं वशमानयेत् ॥ इदं कवच ॥ २१ ॥
महात्वा पूजयेत्घोररूपिणीम् ॥ सर्वदासमहाव्याधिपीडितो नात्र संशयः ॥ अल्पायुः सभ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेतालेगी कथितं तव नारद ॥ धारणं कवचस्यास्य भूर्जपत्रे विशेषतः ॥ सर्वतंत्रः कवचं धृत्वा
हृष्टासिद्धिः प्रजायते ॥ ॐ काश्मलि रेवन्मंत्री धारयेत स्वर्णपत्रके ॥ कवचस्यास्य मा
हात्म्यं नाहं वक्तुं महात्मने ॥ शिखायां धारयेत योगी फलार्थी दक्षिणे भुजे ॥ इदं क
ल्पद्रुमं देवि तव स्नेहात् प्रकाशितं ॥ गोपनीयं प्रयत्नेन पठनीयं महामुने ॥
श्रीविशुरुवाच ॥ इत्येवं कवचं नित्यं महालक्ष्मिप्रपद्यताम् ॥ अवश्यं वशमायाति
त्रैलोक्यं सचराचरम् ॥ शिवेन कथितं पूर्वं नारदे कलहास्पदे ॥ नतयाचान्नारदेना
पि मोहितं सचराचरम् ॥ ॥ इति शत्रुनाशकवचम् समाप्तं ॥ ॥ इति श्रीसि
योड्डीशे महातंत्रराजे पार्वतीपरमेश्वरसंवादे चतुर्दशः पटलः ॥ १४ ॥ अथ स
र्वरक्षाकरकवचम् ॥ ॥ श्रीदेव्युवाच ॥ भगवन् देवदेवेश सर्वाम्नायप्रपूजित ॥
न त्वमे कथितं देव कवचं न प्रकाशितम् ॥ प्रासादाख्यस्य मंत्रस्य कवचं मे प्रकाशय ॥ स

470

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥कि·भ्री॥ वरस्मात्कं देव यदि स्नेहोस्ति संप्रति॥ ॥श्रीभगवानुवाच॥ प्रासादमंत्रकवचस्य वामदेव ऋ
॥२२॥ षिः पंक्तिछंदः सदाशिवो देवता साधकाभीष्टसिद्धये विनियोगः उकीर्त्तितः॥ शिरो मे सर्वदा
पातु प्रासादाख्यः सदाशिवः॥ षडक्षरस्वरूपो मे वदनं च महेश्वरः॥ पंचाक्षरात्मा भगवान्भु
जौ मे परिरक्षतु॥ मृत्युंजयस्त्रिबीजात्मा आयू रक्षतु मे सदा॥ वटमूलसमासीनो दक्षिणा
मूर्त्तिरव्ययः॥ सदा मां सर्वतः पातु षट्त्रिंशद्वर्णरूपधृक्॥ द्वाविंशार्णात्मको रुद्रः कुक्षौ मे प
रिरक्षतु॥ त्रिवर्णात्मा नीलकण्ठः कण्ठं रक्षतु सर्वदा॥ चिन्तामणिर्बीजरूपे सर्वनारी
श्वरो हरः॥ सदा रक्षतु मे गुह्यं सर्वसंपत्प्रदायकः॥ एकाक्षरस्वरूपात्मा कूटरूपी म
हेश्वरः मार्त्तण्डभैरवो नित्यं पादौ मे परिरक्षतु॥ ओमित्याख्यो महाबीजस्वरूपस्त्रि ॥तंत्र॥
पुरान्तकः॥ सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः॥ ऊर्द्धमूर्द्धानमीशानो मम रक्षतु ॥२२॥
सर्वदा॥ दक्षिणास्यां तत्पुरुषो अव्यान्मे गिरिनायकः॥ अघोराख्यो महादेवः पूर्वस्यां प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिरक्षतु ॥ वामदेवः पश्चिमस्यां सततमे परिरक्षतु ॥ उत्तरस्यां सदा पातु सद्योजातस्वरूप
धृक् ॥ इत्थं रक्षाकरो देवि कवचं देवदुर्लभम् ॥ प्रातःकाले पठेत् यस्तु सोऽभीष्टफल
माप्नुयात् ॥ पूजाकाले पठेत् यस्तु साधकः [illegible] दक्षिरोगजे ॥ देवा मनुष्या गंधर्वा वश्या
स्तस्य न संशयः ॥ कवचं शिरसि यस्तु धारयेत् ॥ [illegible] ॥ तस्य तुष्टा नवः ॥ करस्थानस्य
देवेशि अणिमाद्यष्टसिद्धयः ॥ स्वर्णपत्रे [illegible] त्रिमो विद्यां गुग्गुलपदेन वेष्टितां
रजतोदरसंविष्टां कृत्वा च धारयेत् सुधीः ॥ संप्राप्य महतीं लक्ष्मीमन्ते चाशिव
रूपधृक् ॥ यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ॥ शिष्याय भक्तियुक्ताय साधकाय प्र
काशयेत् ॥ अन्यथा सिद्धिहानिः स्यात् सत्यमेतन्मनोरमे ॥ तव स्नेहान्महादेवि कथितं कव
चं शुभम् ॥ न देयं कस्यचिद्भद्रे यदीच्छेदात्मनो हितं ॥ योऽर्चयेत् गन्धपुष्पाद्यैः कवचं मन्मुखो
दितम् तेनार्चिता महादेवि सर्वे देवा न संशयः ॥ इति रक्षाकवचं समाप्तं ॥ ॥ इति श्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियोड्डीशेमहातंत्रराजेउमाशिवसंवादे पंचदशः पटलः ॥ १५ ॥ अथत्र्यम्बकमृ
त्युंजयमंत्रः ॥ श्रीदेव्युवाच ॥ इदानीं श्रोतुमिच्छामि पूर्वसूचितं च त्र्यंबकम् ॥ ब्रूमे
द् कथितं देव मानिमृतसंजीवनी ॥ श्रीईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि यस्मा
त्त्वं परिपृच्छसि ॥ - - - - - तिमृतांमम्वागर्भजातायतो हरः ॥ अतस्त्र्यम्ब
कनामकः ममनाममहेश्वरि ॥ वशिष्ठोस्य ऋषिः प्रोक्तः छन्दोनुष्टुबुदाहृतः ॥ देवता
स्तस्मुद्दिष्टः त्र्यम्बकः पार्वतीपतिः ॥ विनियोगो मंत्रवर्णैः षडंगानां च कल्पनम् ॥ त
तस्तु वह्निबीजेन समन्ताज्ज्वलधारया ॥ प्राचीरं चिन्तनं कुर्यात् ततः संकल्पमाचरे
त् ॥ पुनः संकल्पदेवेशि भूतशुद्ध्यादिकं चरेत् ॥ ततः पश्चात्करन्यासं कुर्याच्च मम
सुन्दरि ॥ त्र्यम्बकं अंगुष्ठाभ्यां नमः ॥ यजामहे तर्जनीभ्यां स्वाहा ॥ सुगन्धिं पुष्टिवर्द्धनं मध्य
माभ्यां वषट् ॥ उर्वारुकमिव बन्धनात् अनामिकाभ्यां हूं ॥ मृत्योर्मुक्षीय कनिष्ठाभ्यां वौषट् ॥ मामृतात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कारतलपृष्ठाभ्यां फट् ॥ एवं हृदादिषु ॥ ततो द्वाविंशन्मंत्रवर्णान्न्यसेत् ॥ पूर्वपश्चिमया
मोन्नतेषु वक्त्रेषु ४ उरोगलोरुसि २ उन्नाभि हृत्पृष्ठककुत्सु ४ लिंगपायुकृन्मूलान्तेद
जानुयुग्मे २ गुल्फयोर्युग्मे २ स्तनयोः २ पार्श्वयोः २ पादयोः २ पाण्योः २ नासिकायोः २
शीर्षे १ मंत्रवर्णान्न्यसेन्क्रमात् ॥ पुनस्ततः पादन्येकादशस्थानेन्यसेत् ॥ शिरो १ ऽक्षि
युगला १ स्यि १ वक्त्रे १ गलयुग्मे १ ओं हृदये १ जठरे १ उनः उरो १ रु १ जानु १ पादेषु न्या
सवेयं समाचरेत् ॥ ततङ्कं ध्यानेन ध्यात्वा मानसैः संपूज्य विधिवार्घ्यं संस्थाप्य पीठोक्तप्र
जावाहनादिकं पंचपुष्पाञ्जलिं दत्वावरणं पूजयेत् ॥ सर्वकं रुद्रायनमः ॥ एवं द्रुद्रं व
भूम्यै जलाय वह्नये वायवे व्योमाय यजमानाय ॥ तद्बाह्ये पूर्वादितः ओं रमायनमः ५७८
ओं राकायैनमः ॥ ओं प्रभायैनमः ॥ ओं ज्योत्स्नायैनमः ॥ ओं पूर्णायैनमः ॥ ओं उषायैनमः ॥
ओं पुषायैनमः ॥ ओं स्वधायैनमः ॥ ओं विश्वायैनमः ॥ ओं विद्यायैनमः ॥ ओं सितायैनमः ओं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि॰री ॥
॥ २४ ॥

ल्यै नमः ॥ ओं भद्रायै नमः ॥ ओं सावित्र्यै नमः ॥ ओं सन्ध्यायै नमः ॥ ओं दिव्यायै नमः ॥ ओं निद्रायै
नमः ॥ न वाहये ॥ ओं आर्यायै नमः ॥ ओं आद्यायै नमः ॥ ओं प्रज्ञायै नमः ॥ ओं मेधायै नमः ॥ ओं का
न्त्यै नमः ॥ ओं शान्त्यै नमः ॥ ओं तुष्ट्यै नमः ॥ ओं पुष्ट्यै नमः ॥ ओं धृत्यै नमः ॥ ओं स्मृत्यै नमः ॥ न
तो धूपादि विसर्जनान्तं कर्म समापयेत् ॥ ॥ उपयोगमनुष्ठाने धारे ऊ जेवा अश्वत्थमूले प
द्मासहस्रं जपेत् ॥ पुरश्चरणविधानेन कुर्यात् सर्वं महेश्वरि ॥ साक्षाल्लक्ष्मीर्भवेच्चे
न किमन्यत् परिकाङ्क्षया ॥ अयुतं जुहुयान्मन्त्री चतुःस्थण्डिलविधानतः ॥ द्विसहस्रं
दुर्वाङ्कुरैर्जवाभिः करवीरकैः ॥ बिल्वपत्रं पलाशं च कृष्णापराजितां तथा ॥ वटवृक्षस्य
समिधं जुहुयाद्युगनावधि ॥ धनधान्यसमृद्धिः स्यात् सत्यं सत्यं महेश्वरि ॥ ॥ पुनः पर ॥ गं॰ ॥
म गुह्यं देवि स्वमन्त्रं कथयाम्यहं ॥ तत्सवितुर्वरेण्यं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्ध ॥ २४ ॥
नं ॥ भर्गो देवस्य धीमहि उर्वारुकमिव बन्धनात् धियो यो नः प्रचोदयात् ॥ मृत्योर्मुक्षीय मामृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नात् ॥ गोपनीयं गोपनीयं सत्यं सत्यं महेश्वरि ॥ ॥ अथ मृतसंजीवनी विद्या ॥
अतः परं प्रवक्ष्यामि मृतसंजीवनीं तथा ॥ भाले तारा द्वे बीजं तद्वत् मन्त्रिहरं तारकेण
हृतिं च प्रोच्चार्य त्र्यम्बकं योजयेत् चरतं संपुटं अनुलोमम् ॥ त्र्यम्बक मृत्युंजयमं
त्रस्य जपात् सर्वसिद्धिर्भवति ॥ एतन्मंत्रं जपेद्यस्तु व्याधिमुक्तो भवति निश्चितम् ॥ ध्या
नं प्रवक्ष्यामि महादेवि ॥ स्वच्छं स्वच्छारविन्दं स्थितमुभयकरे संस्थितौ पूर्णकुंभौ ॥ द्वाभ्यां
हेलाक्षमाले निजकरकमले द्वौ घटौ नित्यपूर्णौ ॥ द्वाभ्यां तौ च स्रवन्तौ शिरसि शशि
कलाचामृतौ प्लावयन्तम् ॥ देहं देवो दधानं विदितमुविशदा कल्पजालैः श्रियं वः ॥ एवं
ध्यात्वा त्र्यम्बकाय महारुद्राय नमः ॥ महाघोरं यदि तदा पूजयेत् परमेश्वरम् ॥ ततः सु
रसुन्दरीत्यादि योगिनी साधनम् ॥ ततो भूतिनी साधनम् ॥ ॥ अथ भूतिनी साधनम् ॥ श्री
देव्युवाच ॥ श्रुतं योगिनी साधनं भूतिनी साधनोत्तमं ॥ तद्वदस्व महादेव कृपया यदि मे

479

॥ क्रिशुी ॥ नि ॥ ॥ श्रीईश्वर उवाच ॥ आद्याविभूषिणीदेवी पराकुराउलधारिणी ॥ हारिणी सिंहि
॥ २५ ॥ नी चैव हंसिनी च ततोनटी ॥ कामेश्वरी तथा ओंकारेति देवी नतः प्रिया ॥ इत्येते नाहि म
हत्त्वाः साधकानां भवावहाः ॥ ॥ अथ आद्याविभूषिणी साधनम् ॥ यथामंत्रं महेशा
नि आद्याविभूषिणी तथा ॥ मंत्रः हूँ फट् फट् क्रौं भूतिनी हूँ हूँ हूँ ॥ क्रोधा ख्वमंत्रं माया
विभूतिनी चाष्टिजर्वनः ॥ अथवा भूतराजदेवेशि ॥ ओं ह्रीं ह्रीं फट् फट् विभूषिणी हूँ हूँ
नारं नन्त्रा ह्वया ख्व द्वयं विभूषिणी क्रोधद्वयम् ॥ ॥ अथ ध्यानम् ॥ ॥
कर्त्री चैककरे धृता असि तथा धारणी ॥ उत्तुंगकुम्भस्तनी हृदि लोलितभूषणा द
नातनगनमोसर्घाणि तचर्वितरसा ॥ संसिक्त भूतिनी तथा ॥ कालस्यामलरसालवि ॥ तंत्रः ॥
टपवालम्बित मस्त्रकक्षमा यस्याः केविपुलायतादिवलम्बही सैलं तुषारसनु ॥ ध्यानं ॥ २५ ॥
वभनलेन अक्षयामि ध्यानं दिवसत्रयं ॥ जपे दश सहस्रं तु ध्यायेद्वैकाग्रमानसः जपान्ते च म

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हापूजां पुनर्धूपं निवेदयेत ॥ चन्दनोदकमिश्रेण दत्वार्घं तु ष्पानिकवम् ॥ माता वा भगि
नी भार्य्या दुहिता भवति कामिता ॥ कामलकुलतो कृत्वा मानानं त्वा जगत्त्रयम् ॥ ज्ञाताश्चप
रिवारस्य दत्वान्यजनम् अणाम् ॥ भगिनी चेत् महाभागा सहस्त्रयोजनादपि ॥ दद्या
ति स्त्रिरमानीय दिव्यां लंरसायनम् ॥ भार्य्या चेत् पञ्चमारोप्य स्वर्गं प्रयाति नित्यश
:॥ दीनाराणां सहस्रन्तु रसं चैव रसायनम् ॥ सर्व्वाशापूरयमेव सदा देवी त्रिपुरी
॥ ॥ अथ पराकुरुकुल्लधारिणीसाधनम् ॥ ॥ पराकुरुकुल्लधारिणीध्यानं भ
गुम हे भ्वरि ॥ करोकुरुकुल्लधारिणी शशिमुखी लीलावती सस्मिता ॥ शैलप्राणि कि
विकां चोविनता व्याघ्रचर्मलोकत्रया ॥ मुक्ताहार मरीचिविलसन् तुंगकुम्भस्तनी ॥ पा
यात् कुरुकुल्लधारिणी त्रिजगतामानन्दसन्दोहभृः ॥ अनेन ध्यानेन पूजयेद्देवी अयुतं जपमाच
रेत ॥ ततक्षणादायाति देवी ततः कुरुकुल्लधारिणी ॥ साधकेनापि रक्तार्घ्यं देयं तु स्वाव

480

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि॰तं ॥ ॥ २६ ॥

दत्यपि ॥ किं वार्त्तेव प्रयावत्समाने तिभवसाधकः ॥ पंचाशत्तं दीनाराणां त्रैलोक्यमपि वास्य
ति ॥ १ ॥ अथ सिन्दुरहारिणीसाधनम् ॥ अतःपरं प्रवक्ष्यामि सिन्दुरहारिणी
मनुम् ॥ क्रोधद्वयेन्दुसंयुक्तः सिन्दुरहारिणीपदम् ॥ कूर्च्चबीजत्रयं चान्ते संप्रोक्तो विधि
तथा ॥ ॥ ध्यानं ॥ सुन्दरांकुन्त हारिणी चन्द्रदलवालोलपाखास्वरा ॥ सोनकेशीष्ट
नगात्रयष्टिः शुभगा शुभांशुवस्त्रक्षिमाः ॥ अलः सततिकान्ति दन्तमालिनां त्रैलोक्यशो
भाधाता ॥ पायाद्दुत्तनवाकुकोमललतिका सिंदुरहारिण्यसौ ॥ ॥ अन्ये देवाल
ये गत्वा निर्जने निशि साधकः ॥ पंचविंशति दिनं यावत् पंचशत सहस्रजपः ॥ तद ने
मदगौ पूजां च बालं कामपूर्वो ॥ जप्यान्ते साधकस्तस्मै भार्य्या भवति कामिना ॥ वरं
वरयश्रीघ्रुत्वे प्रोक्ता सिन्दुरहारिणी ॥ रक्षति द्वादशादिन देवी सिंदुरहारिणी
२ ॥ अथ सिंहिनीसाधनं ॥ अतःपरं प्रवक्ष्ये देवि सिंहिनी च महामनुं ॥ मायाद्वयं

॥ तंत्र॰ ॥ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रोधवर्यो सिंहिनीच पदन्तनः ॥ पुनः क्रोधं नदन्नेच सिंहिनीच महामन्त्रं ॥ ह्रैँ ह्रौँ फट् फट्
सिंहिनी हूँ हूँ फट् ॥ शैलाये चानिजनेवा पूजनेसिंहिनीतथा ॥ ॥ ध्यानम् ॥ शैला
ग्रक्रमदुर्गमन्त्र भवैर्वी दुर्गास्तु देन्याहते कैशायेस्थलमस्तविषयुचरांपाध्रष्टसंसिं
हिनी ॥ यावन्तावलदराग्रवारराबलात पञ्चशसिंद्राग्गमाशेषंपातुसमस्तामूनकाञ्
लयाकल्यमानाकुला ॥ ॥ गन्धैकलिंगंयामिन्याश्च जपेदश्चनमन्त्रं ॥ ननोहस्तानि
वरदासिंहिनीचैनिपूजिता ॥ किंकरोमि वद त्वेव भाप्याभवामि कामिना ॥ दिनाव
सानैमामिन्यो भायानिसिंहिनीतथा ॥ वस्त्रयुग्मरत्नमयं साधकायदिनेदिने ॥ ४
॥ अथ हंसिनीसाधनम् ॥ अतःपरं प्रवक्ष्ये चार्वङ्गि हंसिनीसाधनक्रमं ॥ ओँ हूँ हूँ हूँ
फट् हंसिनी ॥ एतावंच त्रिजगद्धात्री हंसिनी कथितामन्त्रः ॥ ॥ ध्यानं ॥ शुभ्राशुभ्रस्त्ररोग
तल्पमेयनाशनमघोरेराग्रम ॥ एवन्ध्यामि विमुग्धसाध्यावधूगराणां सेवितासादरं ॥ किं

481

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिन्तितिर्यगपांगलोलवलितन्यामग्धस्मेरमुखी लोकललामविलोलहेमहारलतिकाश्रीह
क्षिणी पातु नः ॥ वस्त्रपात्रे गहंगत्वा प्रतिमां गोमयोलिखेत् ॥ अवसानेन संपूज्य जपेदयुत
संख्यकं ॥ यावद्दर्शनिशा देवी हंसिन्या यातिनिश्चितम् ॥ चन्दनार्घ्यप्रदानेन हृष्टा भवति
हंसिनी ॥ किं मया नेत्र कर्त्तव्यं किं च कुर्वीत साधक ॥ वस्त्रालंकारभोज्यादि वयार्थसिं
प्रयच्छति ॥ अवशेषव्ययाभावान्न ददाति प्रकुप्यति ॥ ५ ॥ अथ नटीसाधनम् ॥
इत्यपरं महामायेन गुप्तनटीसाधनम् ॥ ओं ह्रूं ह्रूं फट् फट् नटीं ह्रूं ह्रूं ह्रूं ॥ मारं कर्त्तनीं
धान्ययोनोनटीनिपमपकरेत् ॥ कर्त्तव्यानामंत्रोयं कथितो नटीको मन्त्रः ॥
ध्यानम् ॥ ऊर्ध्वे नीवरकुन्दोदरमुखी प्रेक्षकजन्मजानी नगयुग्मनयनासानन्दाह
दस्मिता ॥ क्षीराम्भोनिधिसंभवाविलसिता मानवैरिनाशिनी: वीणासंगीतशालिनीम
णिमयकुण्डलौ कर्णधारणानल्परा व्याहार वाकचातुरी ॥ नीचगासंगमंगत्या सम्राह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जपपूजने॥ सिद्धिर्भवति नटिका धूपं दद्यान्मुहुर्मुहुः॥ चन्दनेनार्घ्यं देयन्तु नैवेद्यं च मनोहरम्
॥ सततं कामभोगदात्री भार्य्या भवति नर्त्तकी॥ चतुर्वर्गफलमेकन्तु व्ययार्थं त्यक्त्वा गच्छति॥
दिने दिने नटी देवी स्थायिनी भवति ध्रुवम्॥ ६ ॥ अथ चेटी साधनम्॥ अतः परं महा
देवि चेटीमाकर्षणं शृणु॥ मंत्रं यथा॥ ओँ ह्रूँ ह्रूँ ह्रूँ फट् फट् चेटीं ह्रूँ ह्रूँ॥ नाऽर्जुर्द्धदयां
नैच अत्वयुग्मं ततः परं॥ चेटीं क्रोधद्वयं चोक्त्वा चेटीमंत्रोत्तमो नमः॥ ॥ ध्यानं॥ गच्छन्त
मन्मथविवरणी शशिमुखी प्रस्तोत्तरीयाधरा॥ विभ्रती कललं सरोजममलं स्वर्णान्नसीमं
तिनी· श्रीखन्दादिविलेपनागलवपुः सौरभ्यसंभाविना· किंचिद्धर्मसमाप्तिनाविकर ४८२
वापायाद्धः श्याम्याप्रभा॥ चेटिका॥ अत्रापि॥ भीषणस्थाने सामोच्चारणमात्रतः॥ ध्रुवं
चेटी समागत्य चेटिकर्म करोत्यपि॥ अथवा स्वगृहद्वारे त्वहं रात्रौ जपं चरेत्॥ आगत्यानि
यतं देवी चेटिकर्म करोति च॥ ७ ॥ अथ कामेश्वरी साधनम्॥ कामेश्वरीप्रयोगः॥ कामेश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रीप्रयोगः॥ कामेश्वरी ॥ ओं ह्रूं फट् फट् कामेश्वर्यै भूतिन्यै ह्रूं ह्रूं ह्रूं ॥ नारं कन्द्यास्त्वयुग्मं कामे
श्वरी भूतिनी नमः॥ परं ङेन्तं क्रोधद्वयं कामेश्वरीमन्त्रमुदाहृतम् ॥ ॥ ध्यानं ॥ ओंकाल
स्कन्धसमागतामधुरतावासन्तपुष्पान्विता ॥ यत्री मधुराधरा स्मितमुखी वीणासरागा
यिनी ॥ रक्ताम्भोजविलोचना मधुमदेर्युक्ता समं नादियम ॥ पद्मपत्रपुष्पधनुर्वरामधुम
खी कामेश्वरी भूतिनी ॥ तत्र स्थानं समागम्य कृत्वा मांसस्य भक्षणम् ॥ मांसादिना बलिं द
त्वा सहस्रं जपमाचरेत् ॥ दशसहस्रमनुं जप्त्वा सिद्धिर्भवति निश्चितम् ॥ जपान्ते शीघ्र
मायाति रक्तेनार्घ्यं निवेदयेत् ॥ कामेश्वरी भवेत् तुष्टा भार्या भवति कामिता ॥ सर्वाशां पूर
यत्येव राज्यं यच्छति निश्चितम् ॥ ८ ॥ अथ कुमारीसाधनम् ॥ ह्रूं ह्रूं फट् फट् देव्यै ह्रूं
ह्रूं ह्रूं ॥ क्रोधद्वयास्त्रयुग्मं च देवीति पदमुद्धरेत् ॥ ङेन्तं क्रोधद्वयं ज्ञेयं कुमारीमन्त्रमुत्त
मं ॥ ॥ ध्यानं दिव्यकार्यकहेमाभा कुमारी दिव्यरूपिणी ॥ सर्वालंकारसंयुक्ता भार्याभि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वतिसाधिता ॥ रात्रौ देवगृहं गत्वा तत्र शय्यां प्रकल्पयेत् ॥ सितवस्त्रं च चन्दनं च जातिपुष्पं
प्रकल्पयेत् ॥ धूपं तु गुग्गुलं दत्वा चाष्टसहस्रं जपेन्मनुं ॥ जपान्ते नित्यमायाति तु सुव
नालिंगनादिभिः ॥ कामिता जायते भार्या सत्यं देवी कुमारिका ॥ दद्यात्सेकीन
रानि दिव्यवस्त्रसुगंततः ॥ कामिकं भोजनं दिव्यं परिवारस्य दास्यति ॥ अन्यानपगृ
हात्द्रव्यमानीय शीघ्रं प्रयच्छति ॥ प्रत्यहं सहस्रं जप्त्वा तत आयाति कुमारी ॥ समं सत्यं
पुनः सत्यं सत्यमेव शाम्भवे ॥ मुहुर्मुहुर्जपेन्मंत्रं क्रोधस्य मंत्रमुत्तमम् ॥ मंत्रं च
था ॥ क्रोधाधिपं व्योमवक्त्रं वज्रपाणिं सुरान्तकं ॥ एतन्मंत्रमविज्ञाय यो जपेत् सिद्धिकां -483
क्षिणः ॥ निष्फलं तस्य कर्माणि अनेन रत्नमाप्नुयात् ॥ कलिकल्पतरुलतामूर्तिनी सिद्धिरु
च्यते ॥ ॥ अथ साधनक्रमः ॥ अतः परं प्रवक्ष्ये देवि सुन्दरीसिद्धिसाधनम् ॥ सुदर्ष्यादि
प्रभेदेन प्रत्येकं पूजयेच्छिवे ॥ प्रातरुत्थाय सुस्नातो नित्यकर्म समाचरेत् ॥ ततः प्रासादमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ क्रि॰ङ्गी ॥ हृद्यपूजास्थानं सुशोभनम् ॥ बिल्वमूले श्मशाने वा प्रान्तरे च चतुष्पथे ॥ तत्रस्थः साधयेद्योगी
॥ २९ ॥ योगिन्यादिं च भूमिनीम् ॥ अजिनासने संस्थितः ॥ तिलकं मूर्ध्नि कारयेत् ॥ ततो विहितं आच
मनस्यार्घं प्रदद्यात्तं स्वस्तिवाचयेत् पुनः ॥ गणेशं वटुकं चैव पूजयेत् यंत्रकोपरि
ततश्चोत्तरमुखो भूत्वा संकल्पं तत्र कारयेत् ॥ गणेशं क्रोधभैरवं पूजयेत् परमेश्वरि ॥
मूलमंत्रेण प्राणायामं षडंगन्यासमाचरेत् ॥ उक्तरूपेण ध्यात्वा मानसैः पूजयेत्तत
:॥ कलशस्थापनं तत्र पद्ममष्टदलं लिखेत् ॥ तत्र पंच विनिर्माय चन्दनेन विले
पनम् ॥ तन्मा बीजं लिखेत् तत्र पुनर्ध्यात्वा प्रपूजयेत् ॥ निशायां पूजयेद्धीरं दिवायां पू
जयेन्न पशुम् ॥ मूलमंत्रं महादेवि मांसं प्राप्य जपेत्सुधीः ॥ अष्टोत्तरे ततः पूजां कृत्वा ॥ मंत्रः ॥
बलिविधानतः ॥ ततो निर्भयः सन् जपेन्मंत्रं मनोगतं निवेदयेत् ॥ ॥ अथ यक्षसा ॥ २९ ॥
धनम् ॥ मन्त्रः परं महादेवि यक्षसाधनमुत्तमम् ॥ १ ॥ भीमवक्त्रो २ महाकाय ३ सिंहव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रो ४ हयाननः ५ ॥ गर्द्दभास्यो ६ महावीरो ७ वक्रको ८ गजाननः ९ ॥ विभ्रमो १० बाहु
कश्चैव ११ वीरः १२ सुग्रीवस्तथैव १३ ॥ रंजकश्च १४ पिशाचास्यो १५ जम्भको १६ वामकः
स्मृतः १७ ॥ अर्थदो १८ जयदश्चैव १९ मणिभद्रो २० मनोहरः ॥ एकोविंशतियभायैस
र्वसिद्धिप्रदायकः ॥ ॥ अथ पक्षमंत्रः ॥ गणेशो हरणाश्चैव पुरुचन्द्राङ्कशेख
रः ॥ एकाक्षरमहामंत्रो यदि जप्यते साधकैः ॥ संख्यया सहस्राष्टं च सर्वसिद्धिप्रदाय
कः ॥ श्रीदेव्युवाच ॥ भीमवक्त्रादि महामंत्रं कथ्यतां चन्द्रशेखर ॥ ॥ श्रीईश्वर उवा
च ॥ १ ह्रौं भीमवक्त्राय स्वाहा ॥ २ ह्रौं ह्रौं महावक्त्राय स्वाहा ॥ ३ वं ह्रौं सिंहवक्त्राय
स्वाहा ॥ ४ ह्रौं लं कर्माणि साधय हयाननाय स्वाहा ॥ ५ ह्रौं जुं रुं कर्माणि साधय
साधय गर्द्दभास्याय स्वाहा ॥ ६ ह्रौं महावीराय स्वाहा ॥ ७ ह्रौं जरु जरु वक्रवक्त्राय
स्वाहा ॥ ८ ह्रौं महाबलिने गजाननाय स्वाहा ॥ ९ ह्रौं विभ्रमाय स्वाहा ॥ १० ह्रौं ह्रौं

484

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रिंत्री ॥ बाहुकाय स्वाहा ॥ ११ ह्रैं ह्रीं ह्रैं धीराय स्वाहा ॥ १२ ह्रौं सुग्रीवाय स्वाहा ॥ १३ ह्रौं रंजकाय स्वाहा

॥ ३० ॥ १४ ह्रौं सर्वकर्माणि साधय पिशाचास्याय स्वाहा ॥ १५ ह्रौं स्तंभकाय स्वाहा ॥ १६ ह्रौं कुंबामका

य स्वाहा ॥ १७ ह्रौं अर्थदाय स्वाहा ॥ १८ ह्रौं जयप्रदाय स्वाहा ॥ १९ ह्रौं कालिभद्राय स्वा

हा ॥ २० ह्रौं मनोहराय स्वाहा ॥ अतः परं महेशानि ध्यानं शृणु समासतः ॥ ॥ अथ

पक्षाणां ध्यानानि ॥ भीमवक्त्रध्यानम् ॥ प्रज्वालीढपदं कृष्णं खर्वं कर्पूरमूर्धजम् ॥

द्विभुजं दक्षिणे कर्त्रीं वामे खर्परधारिणं ॥ व्याघ्रचर्माम्बरधरं त्रिनेत्रं भीषणाननम् ॥

॥ १ ॥ महावक्त्रध्यानम् ॥ ध्यायेद्देवं महावक्त्रं मग्निवर्णं त्रिनेत्रकम् ॥ द्विभुजं दक्षि

णे खड्गं खेटकं वामहस्तके ॥ कृष्णकेशान्तजटिलं विकटास्यं भयानकम् ॥ साधका ॥ नंत्रः ॥

य प्रयच्छन्ति चाभयं वरं कर्माणि ॥ २ ॥ सिंहवक्त्रध्यानम् ॥ ध्याये देवं सिंहवक्त्रं ॥ ३० ॥

जयभारसमन्वितम् ॥ विकटास्यं त्रिजिह्वं च चतुर्नेत्रं द्विकराकिम् ॥ द्विभुजं च गदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाणिं वामे चाभयं संयुतम् ॥ ३ ॥ हयाननध्यानम् ॥ श्वेतो हयाननः खर्वो द्विभुजे
ऽनिभ्यानकः ॥ दक्षे डमरुकं धत्ते वामे चैव त्रिशूलकम् ॥ ४ ॥ महावीरध्यानं
॥ ध्यायेद्देवं महावीरं द्विकरां तु त्रिनेत्रकं द्विभुजं हास्यवदनं वराभयविधानकं
॥ ५ ॥ अन्यान्यानां यक्षाणां ध्यानानि विस्तारेण डामरे समुक्तानि ॥ ॥ इति
श्रीमोड्डीशे महातन्त्रराजे पार्वतीपरमेश्वरसंवादे षोडशः पटलः ॥ १६ ॥
अथ मृत्युंजयविधानम् ॥ देव्युवाच ॥ जगन्नाथ कृपासिंधो कृहि शास्त्रविशारद
मृत्युंजय शिवपूजां किं फलं च विधानकम् ॥ श्रीशिव उवाच ॥ वक्ष्ये नाहं क्षमो गौरी
त्वयि स्नेहात् प्रकाशितम् ॥ नवकल्पं नव कल्पेन वक्तव्यं वहि मुखे ॥ मुखेन देवि व
क्तव्यं यत्नमः प्राणवल्लभे ॥ मृत्युंजयो महादेवः साक्षात् मृत्युहरः फलः ॥ तस्य वि
धानं संक्षेपे वक्तव्यं सुसुन्दरि ॥ रोगशान्त्यर्थं देवेशि तस्य पूजाविधिर्यथा ॥ मृत्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कि॰ड़ी ॥ जयंतमापूज्य लिंगं त्रिभुवनेश्वरम् रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ यस्तु सं
॥ ३१ ॥ पूजयेन्नित्यं लिंगम् तु जयंतं शिवं ॥ यमोऽपि प्रणमेत्तं भक्त्या किं करिष्यति पामरः ॥ तस्य पू
जाविधिं वक्ष्ये शृणुमत्प्राणवल्लभे ॥ जातिभेदमृत्तिकां गृहीत्वा ६ शाणितोलकम्
निर्माय पार्थिवं लिंगं कांस्यपात्रे निवेशयेत् ॥ पौराणिकेन मंत्रेण कुर्य्यात्स्वगठनं बुधः ॥ स्ना
पयेत्पंचामृतेन प्रत्येके ऽस्यारतोलकम् ॥ स्नानमंत्रेण प्रत्येकं द्वेगणस्नापयेत्सुधीः
॥ रोगक्षयकामनया नाममंत्रादि पूर्वकम् ॥ उपविश्यासने विप्रो धृत्वा धौतं च वासस
म् ॥ रुद्राक्षमालां कण्ठे वेष्टन्वा भस्मत्रिपुण्ड्रकम् ॥ उपचारां षोडशकं देयं भक्त्या प्रय
त्नतः ॥ सुवर्णस्याप्तसन्देयं तथैवाभरणानि च ॥ वस्त्रयुग्मं प्रदद्यात्तु परिधेयं यथा ॥ नं॰चः ॥
भवेत् ॥ ॥ शिवयंत्रं यथा ॥ षट्कोणं मण्डलं कृत्वा तदन्ते साध्यनामकम् ॥ प्रा ॥ ३१ ॥
सादबीजं हौं तं लिख्य ततः षट्कोणेषु प्रणवसहितं पंचाक्षरवर्णान् ॥ षडंगमंत्रां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थाविलिख्य तद्बहिः पंचदलानि ॥ विरचय्य तद्दलेषु ओं ईशानाय नमः ॥ ओं तत्पुरु
षाय नमः ॥ ओं अघोराय नमः ॥ ओं सद्योजाताय नमः ॥ ओं वामदेवाय नमः ॥ इति पंच
मंत्रान् प्रागादिक्रमेणालिखेत् ॥ तद्बहिरष्ट दलानि रचयित्वा तद्दलेषु मातृकावर्णा
न्लिखेत ॥ तद्बहिर्वृत्तं त्र्यम्बकेन वेष्टयेत् ॥ एतद्यंत्रं जपहोमादिना संपूज्य धार
येत् आयुरारोग्यैश्वर्यादिसिद्धिर्भवति ॥ ॥ अथ मृत्युंजययंत्रम् ॥ अथवा
मृत्युंजयदेवेशि यंत्रं सर्वसुसिद्धिदम् ॥ मध्ये साध्याक्षराण्यंकवर्ममभिविलिखेत्तमध्यमं
दिग्दलेषु कोणेष्वन्तमन्त्रस्ततः क्षितिभुवन मथो दिक्षु चन्द्रबिंदिष्ठं तानेयं
यंत्रकम् सकलभयहरं ॥ क्ष्वेडभूतापमृत्युः व्याधिव्यामोहदुःखप्रशमनमुदितं
श्रीप्रदं कीर्त्तिदायी ॥ ॥ मधुपर्कं काम्रपात्रे दद्याज्ज्ञानेन तद्ग्रमर्कं ॥ बिल्वप
त्रसहस्रं तु भक्त्या विनिवेदयेत् ॥ एवं संपूज्य लिंगैके जपेन्मंत्रं दिसहस्रकम् ॥ नमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

होमंपक्ववीनतउडुंबीसमिधैर्मूलैः॥ स्त्रीसिरांश्चानलेसोदेविस्त्रवर्णावस्त्रकैस्तथा गन्धर्वैर्वा गन्धैर्ध
वायथाविभवमानतः॥ अंगहीनानकर्तव्यापूजाचापफलदायनः॥ एकलिंगंसमाराध्यफ
लंस्यात्सप्तकेयुगे॥ ततफलंलभते देविकलौलंख्याचतुर्गुणा॥ तामुपात्रेतुसंस्थाप्यभ
क्तितोलर्कजलम्॥ तज्जलेनैवदेवेशिजडैःसंमार्ज्यरोगिणम्॥ क्षिपेदीपप्रज्ञिखा
यांचमंत्रमुच्चार्यमौनकम्॥ एवंविधिविधानेनपूजयेत्समूलिंगकम्॥ यादृक्यादृक्
भवेद्रोगोनाशमेतिमर्यादितम्॥ सांगेनपूजयित्वातुलभतेवांछितंफलम्॥ अंगमपनिक्र
मेरोगवदथाभवतिवासना॥ रोगोपश्चयनेलयोभोगोत्वकरुकोजितः॥ यदिमत्तवच
नेभक्तिसतसुक्तोभवेद्ध्रुवं॥ अन्यथायदिदेवर्षिसर्वंचनिष्फलंभवेत्॥ ॥ अ
थमंत्रपूजाविधानम्॥ अतःपरंप्रवक्ष्ये देवियत्रपूजाविधानकम्॥ कृत्वानित्यक्रियोदे
विस्वस्तिवाचनपूर्वकम्॥ संकल्पंचतथाकुर्यात्विधिवाक्यानुसारतः॥ अधेत्यादिअ

॥ तंत्रः॥
॥ २३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमुकगोत्रः श्रीपूर्वक देवशर्मा यन्त्राधिष्ठित देवताया पूजार्थममुकयंत्र संस्कार महं
करिष्ये ॥ इति संकल्प्य महादेवि कशरोर्वाचनमाचरेत् ॥ पंचगव्यं ततः कृत्वा शिवमंत्रे
णाभिमंत्रितम् ॥ तत्र चक्रं क्षिपेन्मंत्री प्रणवेन समाकुलम् ॥ तदुद्धृत्य ततश्चक्रं स्थाप
येत्स्वर्णपात्रके ॥ पंचामृतेन दुग्धेन कस्तूरीकुंकुमेन च पयोदधिघृतक्षौद्रशर्करा
ख्यैरनुक्रमात् ॥ तोयपूर्णाम्बरैः कुर्यात् पंचामृतेन - - - अष्टाभिः कलशै
र्देवि अष्टभिर्वारिपूरितैः ॥ कषायजलसंपन्नैः कारयेत् स्नानमुत्तमं ॥ स्नानं समाप्य
तां देवीं स्थापयेत्स्वर्णपीठके ॥ ॥ गायत्री यथा ॥ यंत्रराजाय विद्महे महायं
त्राय धीमहि तन्नो यंत्रः प्रचोदयात् ॥ स्वस्वयंत्रं अष्टाग्रे रा गायत्र्याचाभिमंत्रयेत्
अष्टोत्तरं शतं देवि देवताभावसिद्धये ॥ आत्मशुद्धिं ततः कृत्वा षडङ्गं देवतां यजेत्
तत्रावाह्य महादेवि जीवन्यासं च कारयेत् ॥ ॥ प्राणप्रतिष्ठा ॥ अस्य ॥ प्राणप्रतिष्ठा

487

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कि·त्री ॥ मंत्रस्यब्रह्माविष्णुमहेश्वरा ॥ ऋष्यऋगयजुःसामानिछन्दांसिचैतन्यंदेवताप्राणप्र
॥ ३२ ॥ तिष्ठायांविनियोगः ॥ उपचारैःषोडशभिर्महामुद्रादिभिःसदा ॥ फलताम्बूलनैवेद्यैःधू
पंतत्रसमर्च्चयेत् ॥ पट्टवस्त्रादिकंदद्याद्वस्त्रालंकारमेवच ॥ छत्रंचामरंघण्टांयथा
योग्यंमहेश्वरि ॥ सर्वमेतत्प्रयत्नेनदद्यात्सम्महितेरतः ॥ ततोजपेत्सहस्रन्तुसकले
प्सितसिद्धये ॥ जपसमापनेकुर्यात्दशांशेनतर्पणम् ॥ अष्टोत्तरशतंहुत्वासम्पाता
ज्यंविनिक्षिपेत् ॥ होमकर्मणोऽशक्तश्चेद्द्विगुणंजपमाचरेत् ॥ ततोदक्षिणांदद्यात्ततोदे
वविसर्जनम् ॥ अस्यप्रयोगः ॥ कृतनित्यक्रियःस्वस्तिवाचनपूर्वकंसंक
ल्पंकुर्यात् ॥ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्मा अमुकदेवतायाःपूजार्थं ॥ तंत्रः ॥
अमुकयंत्रसंस्कारमहंकरिष्यामि ॥ ततःपंचगव्यमानीय ह्रौं इतिमंत्रेणाष्टोत्तरशतेनअ ॥ ३२ ॥
भिमंत्र्यप्रणवेनयंत्रंतत्रक्षिपेत् ॥ ततउत्थाप्यस्नापयेच्छीतलजलचन्दनगन्धकस्तूरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुंकुमैः ॥ स्नापयित्वा पंचगव्यमानीय हौं इति मंत्रेणाऽष्टोत्तरशताभिमंत्र्य प्रणवेन शो
धयित्वा स्नापयेत् ॥ तत्र क्रमः ॥ प्रथमं क्षीरेण स्नापयित्वा धूपं दद्यात् ॥ एवं दध्ना घृ
तेन मधुना शर्करया च ॥ ततोऽष्टभिः कलशैः स्नापयेत् ॥ कुंकुमगोरोचनया चन्दनमि
श्रितैस्तोयैः स्नापयेत् ॥ सर्वत्र स्नानं मूलमंत्रेण ततो यंत्रमुत्तोल्य उच्छ्रायेण तत्स्था
पयं चेत् गायत्र्या अष्टोत्तरशताभिमंत्र्य प्राणप्रतिष्ठां कुर्यात् ॥ अस्य प्राणप्रतिष्ठामंत्रस्य
ब्रह्माविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि चेतन्यं देवता प्राणप्रतिष्ठायां
विनियोगः ॥ तद्यथा ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हंसः अमुकदेवतायाः प्राणा इह प्रा
णाः ॥ जीव इह स्थितः सर्वेन्द्रियाणि वाङ्मन इत्यादि प्राणान्प्रतिष्ठाप्य तत्र प्रकृति
देवतामावाह्य षोडशोपचारैः पंचोपचारैर्वा पूजयेत् ॥ तत्र पद्मलक्षणादिकं दत्वा
अष्टोत्तरशतं सहस्रं वा जप्त्वा शालभ्यो बलिं दद्यात् ॥ ततोऽष्टोत्तरशतं होमं कुर्यात् ॥

488

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्रि·डी॥ होमाभावे द्विगुणजपः कार्य्यः॥ ततो दक्षिणां दत्वा द्विजावधारणं कुर्य्यात्॥ ॥ इति क्रि
॥ ३४॥ योड्डीशे महातंत्रराजे पार्वतीपरमेश्वरसंवादे सप्तदशः पटलः॥ १७ ॥ अथ शिवयं
त्रम्॥ तत्रादौ॥ षट्कोणमष्टदलं कृत्वा तन्मध्ये साध्यनामयुक्तं प्रासादबीजं विलिख्य षट्
कोणेषु प्रणवसहितं पंचाक्षरवर्णान् विलिख्य विवरेषु षडंगमंत्रान्॥ तद्बाह्ये पंच
दलानि विरचय्य तद्दलेषु ओं वामदेवाय नमः॥ ओं ईशानाय नमः॥ ओं तत्पुरुषा
य नमः॥ ओं अघोराय नमः॥ ओं सद्योजाताय नमः॥ इति पंचमंत्रान् प्रागादिक्रमेणालि
खेत्॥ तद्बहिरष्टदलानि रचयित्वा तद्दलेषु मातृकावर्णान् लिखेत् तद्बहिर्त्रि
त्र्यम्बकेन वेष्टयेत् ततो यंत्रे जपहोमादिः कार्य्यः॥ ॥ अथ मृत्युंजययंत्रम्॥ ॥तंत्रः॥
मध्ये साध्याक्षराण्यं क्रमवमपि विलिखेन्मध्यमं दिग्दलेषु कोणेषु तेमनो ललतशि ॥३४॥
निश्चवनमथोदिक्षु चतुर्विदिक्षु॥ एतं तैयंत्रं तद्युक्तं सकलभयहरं॥ क्षेड्भूतापमृत्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याधिव्यामोहदुःखप्रशमनमुदितेश्रीयदं कीर्त्तिदायी ॥ ॥ अथ रोगशान्त्यर्थं
त्र्यम्बकमन्त्रं जीवनीविधानम् ॥ त्र्यम्बकस्य ध्यानं ॥ स्वच्छं स्वच्छारविन्दस्थितमुभ
यकरे संस्थितौ पूर्णकुम्भौ ॥ द्वाभ्यां मेणाक्षमालेनिजकरकमले द्वौ घटौ नित्यपू
र्णौ ॥ द्वाभ्यां तौ च स्रवन्तौ शिरसि शशिकला चामृतैः प्लावयन्तं देहं देवो दधानं
धिदिशतु विशदाकल्पजालैः श्रियं वः ॥ आदौ प्रासादवीजं तदनु मृतिहरं तारकं
व्याहृतीं च ॥ प्रोच्चार्य त्र्यम्बकं यो जपति च सततं संपुटं चानुलोमम् ॥ प्रासादवीजं
हौं ॥ मृतिहरं त्र्यक्षरं मृत्युञ्जयमन्त्रं ओं जुं सः तारकं ओं ॥ व्याहृतिर्भूर्भुवःस्वः ॥ तेन
हौं ओं जुं सः ओं भूर्भुवः स्वः ततस्त्र्यम्बकमन्त्रः पूर्वमन्त्रेण अनुलोमक्रमेण संपुटि
तः ॥ अल्पजपात् सर्वसिद्धिर्भवति ॥ पुनः – – – – – ॥ गायत्र्याः प्रथमपादं
त्र्यम्बकस्य प्रथमपादम् ॥ इत्यादि च ध्यानं पूर्ववत्क्रमं च ॥ – – – – – – –

489

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति क्रियोड्डीशे महातंत्रराजे पार्वती परमेश्वर सम्वादे अष्टादशः पटलः ॥ १८ ॥ अथ
मृत्युंजयकवचम् ॥ श्रीदेव्युवाच ॥ भगवन् देवदेवेश देवतानां प्रपूजितः ॥ सर्वं मे कथि
तं देव कवचं न प्रकाशितं ॥ मृत्युरक्षाकरं देव सर्वाशुभविनाशनम् ॥ कथय स्वामिने ना
थ यदि स्नेहोऽस्ति मां प्रति ॥ ॥ श्रीईश्वर उवाच ॥ अथ मृत्युंजयस्यास्य मन्त्रस्य वा
मदेव ऋषिर्गायत्री छन्दो मृत्युंजयो देवता साधकाभीष्टसिद्ध्यर्थे विनियोगः प्रकीर्ति
तः ॥ शिरो मे सर्वदा पातु मृत्युंजय सदाशिवः ॥ त्रिरक्षरस्वरूपो मे वदनं च महेश्वरः
पंचाक्षरात्मा भगवान् भुजौ मे परिरक्षतु ॥ मृत्युञ्जयस्त्रीबीजात्मा आयुरक्षतु मे मस
बिल्वमूले समासीनो दक्षिणामूर्तिरव्ययः ॥ सदा मे सर्वतः पातु षट्त्रिंशद्वर्णरूप
धृक् ॥ द्वाविंशत्यक्षरो रुद्रः कुक्षौ मे परिरक्षतु ॥ त्रिवर्णात्मा नीलकण्ठः कण्ठं रक्ष
तु सर्वदा ॥ चिन्तामणिर्बीजपूरे अर्द्धनारीश्वरो हरः ॥ सदा रक्षतु मेगुह्यं सर्वसम्पत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदायकः ॥ त्रिरक्षरस्वरूपात्माऽजठरस्थो महेश्वरः ॥ मार्त्तण्ड भैरवो नित्यं पादौ मे परि-
रक्षतु ॥ ओं जुं सः महावीरस्वरूपात्त्रिपुरान्तकः ॥ ऊर्द्ध्वमूर्द्ध्नि ईशानो मम रक्षतु सर्वदा
॥ दक्षिणस्यां महादेवो रक्षेन्मे गिरिनायकः ॥ अघोराख्यो महादेवः पूर्वस्यां परिरक्ष-
तु ॥ वामदेव पश्चिमस्यां सदा मे परिरक्षतु ॥ उत्तरस्यां सदा पातु सद्योजातस्वरूपधृ-
क् ॥ इत्थं रक्षाकरं देवि कवचं देवदुर्लभम् ॥ प्रातर्मध्याह्नकाले च यः पठेच्छिव-
सन्निधौ ॥ सोऽभीष्टफलमाप्नुयात् कवचस्य प्रसादतः ॥ कवचं धारयेद्यस्तु साध-
को दक्षिणे भुजे ॥ सर्वसिद्धिकरं पुण्यं सर्वारिष्टविनाशनम् ॥ योगिनीभूतवेताला ४९०
:प्रेतकूष्माण्डपन्नगाः ॥ न तस्याहिंसकाः सर्वे नित्यं भवनपालयेत् सदा ॥ पठित्वाभ्य-
र्चयेत् देवि यथाविधिपुरःसरं ॥ लभं च फलमंत्रस्य पुरश्चरणमुच्यते ॥ नजार-
रो महादेवि मन्त्ररोगविनाशनम् ॥ एवं यः जपते मन्त्रं प्रयोगानि मवाप्नुयात् ॥ इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ क्रि॰ड्डी ॥
॥ ३६ ॥

निज्ञातं महादेवि तस्य वक्त्रे स्थितं सदा ॥ कवचस्य प्रसादेन मृत्योर्ज्जेता भवेन्नरः ॥ अन्य
था सिद्धिहानिः स्यात् सत्यमेतन्मयोदितम् ॥ तव स्नेहान्महादेवि कथितं कवचं शुभं
न देयं कस्यचिद्भद्रे यदीच्छेत्स्वात्मनो हितम् ॥ इति मृत्युंजय कवचं समाप्तं ॥ अस्य पूजा
उक्ता ॥ ॥ इति क्रियोड्डीशे महातंत्रराजे पार्वतीपरमेश्वरसंवादे एकोनविंशति
तमः पटलः ॥ १९ ॥ अथ यंत्रप्रकरणम् ॥ अथ वन्ध्यायंत्रेम ॥ अतः परं शृणु दे
वि यंत्रं धारणमुत्तमम् ॥ यंत्रधारणमात्रेण सर्वाभीष्टफलं लभेत् ॥ जन्मवन्ध्या भवेत्
नारी पुत्रार्थिनी शुभं भवेत् ॥ नगगोरोचनाद्येन लिखेत् यंत्रमनुत्तमं ॥ वृत्तद्वयं समालि
ख्य पद्ममष्टदलं लिखेत् ॥ प्रतिपत्रे लिखेन्मायामुपरि विलिखेत्ततः ॥ भूर्जपत्रे
लिखेत् यंत्रं धारयेत्तु महेश्वरि ॥ कुक्षौ धृत्वा महायंत्रं शुभपुत्रवती भवेत् ॥ प्रयोगा
न्तं न कार्यं नान्यत्र प्राणशंकटे ॥ दक्षिणांगुरवे दत्त्वा गृह्णीयात् यंत्रमुत्तमं ॥ १

॥ तंत्रः ॥
॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ वृत्तंचतुर्द्दलंपद्मंभूपुरेणसमन्वितम् ॥ वर्णमध्येलिखेत्देवि साधकस्त्वांविशो
धतः ॥ पुत्रवतीपुरंपश्चात् भवन्त्वितिपुरंततः ॥ प्रणवैःपुटितांलज्जांत्रिधापत्रेषु
संलिखेत् ॥ पूर्ववत् पूजयेत् देविधारयेत् दक्षिणेभुजे ॥ सत्यंसत्यंहिदेवेशि वन्ध्या
पुत्रवतीभवेत् ॥ दुर्भगाचेत्भवेन्नारी सुभगामासतोभवेत् ॥ १ ॥ अथरक्षायन्त्रं
॥ अतःपरंप्रवक्ष्यामिमहारक्षाकरंपरं ॥ यन्त्रराजंघानवपतिमर्म्महारक्षाकरो
भवेत् ॥ पंचदलंलिखेत्देवि ग्लौंबीजेनवलान्वितम् ॥ गंपंचकेसर्वमध्येलिखित्वा
धारयेत्यदि ॥ नतस्यजन्तुभीतिःस्यात्नित्यंरक्षाकरोहरः ॥ गोरोचनाकुंकुमाभ्यांभू
र्जेसंलिख्यधारणां ॥ नत्वापूजामहादेविगणपतिंप्रपूजयेत् ॥ पूजितंधारितंचैव
सर्वोपद्रवनाशनम् ॥ २ ॥ वृत्तमष्टदलंपद्मंभूपुरेलांलिखेत् ॥ गोरोचना
भिःसंलिख्यधारणात्परमेश्वरि ॥ उक्तरूपेलिंगपूजाविधानंहिमहेश्वरि ॥ पूजनात्

५११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ क्रि॰श्री ॥
॥ ३ ॥

धारणादेव अपमृत्युविनाशनम् ॥ ४ ॥ अथपुत्रजननयंत्रम् ॥ बिन्दुवृत्तं समालिख्य
लिखेदष्टदलं ततः ॥ प्रतिपत्रेषु वं बीजं लिखेच्च पृथक् पृथक् ॥ पूर्ववत् पूजयेद्देवि
धारणात् मृत्युनाशनम् ॥ काकवन्ध्या जनन्यापि वहुपुत्रकरं परम ॥ ५ ॥ षट्कोणं
विलिखेद्वृत्तं ततश्चाष्टदलं लिखेत् ॥ षट्कोणेषु च षण्नदीर्घान् विलिखेत् परमेश्व
रि ॥ ऐं ह्रीं श्रीं ऐं क्लीं फट्स्वाहा लिखेदष्टदले ततः ॥ सर्वमध्ये लिखेद्देवि ततष्ट ग्गु
षमहेश्वरि ॥ प्रणवं तु नमो माया साधकाख्यन्तु ङेन्तिकम् ॥ भूपत्रं च समालिख्य
उन्मादयपदं ततः ------ धारयेत् यंत्रमुत्तमम् ॥ धारणात् सर्वसंपत्ति
र्भवेद्देवि न संशयः ॥ पूजनं पूर्ववत् क्रमम् ॥ देवीं कालीमंत्रेण पूजयेत् ॥ ८ ॥ अ
थवशीकरणयंत्रम् ॥ वशीकरणयंत्रेन्तु भृग्गु मन्त्राणाव क्षोभे ॥ यस्य धारणमा
त्रेण वशी कुर्यान्नृणां ततः प्रिये ॥ चतुर्वृत्तं समालिख्य लिखेदष्टदलं ततः ॥ ओं श्रु

॥ तीव्रः ॥
॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुखं बन्धयति प्रति पत्र दलं लिखेत् ॥ यस्य नामाभि संलिख्य वाह्ये संधारयेच्छिवे ॥ पूर्व
वत्पूजयेद्देवीं जपेल्लक्षं विधानतः ॥ वाम राशं प्रयोगं च पूजयेद्देवि साधकः ॥
--- --- कृत्वा चैव विधानतः ॥ ७ ॥ अथ बन्धमुक्ति यंत्रम्
लिखेद्भूर्जं न वहिः सु स्वरान् लिखेत् ॥ वहिर्भूर्ध्व द्वयं लिख्य चतुर्दिक्षु चहीं लिखेत्
वसुयुग्माष्ट पत्रं च लिखेत् गोरोचनादिना ॥ ग्रीवायां कण्ठदेशे वा शिखायां वापि
धारणात् ॥ बन्धमुक्तिर्भवेत्तस्य नवमे दिवसे नघ पूर्ववत्कृत्वा यथा पूजा ॥ दुर्गामं
त्रं लक्षं जपेत् ॥ ८ ॥ अथ डाकिन्यादि भयविनाशन यंत्रं जीववत्सायंत्रं च ॥ व
सुयुग्मं लिखेत्तत्र मायाबीज चतुष्टयम् ॥ चतुष्कोणद्वयं वाह्ये लिखित्वा धारयेत्तय
दि ॥ नाशयेत् क्षण मात्रेण डाकिन्यादि विनाशनम् ॥ मृतवत्सा यदि भवेन्नारी दुः
ख पराय णा ॥ धारयेत् परमं यंत्रं जीववत्सा ततो भवेत् ॥ ९ ॥ दीर्घ रेखा द्वयं द

५१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यानत्याग्रेऽष्टदलं लिखेत् ॥ ॐ ह्रीं देवदत्तं ह्रीं ॐ रे खां मध्ये लिखेत् प्रिये ॥ रे खा गात्र दद
ले ॐ हूं रे खा घनत्न द लेच ॐ लिखेत् ॥ गोरोचनाकुंकुमेन तथैवालक्तकेन तथा ॥ यस्यना
मार्थं संलिखेत् स्यात् पूर्येत परमेश्वरि ॥ पंचामृतेषु देवेशि जीववत्साभवेत् प्रिसा ॥ तत
स्तु तस्या कालमृत्युर्नान्यथा जायते प्रिये ॥ उक्तरूपे तथा पूजालक्षमेकं जपेत् शिवे ॥
१० ॥ इति क्रियोड्डीशे महातंत्रराजे पार्वतीपरमेश्वरसंवादे यंत्रप्रकरणं नाम
विंशतितमः पटलः ॥ ॥ अथ विजयानुपानम् ॥ घृतयोगेन विजया महा
तेस्करी चक्षुर्दोषादिवारिणी ॥ चक्षुर्दोषादिकारिणी इति पाठान्तरम् ॥ जलयो
गेन अजीर्णनाशिनी ॥ घृतेन मेधावाग्देवी वश्यकारिणी कफरोगनशोषांध्यमधु
नासह नाशयेत् ॥ सैन्धवेन महावह्नि - - - लवणेनच ॥ शर्करया गुडेनापि भू
लाम्लपित्तनाशिनी ॥ वलपुष्टिप्रसाममधुरस्वरदायिनी ॥ केवला ज्ञानदापि जयासर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वं सिद्धिदायिनी सिद्धिरिति ॥ ॥ इति क्रियोड्डीशे महातंत्रराजे पार्वतीप
रमेश्वरसम्वादे विजयानुपानं नाम एकविंशतितमः पटलः ॥ २१ ॥ अथ
मंगलचण्डीप्रयोगः ॥ ॥ ओँ ह्रीँ श्रीँ क्लीँ सर्वपूज्ये देवि मंगलचण्डिके हूँ हूँ फट्
स्वाहा ॥ इत्येकविंशाक्षरो मनुः ॥ ॥ ध्यानं यथा देवीं षोडशवर्षीयां शाश्वत्सुस्थि
रयौवनाम् ॥ सर्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम् ॥ श्वेतचम्पकवर्णाभां
चन्द्रकोटिसमप्रभाम् ॥ वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ॥ शुक्लवासां
[illegible]वापाठान्तरम् ॥ बिभ्रतीं कवरीभारं मल्लिकामाल्यभूषितम् ॥ बिम्बोष्ठीं सुदतीं शुद्धां शरत्पद्मनिभाननाम् ॥ ईषद्धास्य
प्रसन्नास्यां सुनीलोत्पललोचनाम् ॥ जगद्धात्रीं च धात्रीं च सर्वेभ्यः सर्वसंपदाम् ॥ सं
सारे सागरे घोरे पोतरूपां वरां भजे ॥ ॥ इति श्रीक्रियोड्डीशे महातंत्रराजे पार्वतीप
रमेश्वरसंवादे मङ्गलचण्डीप्रयोगो नाम द्वाविंशतितमः पटलः समाप्तः ॥ ॥ शुभम्

५९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कि॰क्री ॥
॥ ३९ ॥

॥ तंत्रः ॥
॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu